Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

। श्रीविजयनेमिसूरिग्रन्थमाला-रत्नम्-२७ ।

परमार्हत-महाकवि-श्री 'धनपाल' विदुषा विनिर्मिता

# श्रीतिलकमंजरी.

तदुपरि

विबुधशिरोमणि श्रीशान्त्याचार्यनिर्मितं टीप्पनकम्,

श्रीपद्मसागर-विबुधरचिता व्याख्या,

श्रीविजयलावण्यसूरिनिर्मिता परागाभिधा विवृतिश्च ।

प्रकाशकः-

श्रीजैनग्रन्थप्रकाशकसभायाः कार्यवाहकः श्रेष्ठी

ईश्वरदास मूलचन्द्रः ।

प्रथमावृत्तिः
प्रतयः ५२५

मूल्यं द्वादश आणकाः ।
०—१२—०

वीर सं. २४६७
विक्रम सं. १९९७

मुद्रकः- प्रियदर्शनमुद्रणालयाधिपतिः

'शाह पुनमचंद वालजी '-अमदावाद.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

। ॐ अर्हं नमः ।

श्रीजिनेन्द्रशासनैकरसिक--धाराधीशासादितसरस्वतीबिरुद-
कवीन्द्र-विप्राग्रणी-परमार्हत-**श्रीधनपालेन** धीमता रचिता

# ॥ तिलकमञ्जरी ॥

**स वः पातु जिनः कृत्स्न-मीक्षते यः प्रतिक्षणम् ।**
**रूपैरनन्तैरेकैक--जन्तोर्व्याप्तं जगत्रयम् ॥ १ ॥ मविपुलावृत्तम् ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

सम्यग् नत्वा **महावीरं** रागादिक्षयकारणम् । उत्पन्नानन्तविज्ञानं देवपूज्यं गिरीश्वरम् ॥ १ ॥
**तिलकमञ्जरी**नाम्न्याः कथायाः पदपद्धतिम् । श्लेषभङ्गादिवैषम्यं विवृणोमि यथामति ॥ २ ॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता टीका 卐

श्रेयःसिद्धमतिर्वीर-स्तन्याद्धन्यार्चितक्रमः । यदंह्रिपाविता पृथ्वी-मिव मूर्ध्नाऽहिराड् दधौ ॥ १ ॥
तं प्रणम्य **महावीरं**, नम्राखण्डलमण्डलम् । **धनपाल**कृताख्यान-व्याख्यानं तन्यते मनाक् ॥ २ ॥
श्रीम**द्विजयसेना**ख्य-सूरीणामुपदेशतः । **स्तम्भतीर्थ**पुरे व्याख्यां, कुरुते **पद्मसागरः** ॥ ३ ॥

श्रीतपोगच्छाधिपति-सर्वतन्त्रस्वतन्त्र-शासनसम्राट्-जगद्गुरु--**श्रीविजयनेमिसूरीश्वर**पट्टालंकारेण
व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्नेतिपदालंकृतेन **श्रीविजयलावण्यसूरिणा**
प्रणीता **पराग**ाभिधा विवृतिः ।

लोकालोकावलोके विलसति विमला केवलार्चिर्यदीया,
देवादेवाधिदेवैररचि च चरणा-र्चा च नित्यं यदीया ।
गावो नावो नवीना घनभवजलधेस्तारणेऽरं यदीया,
आप्ताः प्राप्ताः शिवं ते **जिनवरप्रवरा** नो नयन्तां शमालिम् ॥ १ ॥ **स्रग्धरा** ॥

लब्धानल्पार्थसार्थो मकरधिमधरीकृत्य यः सत्तयाऽऽस्ते,
उद्यत्कल्लोलमालाऽपि जडपरिणतिर्गाहते यं च नित्यम् ।
सद्वंशो वारिराशौ सदमृतसरणिं संसृतौ संश्रितोऽस्तु,
**पोतः श्रीनाभिसूतो** विलसनवसतिर्धीवराणां नराणाम् ॥ २ ॥ **स्रग्धरा** ॥

## 卐 परागविवृतिमङ्गलाचरणटिप्पनिका 卐

**आदिनाथपक्षे—**

लब्धानल्पार्थसार्थः=गृहवासापेक्षया भूपालाग्रणीत्वाद् लब्धः प्राप्तोऽनल्पो विपुलोऽर्थसार्थो धनधान्याद्यर्थसंचयो येन स तथा, यद्वा गृहवासेऽपि ज्ञानत्रयकलितत्वाद् लब्धो ज्ञातोऽनल्पो विपुलोऽर्थसार्थो वाच्यनिकरो येन स तथा, यद्वा कैवल्यापेक्षया लब्धो ज्ञानदर्शनाभ्यां सम्यग् ज्ञातोऽनल्पः सकलोऽर्थसार्थः पदार्थसमुदायो येन स तथा । **मकरधि**= मदनम्, अधरीकृत्य=हीनं कृत्वा, पराजित्येत्यर्थः, सत्तया=उत्तमतया, आस्ते=विराजते । **उद्यत्कल्लोलमाला=उद्यन्ती**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 卐 विजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

भव्यग्रामानुशासी चरणजयकृतौ सिंहकल्पश्च शास्त्र-
विद्यादक्षः प्रदाता प्रतिदिनरजनि क्षेत्रभृद्राज्यमीतेः ।
यो नित्यं दान्तराजैर्विहरति च सदाचारलब्धस्वरूपः
**श्रीशान्ति** तं क्षमाभृन्निकर उभयतश्चक्रिणं नन्नमीमि ॥ ३ ॥ **स्रग्धरा** ॥

## 卐 परागविवृतिमङ्गलाचरणटिप्पनिका 卐

कल्लोलस्य हर्षस्य माला पङ्क्तिर्यस्यां सा तथा, जडपरिणतिः=युगलजानाम् ऋजुजडत्वात् जडानां युगलजजनानां परिणतिर्मनोभावना । यद्वा जडानां मूर्खाणामास्तां विदुषाम् । गाहते=सेव्यतयाऽवगाहते, सद्वंशः=सन् उत्तमो वंशोऽन्वयो यस्य स तथा । वारिराशौ=वाशब्दः समुच्चये, अरीणां परस्परं भक्ष्यत्वादिना प्रतिपक्षभावमापन्नानां जीवानां राशौ निचयरूपायाम्, संसृतौ=संसारे, सदमृतसरणिं=सद् उत्तमं यद् अमृतं मोक्षं तस्य सरणिं मार्गम्, संश्रितः=आश्रितः । श्रीनाभिसूतः= आदिनाथः । धीवराणाम्=प्रवरमतिमताम्, नराणाम्=जनानाम्, विलसनवसतिः=विलासस्थानम्, अस्तु=भवतु ॥

**पोतः प्रवहणं तत्पक्षे-**

लब्धानल्पार्थसार्थः=लब्धः प्राप्त ऊढोऽनल्पो विपुलोऽर्थसार्थो धनधान्यादिसंचयो येन स तथा, मकरधिं= जलधिम्, अधरीकृत्य=अधः कृत्वा, सत्तया=स्थित्या, आस्ते=विराजते । जडपरिणतिः=डलयोरैक्यात् जलपरिणामरूपा, उद्यत्कल्लोलमाला=उद्यन्ती उद्यतां वा कल्लोलानां तरङ्गाणां माला पङ्क्तिः, गाहते=अवगाहते । सद्वंशः=सन्त उत्तमा विद्यमाना वा वंशा वेणवो यत्र स तथा । वारिराशौ=जलधौ, संसृतौ=संचरणक्रियायाम्, सदमृतसरणिं=सतीमुत्तमाममृतस्य जलस्य सरणिं मार्गम्, संश्रितः=आश्रितः, धीवराणाम्=मात्सिकानाम्, उपलक्षणत्वात् जलयात्रां चिकीर्षूणामित्यर्थः । विलसनवसतिः=विलासवसतिः, अस्तु=भवतु ॥ २ ॥

उभयतः=उभयस्मिन् द्विविधेऽपीत्यर्थः, क्षमाभृन्निकरे=क्षमाभृतो मुनयो राजानश्च तेषां निकरे समूहे, मुनिसमुदाये राजसमुदाये च । चक्रिणं=चक्रवर्तिनम्, तीर्थकरं चक्रवर्तिनं चेति भावः ।

**तत्र तीर्थंकरपक्षे—**

भव्यग्रामानुशासी=भव्यानां मुक्तिगमनार्हजीवानां यो ग्रामः समुदायस्तदनुशासी तस्य धर्मोपदेशदातेत्यर्थः ।

चरणजयकृतौ=चरणस्य चारित्रस्य जयः सर्वोत्कर्षभावः तत्कृतौ, सिंहकल्पः=तत्करणे सिंहसदृशः शूर इति यावत्, चारित्रग्रहणे चारित्रपालने चारित्रदाने चातीव शूर इति भावः । शास्त्रविद्यादक्षः=शास्त्राणामागमानां विद्यायां दक्षो निपुणः । प्रतिदिनरजनि=सर्वदा, क्षेत्रभृद्राज्यमीतेः=क्षेत्रभृतां शरीरिणां या राजिः पङ्क्तिस्तस्या अमीतेरभयस्य, प्रदाता=प्रकर्षेण दायकः । दान्तराजैः=दान्ता इन्द्रियदमनकारिणो मुनिजनास्तेषां ये राजानः, प्रवरमुनिजना इत्यर्थः, तैस्तथा, विहरति=महीतले विचरति; सदाचारलब्धस्वरूपः=सदाचारेण विमलचारित्रेण लब्धं प्राप्तं स्वरूपमात्मीयवास्तविकरूपं येन स तथा नन्नमीमि=भृशं पुनःपुनर्वा नमामीत्यर्थः ।

**चक्रवर्तिपक्षे—**

भव्यग्रामानुशासी=भव्या रमणीया ये ग्रामा उपलक्षणत्वाद् नगरजनपदादयस्तदनुशासी प्रजापतित्वेन तदनुशिष्टिकृत्, च रणजयकृतौ=चशब्दः समुच्चये, रणे संग्रामे जयकृतौ विजयक्रियायाम्, सिंहकल्पः=सिंहसदृशः, अत्यन्तशूर इत्यर्थः । शास्त्रविद्यादक्षः=शास्त्रविद्या नीतिशास्त्रादिज्ञानं शस्त्रसम्बन्धि ज्ञानं वा तत्र दक्षश्चतुरः । क्षेत्रभृद्राज्यमीतेः= क्षेत्रभृद् यद् राज्यं तस्य भीतेर्भयस्य, प्रदाता=प्रकर्षेण छिन्दानः । दान्तराजैः= दन्तिनां करिणां समूहो दान्तं तस्य राजभिः, प्रवरहस्तिभिरित्यर्थः । विहरति=क्रीडति । सदा चारलब्धस्वरूपः=सदा नित्यं चाराश्चरपुरुषास्तैर्लब्धमवगतं स्वरूपं स्वकीयवृत्तान्तं येन स तथा ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 卐 विजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

विस्फूर्जत्स्फीतवाचो नवसुरकुरुहः प्राणिनां वाञ्छितार्थ-
**दानेमीनः** सदावस्थितिकृत उदरे शान्तिसिन्धोर्विहाय ।
कान्तां भौगीं च **राजीं** मदनमदजित**स्तीर्थराजः** प्रभास,
आधिव्याधिप्रहीणं शमधि विदधतामक्षरस्थानमिज्यम् ॥ ४ ॥ **स्रग्धरा** ॥

जडप्रधानोऽपरभङ्गगोऽपि, सपङ्कजातः सगरान्वयोऽपि ।
नीचः प्रकृत्या मृततां गतोऽपि, सप्ताम्बुराशिप्रकरः पृथिव्याम् ॥ ५ ॥ **उपजातिः** ॥

यच्छत्रसप्तस्फटशालिनागा-धिराजदम्भात् कृतसेवनातः ।
महाशयत्वं च जगाम नित्यं पायादपायाज्जिनपः स **पार्श्वः** ॥ ६ ॥ **उपजातिः** ॥ युग्मम् ॥

## 卐 परागविवृतिमङ्गलाचरणटिप्पनिका 卐

नेमीनः=नेमिश्चासौ इनश्च नाथश्च नेमीनः, नेमिनाथ इत्यर्थः, तीर्थराजः=तीर्थराज्शब्दस्य प्रथमाबहुवचनम्, तीर्थकरा इत्यर्थः ।

**तत्र नेमिनाथपक्षे—**

विस्फूर्जत्स्फीतवाचः=विस्फूर्जन्ती स्फीता वाचा यस्य स तथा, भागुरिमते व्यञ्जनान्तस्त्रीलिङ्गशब्दानामाबन्तत्वस्वीकाराद् वाचाशब्दः। प्राणिनां वाञ्छितार्थदाः=वाञ्छितार्थदायकः, नवसुरकुरुहः=नवोऽगोचरवस्तुदातृत्वादभिनवः, सुराणां देवानां कुरुहो वृक्षः, उपमाया गम्यमानत्वात् कल्पतरुसदृश इत्यर्थः। यद्वा अनवो जीर्णो हीनप्रभावतया तुच्छः सुरकुरुहः कल्पतरुर्येन स तथा। शान्तिसिन्धोः=शमसागरस्य, उदरे=मध्ये, सदावस्थितिकृतः=सदा नित्यं वो युष्मभ्यम्, एतद् अक्षरस्थानं विदधताभित्यग्रेतनेन योज्यम्, कृता स्थितिर्येन स तथा। कृतशब्दस्य परनिपातः। कान्तां=मनोज्ञां नारीं वा, भौगीं=भोगराजपुत्रीं भोगसम्बन्धिनीं वा, राजीं राजीमतीनाम्नीं पङ्क्तिं वा। मदनमदजितः=जितो मदनमदो येन स तथा, जितशब्दस्य परनिपातः। तीर्थराजः=तीर्थस्य राजा तीर्थराजः, तीर्थंकर इत्यर्थः। प्रभासः=प्रकृष्टो भासो यस्य स तथा। आधिव्याधिप्रहीणं शमधि=शमनिधानम्, इज्यं=पूज्यम्, अक्षरस्थानं=मोक्षस्थानं, विदधतां=कुर्वताम्, 'दधि' इत्यस्यैकवचनम्।

**तीर्थंकराणां पक्षेऽयं विशेषः—**

बहुवचनसम्पादनार्थं वाचाशब्दस्थाने वाच्शब्दः, कुरुहशब्दस्थाने कुरुह्शब्दः, कृतशब्दस्थाने कर्तृक्विबन्तकृत्-शब्दः, जितशब्दस्थाने कर्तृक्विबन्तजित्शब्दः, विदधताम् इति 'डुधांञ्' इत्यस्य बहुवचने रूपम्, तथा वाञ्छितार्थदानेऽमी तीर्थंकराः, नोऽस्मभ्यमिति, सदाऽवस्थितिकृत इति च विश्लिष्यार्थयोजना विधेया, तथा कान्तां=मनोज्ञाम्, भौगीं=भोगसम्बन्धिनीम्, राजीं=पङ्क्तिम् ॥ ४ ॥

सप्ताम्बुराशिप्रकरः=सप्तानां समुद्राणां निकरः, समुद्राणां संख्यातीतत्वेऽपि लौकिकैः सप्तानामेव द्वीपसमुद्राणामङ्गीकारात् कविजनरूढ्या सप्तग्रहणम्। जडप्रधानः=मूर्खशिरोमणिः, पक्षे डलयोरैक्याद् जलप्रधानः। अपरभङ्गगोऽपि=अपरेण यो भङ्गो विनाशस्तद्गोऽपि,पक्षे अपरा अनुत्तरा ये भङ्गास्तरङ्गास्तद्गोऽपि। सपङ्कजातः=पङ्कस्य कर्दमस्य जातेन समुदायेन सहितः, पक्षे पङ्कजातैः कमलैः सहितः। सगरान्वयोऽपि=गरं विषं तेन सहितोऽन्वयोऽस्य स तथा, पक्षे कविजनरूढ्या सगरजन्मा। प्रकृत्या=स्वभावेन, मृततां=मरणभावम्, पक्षे अमृततां=पीयूषसमुदायम्। पार्श्वनाथप्रभोः शिरस उपरि नागेन्द्रेण सप्तफणामयं छत्रं धृतमिति वृत्तमाश्रित्योत्प्रेक्षते-यच्छत्रेत्यादि। नेदं नागेन्द्रनिर्मितं सप्तफणामयं छत्रमपितु तद्व्याजेन सप्ताम्बुराशिप्रकरः सेवते। व्याजकृतसेवया किं फलं जातमित्याकाङ्क्षायामाह-महाशयत्वं=महान् आशयोऽभिप्रायो यस्य तस्य भावं तथा, पक्षे महांश्चासौ आशयश्च जलस्थानं च महाशयस्तस्य भावं तथा। जगाम=प्राप्तः, अत एव महाशयसंज्ञा जातेति भावः। अपायात्-विघ्नात् ॥ ५-६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 卐 विजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

यस्माद् बोधति चेदकं कुवलयं यस्तारकाल्याऽञ्चितः,
सर्वाशासुखसम्पदुल्लसनकृद् नित्यं सुधामाश्रयन् ।
यश्चञ्चद्धरिणाङ्कितः शमनिधिः सद्वृत्तसौभाग्यभूः,
वन्देऽज्ञानतमोऽपनोदनकृते **वीरं** तमीशं सदा ॥ ७ ॥ **शार्दूलविक्रीडितम्** ॥
लसन्ती या नित्यं सरससुमनोमानसमिता,
जडोल्लासी पक्षैः विलसितमरुद्भिः शुचितरैः ।
कलध्वाना दीव्यद्गतिरुपनता मौक्तिकफलैः,
सदा जैनी **वाणी** सुजयति मरालीव नितराम् ॥ ८ ॥ **शिखरिणी** ॥
पूज्यः श्रीयुत**वृद्धिचन्द्र** इह स प्रद्योतते पुण्यकृ-
च्चाकोरामद**वृद्धिचन्द्र** इव यश्चन्द्रश्च शान्त्याकरः ।
सिद्धान्तोदधि**वृद्धिचन्द्र** उपमा-तीतः सतां हृत्सरः-
सम्वित्कैरव**वृद्धिचन्द्र** उदिते पापातपे वारिदः ॥ ९ ॥ **शार्दूलविक्रीडितम्** ॥

## 卐 परागविवृतिमङ्गलाचरणटिप्पनिका 卐

वीरं=महावीरजिनम् । तमीशं=चन्द्रम् । तत्र **श्रीमहावीरपक्षे**-बोधति=बोधं प्राप्नोति, इदमेव इदकम् । कुवलयं= भूवलयम् । तारकाल्या=तारकाणां संसारसागरात् तारकाणां मुनिजनानाम् आल्या पङ्क्त्या । सर्वाशासुखसम्पदुल्लसनकृत्= सर्वेषाम् आशा अभिलाषा सुखं प्रसिद्धं सम्पत् सम्पत्तिस्तेषामुल्लसनकृत् । सुधामाश्रयन्=सुधाम मोक्षरूपमुत्तमं स्थानं शोभनं तेजो वा आश्रयन् । चञ्चद्धरिणाङ्कितः=चञ्चन् यो हरिः सिंहस्तेनाङ्कितश्चिह्नितः, उत्तमसिंहलाञ्छन इत्यर्थः । शमनिधिः=शमस्य निधानम्, सद्वृत्तसौभाग्यभूः=सद् उत्तमं यद् वृत्तमाचारः सौभाग्यं च तस्य भूः स्थानम् । वन्दे= स्तौमि नमामि च । अज्ञानतमोऽपनोदनकृते=अज्ञानरूपं यत्तमस्तस्यापनोदनकृते दूरीकरणाय । तमीशं=तम् ईशमीश्वरम् ।

**चन्द्रपक्षे—**

बोधति=विकाशं प्राप्नोति, कुवलयं=चन्द्रविकाशिकमलम्, तारकाल्या=ताराणां पङ्क्त्या सर्वाशासु=सर्वासु दिक्षु । खसम्पदुल्लसनकृत्=खस्य गगनस्य या सम्पद् ज्योत्स्नारमणीयत्वादिरूपा सम्पत्तिस्तदुल्लसनकृत् । सुधाम्=अमृतम् आश्रयन्, चञ्चद्धरिणाङ्कितः=चञ्चन् यो हरिणो मृगस्तेनाङ्कितः । शमनिधिः=शीतलतानिधानम् । सद्वृत्तसौभाग्यभूः=सद् उत्तमं यद् वृत्तं गोलाकारस्तस्य यत् सौभाग्यं तस्य भूः स्थानम् । वन्दे=शमादिगुणकलितत्वेन स्तौमि । अज्ञानतमोऽपनोदनकृते= न विद्यते ज्ञानं येन तादृशं यत् तमोऽन्धकारं तस्यापनोदनकृते दूरीकरणे, वीरं वीरताशालिनम् । तमीशं=रात्रीशं चन्द्रम् ॥७॥

मरालीव हंसीव जैनी जिनेश्वरस्य वाणी सुजयतीत्यन्वयः ।

**तत्र वाणीपक्षे**

सरससुमनोमानसमिता=सरसं प्रशमादिरसयुक्तं सुमनसां देवानां विदुषां वा यद् मानसं मनस्तद् इता प्राप्ता सती यद्वा तादृशमानसेन मिता प्रमाज्ञानविषयीकृता सती लसन्ती=विलासं कुर्वाणा । शुचितरैः=विशदैः, विलसितमरुद्भिः= विलसिता मरुतो देवा यैस्तादृशैः पक्षैः=नयवादैः, जडोल्लासी-जडानां मुर्खाणामपि उल्लासप्रदा । कलध्वाना=कलो मनोज्ञो ध्वानो नादो यस्याः सा तथा । दीव्यद्गतिः=दीव्यन्ती गतिर्देवगत्यादिरूपा यद्वा गत्यर्थानां ज्ञानार्थत्वाद् गतिर्ज्ञानं यया सा तथा । मौक्तिकफलैः=मुक्तिसम्बन्धिफलैः, उपनता=सहिता ।

**हंसीपक्षे**-

सरससुमनोमानसम्=सरसं प्रशस्तजलयुक्तं सुमनसां देवानां यद् मानसं मानसाभिधसरोवरम्, तद् इता= प्राप्ता सती विलसन्ती=विलासं कुर्वाणा, शुचितरैः=विशदैः, विलसितमरुद्भिः=विलसितो मरुद् वायुर्यैस्तैस्तथा । पक्षैः= अर्थवशाद् वचनविपरिणामेन पक्षाभ्यां पतत्त्राभ्याम् ॥ जडोल्लासी=डलयोरैक्याद् जलोल्लासी । दीव्यद्गतिः=दीव्यन्ती गतिर्गमनं यस्याः सा तथा । मौक्तिकफलैः=मुक्ताफलैः ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 卐 विजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

सौवर्णाद्रिरिव क्षमाधरवरो मध्यस्थभावं गतो,
भक्तिभ्राजितवैबुधार्चितपदः काष्ठान्तप्रापिस्थितिः ।
जैनेन्द्रागमजातचारुविभवः कल्याणरूपश्च यो,
भव्यानां स तनोतु मङ्गलततिं **श्रीनेमिसूरीश्वरः** ॥ १० ॥ **शार्दूलविक्रीडितम्** ॥

संसारार्णवपारप्रापणविधौ पोतायमानो नृणा-
मत्युद्भासितभिक्षुभावगरिमा विज्ञाततन्त्रावलिः ।
श्रीमन्नेमिगुरुः प्रभूतकरुणः सोऽयं सदा सद्**गुणं**
दया**द्यामृत**सद्म **नन्दन**तरं **लावण्य**सन्मन्दिरम् ॥ ११ ॥ **शार्दूलविक्रीडितम्** ॥

कम्रालङ्काररम्या रुचिरतरपदन्याससौम्या प्रसन्ना
नानाश्लेषातिदक्षा स्वरमधुरतया कर्णयुग्मापहारी ।
विस्फूर्जत्स्फीतभावा नवरसहृदया चारुवर्णाभिरामा
कान्तेवासौ नवीना भुवि जयतितरां **भारती नेमिसूरेः** ॥ १२ ॥ **स्रग्धरा** ॥

## 卐 परागाभिधविवृतिमङ्गलाचरणटिप्पनिका 卐

सौवर्णाद्रिरिव=मेरुरिव, मेरुसदृश इत्यर्थः । **श्रीनेमिसूरीश्वरपक्षे**–क्षमाधरवरः=क्षमाधरेषु मुनिवरेषु वरः प्रधानः । मध्यस्थभावं गतः=माध्यस्थ्यगुणान्वित इत्यर्थः । भक्तिभ्राजितवैबुधार्चितपदः=भक्तिभ्राजितं यद् वैबुधं विबुधानां विदुषां समूहस्तेनार्चिते पदे पादौ यस्य स तथा । काष्ठान्तप्रापिस्थितिः=काष्ठान्तप्रापिणी दिगन्तप्रापिणी स्थितिर्मर्यादा यस्य स तथा । जैनेन्द्रागमजातचारुविभवः=जैनेन्द्रागमजातं जिनेन्द्रप्रणीतसिद्धान्तसमुदाय एव चारुविभवो मनोहरधनं यस्य स तथा, यद्वा जैनेन्द्रागमैर्जिनेन्द्रभाषितसिद्धान्तैर्जातश्चारोः बृहस्पतेः विभवो यस्य स तथा । कल्याणरूपः=कल्याणं शुभयुक्तं रूपं यस्य स तथा ।

**मेरुपक्षे**–

क्षमाधरवरः=क्षमाधरेषु गिरिषु वरः प्रधानः, मध्यस्थभावं=मध्यस्थतां गतः, जगतो मध्ये स्थित इत्यर्थः । भक्तिभ्राजितवैबुधार्चितपदः=भक्त्या रचनाविशेषेण भ्राजितं राजितं यद् वैबुधं विबुधानां देवानां मण्डलं तेनार्चितानि बहुमानितानि पदानि स्थानानि यस्य स तथा । काष्ठान्तप्रापिस्थितिः=काष्ठान्तप्रापिणी दिगन्तप्रापिणी स्थितिरवस्थानं यस्य स तथा । जैनेन्द्रागमजातचारुविभवः=जिनानामिन्द्राणां च य आगमो जन्मोत्सवादावागमनं तेन जातश्चारुर्विभवो यस्य स तथा । कल्याणरूपः=कल्याणं सुवर्णं रूपं देहो यस्य स तथा ॥१०॥

सद्गुणमित्यत्र गुणशब्दोपादानेन मुनिप्रवरस्य गुणविजयस्य, अमृतसद्म इत्यत्र अमृतशब्दोपादानेन श्रीमद्विजयामृतसूरेः, नन्दनतरमित्यत्र नन्दनशब्दोपादानेन श्रीमद्विजयनन्दनसूरेः, लावण्यसन्मन्दिरमित्यत्र लावण्यशब्दोपादानेन च श्रीमद्विजयलावण्यसूरेः, इति सहदीक्षेच्छुनामेकग्रामजन्मनां सांसारिकमित्राणां मुनीशानां नामान्यपि सूचितानि ॥११॥

नवीना कान्तेव नारीव नेमिसूरेर्भारती सुजयतीत्यन्वयः

**तत्र भारतीपक्षे**–

कम्रालंकाररम्या=कम्रैः मनोहरैरलंकारैः शब्दभूषणैरनुप्रासादिभिः शब्दार्थभूषणैश्चोपमादिभी रम्या । रुचिरतरपदन्याससौम्या=रुचिरतराणां पदानां विभक्त्यन्तानां न्यासेन सौम्या । प्रसन्ना=प्रसादाख्यकाव्यगुणयुक्ता । नानाश्लेषातिदक्षा=नाना विविधा ये श्लेषा शब्दालंकारविशेषास्तैरतिदक्षाऽतिशिक्षिता । स्वरमधुरतया=स्वराणामकारादीनां यद्वा स्वरस्य उदात्तानुदात्तस्वरितरूपस्य वर्णोच्चारणप्रयत्नविशेषस्य, मधुरतया=माधुर्येण, कर्णयुग्मापहारी–अणन्ताद् ङीप्रत्ययः । विस्फूर्जत्स्फीतभावा=विस्फूर्जन्तः स्फीताः समृद्धा भावाः पदार्था यया सा तथा । यद्वा तादृशो भाव आशयो यस्याः सा तथा । नवरसहृदया=नव नवसङ्ख्यका नवीना वा रसा हृदये मध्ये यस्या सा तथा । चारुवर्णाभिरामा=चारवो वर्णाः ककारादयस्तैरभिरामा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 卐 विजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

यः सर्वदारोचितचित्तवृत्तिस्तथाप्यदारोचितचित्तवृत्तिः ।
सिद्धेषु रागान्वितचित्तवृत्तिस्तथापि सिद्धान्तसुचित्तवृत्तिः ॥ १३ ॥ **उपजातिः** ॥
समाश्रितोऽधामतया सदापि श्रितः स्फुरद्धामतया तथापि ।
सदर्पणो दर्पणरिक्तकोऽपि स **नेमिसूरि**र्जयताज्जगत्याम् ॥ १४ ॥ युग्मम् ॥ **उपेन्द्रवज्रा** ॥
वर्णवर्गान्तवर्तिनौ निजनामावलम्बिनौ ।
नमौ गुणश्रियायोज्य स्पर्शभावं नयन्ति ये ॥ १५ ॥ **अनुष्टुप्** ॥
तेषां **श्रीनेमिसूरीणां** गुरूणां पादसेवया ।
नायान्ति किमु दक्षत्वं मादृशा जडशेखराः ॥ १६ ॥ **अनुष्टुप्** ॥ युग्मम् ॥
**परागो** न परागोऽप्य-प्यसुवर्णः सुवर्णकः ।
दुष्प्राप्यसदलंकार-**धनपालार्थ**नायकः ॥ १७ ॥ **अनुष्टुप्** ॥

## 卐 परागाभिधविवृतिमङ्गलाचरणटिप्पनिका 卐

### कान्तापक्षेऽयं विशेषः—

अलंकारा हारादयः, पदे पादौ, प्रसन्ना=प्रसन्नतायुक्ता, श्लेषा आलिङ्गनानि, स्वरो ध्वनिः, भावा हृदयगता-वस्थावेदका मानसविकाराः, स्वेदकम्पादयो व्यभिचारिभावा वा, रसः शृङ्गारादिः । वर्णो गौरादिः विलेपनमङ्गरागो गीत-क्रमो वा ॥१२॥

सर्वदारोचितचित्तवृत्तिः=सर्वेषां दाराणां नारीजनानामुचिता चित्तवृत्तिर्यस्य स तथा, पक्षे सर्वदा रोचिता चित्तवृत्ति-र्यस्य स तथा । अदारोचितचित्तवृत्तिः=न दारोचिता स्त्रीजनोचिता चित्तवृत्तिर्यस्य स तथा । सिद्धेषु=सिद्धभगवत्सु । सिद्धान्तसुचित्तवृत्तिः=सिद्धानामन्ते सुचित्तवृत्तिर्यस्य स तथा, पक्षे सिद्धान्तेषु आगमेषु चित्तवृत्तिर्यस्य स तथा ॥१३॥

अधामतया=अनगारतया साधुतयेत्यर्थः । सदर्पणः=दर्पणेनाभिमानेन आदर्शेन वा सहितः, पक्षे सतां सद्वस्तूनाम् अर्पणोऽर्पणहेतुः । दर्पणरिक्तकः=दर्पणेनाभिमानेनादर्शेन वा रिक्तको रहितः ॥१४॥

'**नेमि**' इत्यत्र 'न् ए म् इ' इति वर्णचतुष्टयं वर्तते तदाश्रित्य महिमागर्भिता कल्पना—

वर्णवर्गान्तवर्तिनौ=वर्णानां ब्राह्मणादीनां ये वर्गा विभागविशेषास्तदन्तवर्तिनौ, चाण्डालाद्यस्पृश्यकोटिं गतौ, पक्षे वर्णानां कादीनां ये वर्गाः "पञ्चको वर्गः" [ सिद्धहेम-१. १. १३ ] इत्युक्ताः पञ्चसंख्यापरिमाणा वर्णसमुदायाः, कवर्ग-चवर्गटवर्गतवर्गपवर्गरूपास्तदन्तवर्तिनौ, नकारं 'तथदधन' इत्येवंरूपे तवर्गे मकारं 'पफबभम' इत्येवंरूपे पवर्गेऽन्तवर्तिन-मित्यर्थः, गुणश्रिया=गुणेन श्रिया च, पक्षे व्याकरणकारकृतगुणसंज्ञकेन एकारेण नकारं लक्ष्मीवाचकेन इकारेण मकारम्, यद्वा मध्यस्थस्योभयत्र सम्बन्धाद् गुणस्य गुणसंज्ञकस्य एकारस्य शोभया, आयोज्य स्पर्शभावं=स्पृश्यतां पक्षे व्याकरणकार-कृतस्पर्शसंज्ञां ये नयन्ति, लोके हि वर्णवर्गान्तवर्तिनश्चण्डालादयो न गुणश्रीयुक्ता भवन्ति नवा स्पृश्यतां प्राप्नुवन्ति, अत्र कथमिदम् जातमित्याश्चर्ये सति समाधानहेतुमाह-निजनामालम्बिनौ=निजम् आत्मीयं 'नेमि' इति यन्नाम तदव-लम्बिनौ यतस्ततस्तादृक् स्वरूपं जातमिति भावः । ननु लक्ष्मीवाचक ईकारो दृश्यते न तु इकार इति कामवाचकस्य इकारस्य कथं लक्ष्मीवाचकत्वमिति चेदुच्यते, ईश्च इश्च एतत्समाहारः 'इ' इति पूर्वं निष्पाद्यम्, ततो द्वयोः स्थाने निष्पन्न आदेशोऽन्यतरव्यपदेशभागिति न्यायेन इकारस्यापि लक्ष्मीवाचकत्वम्, यद्वा गुणस्य श्रिया इति द्वितीयपक्ष आदरणीयः ॥१५-१६॥

परागः=परागाभिधा विवृतिः, मकरन्दश्च, उपलक्षणत्वान्मकरन्दसहितकुसुमादिः । तत्र विवृतिपक्षे-न परागः=परागा-भिधविवृतिभिन्न इति विरोधस्तदुद्धारे चाकारविश्लेषेण अनपरागः=न अपगतो रागो यस्मात् स तथा, असुवर्णः= काञ्चनभिन्नोऽपि, सुवर्णकः=काञ्चनमय इति विरोधस्तत्परिहारे नञः कुत्सार्थत्वात् कुत्सितं सुवर्णं काञ्चनं येन सोऽसुवर्णः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 卐 विजयलावण्यसुरिविरचिता परागाभिधा विवृतिः 卐

वैबुधागम आमोद-दायी सम्यक् प्रसाध्यते ।
**लावण्येन**सुरेणाथ मया मूलमधुग्रहः ॥ १८ ॥ **अनुष्टुप्** ॥ युग्मम् ॥

सुवर्णादपि मनोज्ञ इत्यर्थः, एवं सुष्ठु वर्णो वर्णनं यत्र स तथा, दुष्प्राप्य०=दुष्प्राप्याः सदलंकारा शब्दशोभका अनुप्रासादयः शब्दार्थशोभका उपमादमो वा यत्र तादृशो यो धनपालस्य धनपालाभिधकवेः अर्थस्तिलकमञ्जरीगतोऽर्थस्तस्य नायको ज्ञापकः, वैबुधागमः=वैबुधस्य पाण्डित्यस्यागमो येन स तथा, आमोददायी=आमोदो हर्षस्तद्दायी, प्रसाध्यते=क्रियते, लावण्येन=लावण्यसूरिनाम्ना सुरेण=बुधेन, मया=अस्मच्छब्दवाच्येन, मूलमधुग्रहः=मूलं मूलग्रन्थो मधुग्रहं स्वादुज्ञानं येन स तथा।

**मकरन्दपक्षे**-

परागः=मकरन्दोऽपि, न परागः=न मकरन्द इति विरोधस्तत्परिहारे-अकारप्रश्लेषेण अनपरागः=न अपगतो रागो यस्य स तथा, असुवर्णोऽपि-न विद्यन्ते शोभना वर्णाः शुक्लादयो यत्र तादृशोऽपि, सुवर्णकः=शोभना वर्णाः शुक्लादयो यत्र स तथा इति विरोधः, तत्परिहारे असुवर्णः=कुत्सितं सुवर्ण काञ्चनं येन स तथा। वर्णोत्कर्षेण सुवर्णादपि मनोज्ञ इत्यर्थः । दुष्प्राप्य०=दुष्प्राप्या सदलंकारा उत्तमहारादयो यत्र तादृशो यो धनपालार्थः कुबेरवैभवस्तस्य नायकः प्रापकः, कल्पवृक्षस्य कल्पितदातृत्वाद्, वैबुधागमः=विबुधागमस्य देववृक्षस्य कल्पतरोरयमिति तथा, कल्पवृक्षसम्बन्धीत्यर्थः । आमोददायी=आमोदः परिमलस्तद्दायी, प्रसाध्यते=अलंक्रियते। लावण्येनसुरेण=लावण्यस्य सौन्दर्यस्य इनः स्वामी यः सुरस्तेन, मया=मा लक्ष्मीस्तया हेतुभूतया । आमूलमधुग्रहः=मूलपर्यन्तमभिव्याप्य मधुग्रहा मधुपा यत्र स तथा ॥१७-१८॥

॥ इति विवृतिमङ्गलाचरणटिप्पनिका ॥

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

इह जगति सर्वेऽपि शिष्टा अभीष्टे वस्तुनि प्रवर्तमाना अभीष्टदेवतानमस्कारपूर्वकं प्रवर्तन्त इति मत्वा परमश्रावको धनपालकविः 'स वः पातु' इत्यादिश्लोकपञ्चकेनेष्टाभिमताधिकृतदेवतानां नमस्कारान् करोति । तत्राद्येन श्लोकद्वयेन जिनस्य चतुर्विंशतितीर्थकृताश्चेष्टदेवतानमस्कारोऽपरेण चाभिमतदेवताया नाभेयस्यैकेन चाधिकृतदेवताया सरस्वत्या इति । तत्र रागादिजेतृत्वादिसामान्यगुणेनेष्टदेवता गोत्रपारम्पर्यविघ्नविनाशकत्वादिगुणं चाश्रित्याभिमतदेवता शास्त्रकरणे च प्रवर्तमानस्य विशिष्टवागर्थप्रापकत्वेनाधिकृतत्वाद् अधिकृता देवता सरस्वती । तत्र तावद् आद्यं श्लोकद्वयं व्याख्यायते-**स जिनो** रागादिजेता देवः, **पातु** रक्षतु, **वो** युष्मान्, **य ईक्षते** [ पश्यति ] सामान्यरूपतया च जानाति, दर्शनज्ञानार्थत्वाद् ईक्षतेः । किं तत् ? **जगत्त्रयं** भुवनत्रयमधोमध्योर्ध्वलक्षणम्, चतुर्दशरज्ज्वात्मकं लोकमित्यर्थः, एतच्चोपलक्षणम्, तथाऽलोकमपि धर्मादिपदार्थशून्यमनन्तं पश्यति जानाति च । कीदृशं जगत्त्रयम् ? **व्याप्तं** युक्तम् । कैः ? **रूपैः** शरीरैः । कियद्भिः ? **अनन्तैः**, अनादित्वेन न पुनः पर्यवसानैः [ अपर्यवसानैः-अपर्यवसानत्वेन ] मुक्तानां शरीरपर्यवसानां नन्तरत्वादसम्भवात् ? [ मुक्तानां शरीरपर्यवसानेनानन्तत्वासम्भवात् ] । कस्य रूपैः ? **एकैकजन्तोरे**कस्यैकस्य जीवस्य, अनादित्वं रूपाणामनादौ संसारेऽनन्तशो जन्ममरणप्राप्तेः । पुनः कीदृशम् ? **कृत्स्नं** परिपूर्णं समग्रं नैकदेशम् । कथमीक्षते ? **प्रतिक्षणं** निरन्तरं न पुनरन्तरमस्तीति ॥१॥

## 卐 श्रीपद्मसागरविबुधरचिता टीका 卐

तत्र तावदशेषप्रत्यूहव्यूहोपशमनसमर्थाव्यर्थावितथार्थसर्वथामाङ्गल्यसूचाचतुरैरतिगहनगम्भीरोदारशब्दैराद्यपद्यावतारमारचयति-स व इति । व्याख्या०-स जिनो वः पात्विति तावदन्वयः । जिनस्तु रागादिसकलाभ्यन्तरारातिजेतृत्वाद्वीतरागापरपर्यायोऽर्हन्नेवाऽवगन्तव्यस्तदितरेषां हरिहरादिदेवानां रागादिविलसितानेकलक्षणदर्शनेन रागादिजेतृत्वाभावात् । ननु तच्छब्दस्य यच्छब्दसापेक्ष्यत्वेन स को जिन इत्यत आह-ईक्षते य इति, योऽर्हन् जगत्त्रयमीक्षते पश्यतीति सटङ्कः । ईक्षत, इत्यत्र भूतस्य भविष्यतो वाऽर्हतो ग्रन्थकर्तृसाक्षाद्बुद्धिस्थत्वेन वार्तमानिकनिर्देश इति । मा भूदस्मदावेरिवाऽ-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 卐 श्रीपद्मसागरविबुधरचिता टीका 卐

र्हतोऽपि देशेन जगत्त्रयज्ञानमित्याह–कथम्भूतं जगत्त्रयं ? कृत्स्नं समस्तं तत्तद्भूतभाविभवद्विचित्रपरिणामापन्नमित्यर्थः । अथ जगत्त्रयस्वरूपसूचनायाऽऽह–कथम्भूतं जगत्त्रयं ? व्याप्तं, कैः ? रूपैः स्वरूपैः पर्यायैरित्यर्थः । ननु पर्यायापरपर्यायाणां रूपाणां द्रव्यनिष्ठत्वेन किं तद्रव्यं ? यस्य रूपैर्व्याप्तं जगत्त्रयं विवक्षितमित्याह–कस्य ? एकैकजन्तोः–एकस्यैकस्याऽऽत्मन इत्यर्थः । एकैकेति पदद्वयमात्माऽद्वैतवादनिरसनाय सार्थकमिति । भावार्थस्त्वयं, जगत्त्रयेऽपि तत्स्थानं नाऽस्ति यत्र किलैकस्यैकस्याऽऽत्मनो देवत्वमनुष्यत्वनारकत्वतिर्यक्त्वाद्यनन्तै रूपैरुत्पत्तिस्थितिच्युतयो न संभवेयुः । सर्वत्राऽपि ह्यनन्तैर्देवत्वादिरूपैरुत्पन्नः स्थितो मृतोऽपि वाऽऽत्मेति सिद्धमेकैकजन्तोरनन्तै रूपैर्व्याप्तं जगत्त्रयमिति । ननु यथैकैकस्याऽऽत्मनोऽनन्तरूपव्याप्तं जगत्त्रयं तथाऽपरद्रव्यपञ्चकस्याऽप्यनन्तरूपैर्व्याप्तमेवाऽस्ति, तत्कथं न द्रव्यपञ्चकानन्तपर्यायव्याप्तत्वं जगत्त्रयस्य निर्दिष्टमिति चेत् ? सत्यं । आत्मपर्यायाणामुपलक्षणत्वेनाऽपरद्रव्यपञ्चकपर्यायैस्तथाविधैरेव व्याप्तमेव जगत्त्रयमितिविवक्षितं बोध्यं, तथा च कात्स्न्येंन जगत्त्रयज्ञानं जिनस्यैवेति तात्पर्यम् । ननु जिनस्यैतज्ज्ञानं साद्यन्तत्वेन कदाचिद् भविष्यति कदाचिन्नेत्याशङ्क्याऽऽह–कथं ? प्रतिक्षणं क्षणं क्षणं प्रति प्रतिक्षणं प्रतिसमयमित्यर्थः । ज्ञानोत्पत्तिक्षणादेवाऽऽरभ्य क्षणं क्षणं प्रति तथाविधं जगत्त्रयमीक्षते यो जिन इति । एतेन जिनज्ञानस्य साद्यनन्तत्वं सूचितमिति प्रथमवृत्तार्थः ॥१॥

## 卐 विजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

इह हि विश्वविश्वविश्वसितविश्ववस्तुविस्तारविश्वसितसकलकालालोलनिरवशेषविशेषविविक्तविवेचनविदुरैर्दूरदर्शिभिर्दुरितदूरीकरणाय प्रारिप्सितप्रबन्धसमाप्तिप्राप्तिप्रतिपत्तये च प्रतिपादितं मङ्गलमवगालिताखिलविघ्नविधायिकं शास्त्रशिशिक्षिषुशिष्यशिक्षेक्षणार्थं प्रबन्धबन्धनबद्धं नाकिनरेननमस्यनीरागेननमस्काराकारं करोति कुलीनकविकुलालङ्कारो धनपालाभिधो धीरः ॥

**स वः पातु** इत्यादि । य एकैकजन्तोरनन्तै रूपैर्व्याप्तं कृत्स्नं जगत्त्रयं प्रतिक्षणमीक्षते स जिनो वः पातु इत्यन्वयः । **यः**=तत्पदप्रतिपाद्यतया वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मविशिष्टोऽनिर्धारितनामा कश्चित् । **एकैकजन्तोः**=प्रत्येकं प्राणिनः । **अनन्तैः**=अनन्तसंख्यकैः, यद्यपि तथाविधस्वाभाव्यात् सामग्रीसद्भावेऽपि मोक्षानर्हाणामभव्यानां भव्यानां च मोक्षार्हत्वेऽपि सामग्रीवैकल्याद् मोक्षगमनाभावेन तद्रूपेषु अनन्तत्वमपर्यवसानत्वं सम्भवति तथापि मुक्तात्मनां शरीरावसानेन तद्रूपेष्वनन्तत्वं न सम्भवतीति प्रस्तुतेऽनन्तत्वमनादितया विज्ञेयम् । यद्वा अनन्तसंख्या जिनागमोदिता पारिभाषिकी ग्राह्या । **रूपैः**=यद्यपि रूपशब्द आकारेऽवयवरचनाविशेषे वर्तते तथाऽप्याकाराकारवतोरभेदात् शरीरैः, यद्वा **रूपैः**र्नाटकादिभिः, अनादौ संसारेऽनन्तशो जन्ममरणावाप्तेः प्रत्येकं प्राणिना यानि यानि शरीराणि गृहीतोज्झितानि गृहीतव्यानि वा, यद्वा विविधकर्मविपाकवशात् तत्तजन्मावस्थाद्यपेक्षया यानि यानि नाटकादीनि विहितानि विधातव्यानि वा. तैरितिभावः । "ग्रन्थावृत्तौ पशौ शब्दे, नाटकादिस्वभावयोः । रूपमाकारसौन्दर्ये, नाणकश्लोकयोरपि ॥ १ ॥" इति **शास्वतः** । **व्याप्तम्**=परम्परया परितः परिकलितम् । **कृत्स्नम्**=समग्रं नत्वेकदेशमेव । **जगत्त्रयम्**=स्वर्गमृत्युपातालरूपं त्रिभुवनम्, यद्वा जैनरीत्या ऊर्ध्वाधस्तिर्यग्लोकरूपं लोकमुपलक्षणत्वादलोकं च । **प्रतिक्षणं**=क्षणे क्षणे नत्वन्तरं कृत्वा, क्षणश्च सर्वज्ञप्रज्ञयाप्यविभाज्यः कालस्य सूक्ष्मतमभागः । **ईक्षते**=सामान्यरूपेण पश्यति विशेषरूपेण च जानातीत्यर्थः । एतादृशेक्षणस्य सर्वज्ञत्वाविनाभावित्वात् सर्वज्ञत्वमावेदितम् । सर्वज्ञताविसंवादिन उच्छृङ्खलास्तु "सूक्ष्मान्तरितदूरार्थाः प्रत्यक्षाः कस्यचिद्यथा । अनुमेयत्वतोऽग्न्यादि–रिति सर्वज्ञसंस्थितिः ॥ १ ॥ इत्याद्याप्तवचनैः शिक्षणीयाः । यत्तदोर्नित्यसम्बन्धादाह–स इति । **सः**=यत्पदप्रतिपाद्यतया वक्तृबुद्धिविषयतावच्छेदकत्वोपलक्षितधर्मविशिष्टः । **जिनः**=रागादिदुर्वारवैरिविजेता वीतरागो देवः । ननु सर्वसत्त्वानां संसक्तिसंगोपगमात् कथं स सङ्गतिमङ्गति ? इति चेच्छृणु "दृष्टो रागाद्यसद्भावः क्वचिदर्थे यथात्मनः । तथा सर्वत्र कस्यापि तद्भावे नास्ति बाधकम् ॥ १ ॥" । वदेद्वा वावदूको विद्यतां वीतरागः, अपि कथं स विद्यताम् ? इति चेदवधारय " रागोऽङ्गनासंगमनानुमेयो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

द्वेषो द्विषद्दारुणहेतुगम्यः । मोहः कुवृत्तागमदोषसाध्यो नो यस्य देवस्य स चैवमर्हन् ॥ १ ॥ " । **वः**=युष्मान् । **पातु**=रक्षतु । नन्वस्ति चेन्नीरागता तर्हि नैनं नेतुं शक्यते रक्षणकर्तृता रागरञ्जनतापत्तेरिति चेन्न भगवान् स्वयं नीरागोऽपि तथाविधस्वभावादेव चिन्तामण्यादिरिवोपासकजनानां रक्षणादिकं विधत्ते ।

अथ श्रीसिद्धहेमशब्दानुशासनानुसारेण शब्दसाधनिका—

'यजीं देवपूजासंगतिकरणदानेषु' इत्यतः "तनित्यजियजि०" [उणा०८९५] इति डत्प्रत्यये डकारस्येत्त्वाद् "डित्यन्त्य०" [२, १, १४] इत्यन्त्यस्वरादेर्लुकि 'यद्' इति ततः "नाम्नः०" [२, २, ३१] इतिप्रथमैकवचनसिप्रत्यये "आद्वेरः" [२, १, ४१] इति दकारस्याकारे "लुगस्या०" [२, १, ११३] इति पूर्वाकारस्य लोपे 'य' इतिजाते, सिप्रत्यये इकारेत्त्वादवशिष्टस्य सकारस्य "सो रुः" [२, १, ७२] इति रुः, तत्रोकारस्येत्त्वादवशिष्टस्य रकारस्य "रः पदान्ते०" [१, ३, ५३] इति विसर्गे **यः**, 'इंण्क् गतौ' इत्यतः "भीणशलि०" [उणा० २१] इति कप्रत्यये "नामिनो गु०" [४, ३, १] इति गुणे 'एक' इति, ततो वीप्सायां "वीप्सायाम्" [७, ४, ८०] इति द्विर्भावे "एदौत्०" [१, २, १२] इति संधौ च 'एकैक' इति, न तु एकश्च एकश्चेति वृत्तिरनभिधानात् तादृशार्थाविवक्षणाद् एकशेषप्रसक्तेश्च । 'जनैचि प्रादुर्भावे' इत्यतः "कृसि०" [उणा० ७७३] इति तुप्रत्यये 'जन्तु' इति, एकैकश्चासौ जन्तुश्चेति "पूर्वकालैक०" [३, १, ९०] इति समासे "एकैकजन्तु" इति, ततः "शेषे" [२, २, ८१] इति षष्ठ्येकवचनङस्प्रत्यये "ङित्यदिति" [१, ४, २३] इत्युकारस्थाने ओकारे "एदोद्भ्यां०" [१, ४, ३५] इति ङसः स्थाने रकारादेशे, तस्य च विसर्गे **एकैकजन्तोः** । 'अम शब्दभक्त्योः' इत्यतः 'अम गतौ' इत्यतो वा "दम्यमि०" [उणा० २००] इति तप्रत्यये "म्नां०" [१, ३, ३९] इति मकारस्य नकारे 'अन्त' इति, ततो न विद्यतेऽन्तो येषां तानीति "उष्ट्रमुखादयः [३, १, २३] इतिसमासे 'अनन्त' इति, ततः, "हेतुकर्तृ०" [२, २, ४४] इति तृतीयाबहुवचनस्य भिस्प्रत्ययः, तस्य "भिस ऐस्" [१, २, ४] इत्यैस्-आदेशे विसर्गे सन्धौ च **अनन्तैः** । 'रूपण् रूपक्रियायाम्' इत्यतः "अच्" [५, १, ४९] इत्यच्प्रत्यये चकारस्येत्त्वाद् 'रूप' इति जातम्, ततः प्राग्वत्तृतीयाबहुवचने **रूपैः** । व्याङ्पूर्वात् 'आप्लृंट् व्याप्तौ' इत्यतः "क्तक्तवतू" [५, १, १७४] इति क्ते प्रत्यये ककारस्येत्त्वात् 'व्याप्त' इति, ततः "कर्मणि" [२, २, ४०] इति द्वितीयैकवचनस्याम्प्रत्यये "समाना०" [१, ४, ४६] इतिपूर्वाकारस्य लोपे च **व्याप्तम्** । "कृतैंप् संवेष्टने' इत्यतः कृत्यते त्यज्यतेऽनेनेति "कृत्यशौभ्यां स्नक्" [उणादि-२९४] इति स्नक्प्रत्यये ककारस्य चेत्त्वात् 'कृत्स्न' इति, ततः प्राग्वद् द्वितीयैकवचनाम्प्रत्यये **कृत्स्नम्** । 'गम्लृं गतौ' इत्यतः "दिद्युद्द०" [५, २, ८२] इति क्विप्प्रत्यये 'जगत्' इति 'उभत् पूरणे' इत्यतः "उभेर्द्वत्रौ च" [उणा० ६१५] इति सूत्रेणेप्रत्यये त्रादेशे च 'त्रि' इति । त्रयोऽवयवा यस्येति "द्वित्रिभ्यां०" [७, १, १५२] इत्ययट्प्रत्यये "अवर्णे०" [७, ४, ६८] इतीकारलोपे टकारस्येत्त्वात् 'त्रय' इति, जगतां त्रयमिति "षष्ठ्ययत्ना०" [३, १, ७६] इति समासे 'जगत्त्रय' इति ततः प्राग्वद् द्वितीयैकवचने **जगत्त्रयम्** । 'प्रथिष् प्रख्याने' इत्यतः "प्रथतेर्लुक् च" [उणा० ६४७] इति तिप्रत्यये थलोपे च 'प्रति' इति, 'क्षणू क्षिणूयी हिंसायाम्' इत्यतः "अच्" [५, १, ४९] इत्यच्प्रत्यये चकारस्येत्त्वात् 'क्षण' इति क्षणं क्षणं प्रतीति "योग्यतावीप्सार्थानतिवृत्तिसादृश्ये" [३, १, ४०] इत्यव्ययीभावसमासे 'प्रतिक्षण' इति, ततः "कालाध्वनोर्व्याप्तौ" [२, २, ४२] इतिद्वितीयैकवचनस्य "अमव्ययीभावस्या०" [३, ३, २,] इत्यमादेशे पूर्वाकारलोपे च **प्रतिक्षणम्** । 'ईक्षि दर्शने च' इत्यतः "सति" [५, २, १९] इति वर्तमानासंज्ञकप्रत्ययाष्टादशकप्रसङ्गेऽपि "इङितः०" [३, ३, २२] इत्यात्मनेपदसंज्ञकवर्तमानाप्रत्ययनवकप्रसङ्गस्तत्रापि "त्रीणि०" [३, ३, १७] इति प्रथमत्रिकप्रसङ्गेऽपि "एकद्वि०" [३, ३, १८] इति प्रथमस्तेप्रत्ययो भवति,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**प्राज्यप्रभावः प्रभवो धर्मस्यास्तरजस्तमाः ।**
**ददतां निर्वृतात्मान आद्योऽन्येऽपि मुदं जिनाः ॥२॥ [ मविपुलावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**ददतां**=ददातु, दद दानेऽस्य पञ्चम्यात्मनेपदैकवचने तामि रूपम्, को ? **जिनो** वचनपरिणामेन सम्बन्धः । कीदृशो ? **निर्वृतात्मा** मुक्तस्वरूपो रागादिरहित इत्यर्थः । पुनः किंनामा ? **आद्य** ऋषभनाथः । कां ददतां ? **मुदं** धर्मादि-प्रकाशत्वेन हर्षम् । केषां ? **नो**ऽस्माकम्, न केवलमाद्यो जिनो**ऽन्येऽपि जिना ददतां**=प्रयच्छन्तु, डुदाञ् दानेऽस्य पञ्चमीपरस्मैपदबहुवचने अन्तामि रूपम् । तेऽपि कीदृशा ? **निर्वृत्तात्मानो** मुक्तस्वरूपाः । कां ? मुदम् । केषां ? **वो** युष्माकम् । किंभूत आद्यः ? किंभूताश्चान्ये जिना अजितादिवर्द्धमानान्ताः ? **प्राज्यप्रभावः** प्रचुरानुभावः **प्राज्यप्रभाः** प्रचुरतेजसस्तथा । **प्रभवो** जनकः । कस्य ? **धर्मस्या**हिंसादिलक्षणस्य **प्रभवः** स्वामिनस्तथा । **अस्तरजस्तमा** अस्ते क्षिप्ते अपनीते रजस्तमसी बध्यमानबद्धे बद्धनिकाचिते वा कर्मणी येन स तथोक्तो**ऽस्तरजस्तमा** अस्तं रजः पापं यैस्ते तथोक्ता अतिशयेनास्तरजसोऽस्तरजस्तमाः प्रकर्षे तमादित्वात्तमप्रत्ययः । इत्येकवचनबहुवचनश्लेषः ॥ २ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

ततः 'ईक्ष्+ते' इति जाते "कर्तर्य०" [ ३, ४, ७१ ] इति शवि, शवयोरित्त्वादवशिष्टाकारमीलने च **ईक्षते** । 'तनूयी विस्तारे' इत्यतः " तनित्यजियजि०" [ उणा० ८९५ ] इति डत्प्रत्यये डकारस्येत्त्वाद् "डित्यन्त्य०" [ २, १, ११४ ] इत्यन्त्यस्वरादेर्लुकि 'तद्' इति, ततः प्रथमैकवचनसिप्रत्यये "आद्वेरः" [ २, १, ४१ ] इति दकारस्याकारे "लुग०" [२, १, १३३] इति पूर्वाकारस्य लोपे, "एतदश्च०" [ १, ३, ४६ ] इति सिप्रत्ययलोपे च **स** । 'जि ञि अभिभवे' इत्यतो जयति रागादीनभिभवतीति "जीण्शी०" [ उणा० २६१ ] इति नप्रत्यये 'जिन' इति, ततः प्रथमैकवचनसिप्रत्यये प्राग्वत् विसर्गतामापन्ने **जिनः** । 'युषः सौत्रः सेवायाम्' इत्यतः "युष्यसिभ्यां क्मद्" [ उणा० ८९९ ] इति क्मत्प्रत्यये ककारस्येत्त्वात् 'युष्मद्' इति, ततः "कर्मणि" [ २, २, ४० ] इति द्वितीयाबहुवचनस्य शस् प्रत्ययः, ततः "पदाद्०" [ २, १, २१ ] इत्युभयस्थाने वस्आदेशे सकारस्य प्राग्वत् विसर्गे च **वः** । 'पांक् रक्षणे' इत्यतः "विधिनिमन्त्रणा०" [ ५, ४, २८ ] इति तुव्प्रत्ययः, वकारस्येत्त्वात् **पातु** । इत्येवमग्रेऽपि प्रतिपदं शब्दसाधनिकाऽवसेया ग्रन्थगौरवभयादत्र न वक्ष्यते ।

इदं मविपुलाख्यं विषमवृत्तम्, तल्लक्षणन्तु "तुर्यान्नतभरम्सास्तद्विपुला" [ इतिच्छन्दोऽनुशासने ] तदर्थस्तु- 'ओजे विपरीतादिः' इत्यत ओज इत्यनुवर्तते । ओजयोः पादयोस्तुर्यादक्षरात् परं यगणं 'अनुष्टुभि नाद्यात् स्नौ तुर्याद्यो वक्त्रम्' इत्यत्रोक्तं बाधित्वा नतभरमसाश्चेद् भवन्ति तदा तद्विपुला, युजोः षड्भ्यो ल इति तु स्थितमेव । ओज इत्यत्र जातिपक्षो व्यक्तिपक्षश्च तत्र व्यक्तिपक्षे मविपुलोदाहरणमिदम्—

र य भ ज ल र म ज ल

अदूरवर्तिनीं सिद्धिं राजन् विगणयात्मनः । उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥ १ ॥ मविपुला ।
प्रस्तुते च—

त य य ज ल र म म ज ल

स वः पातु जिनः कृत्स्न--मीक्षते यः प्रतिक्षणम् । रूपैरनन्तैरेकैक--जन्तोर्व्याप्तं जगत्त्रयम् ॥ १ ॥ मविपुला ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 卐 श्रीपद्मसागरविबुधरचिता व्याख्या 卐

अथ भूतभविष्यदिहत्याऽपरक्षेत्रीयानन्तजिनसाधारणस्तवनं विधायाऽस्यामवसर्पिण्यां प्रथमोपकारित्वेन सर्वसम्मतस्याऽऽदिनाथस्याऽपरेषामप्यजितादिजिनानामाराध्यत्वाविशेषादन्यजिनपदगृहीतानामेकवचनबहुवचनसाम्यव्युत्पत्त्या स्तुतिमाधातुमाह–**प्राज्यप्रभा** इति । व्याख्या० **नोऽस्माकमाद्यो जिनः** प्रथमतीर्थकृद् वृषभनामा **मुदं** हर्षं **ददतामिति** पञ्चम्यात्मनेपदैकवचनान्तत्वेन दद्यात्वित्यर्थः । अथाऽस्य जिनस्य निष्प्रभावत्वेन कथं कविमार्गितहर्षदायित्वं स्यादित्याशङ्कामपाकर्तुमाह–कथंभूतोऽयं जिनः, **प्राज्यप्रभावः** प्राज्यः प्रभूतः प्रभावो माहात्म्यं यस्य स तथेति । अथाऽस्य व्याघ्रादेरिव प्राज्यप्रभावत्वेऽपि धर्मजनकत्वं न भविष्यतीत्याशङ्कायामाह–कथभूतोऽयं जिनो **धर्मस्य प्रभवः** प्रकर्षेण प्रथमतीर्थप्रवर्तकत्वाद्भव उत्पत्तिर्यस्मात्स तथेति । अथ धर्मोत्पादकत्वेऽपि शम्भोरिवाऽस्य रजस्तमोमयत्वं भविष्यतीति शङ्कामपाकर्तुमाह, **अस्तरजस्तमा** इति, रजस्तमसी तावद् गुणौ तौ च तत्तत्फलजनकत्वेन परमरागद्वेषवतः शम्भोरेव भवतो न तु वीतरागस्याऽस्य जिनस्य तत्फलजनकत्वाभावात्तेन अस्ते क्षयं प्रापिते रजस्तमसी येन स तथेति । यद्वा रजः पापं तदेव तमोऽन्धकारमस्तं रजस्तमो येन स तथेति । अथैवंविधोऽप्यसौ भवावस्थ एव भविष्यतीत्याशङ्कां निरस्यन्नाह–कथंभूतोऽयं जिनो **निर्वृतात्मा,** निर्वृतो निर्वाणं प्राप्त आत्मा यस्य स तथेति, एतेनाऽस्य परमेश्वरस्याऽप्यवस्थाद्वयं सूचितं भवति, तथाहि–भवावस्था मुक्तावस्था च, भवावस्थाऽपि द्विधा, गार्हस्थ्यावस्था दीक्षावस्था च, दीक्षावस्थाऽपि द्विधा छाद्मस्थ्यावस्था कैवल्यावस्था च, तत्र कैवल्यावस्थायां समुत्पन्नपरमज्ञानस्याऽपि समूलघातिकर्मक्षयेऽप्यवशिष्टकर्मसद्भावान्न निर्वृतात्मत्वं तेषामपि क्षये च निर्वृतात्मत्वं भगवतः सिद्धमिति । अथ बहुवचनान्तविशेषणविशेष्यक्रियाभिरेतस्यैव काव्यस्य प्रथमं स्तुतप्रथमजिनादपरजिनस्तवनसूचनचतुरो द्वितीयार्थ उपदर्श्यते, **अन्येऽप्यजितादयो जिना वो** युष्माकं **मुदं ददतामिति** पञ्चम्यात्मनेपदबहुवचनान्तप्रयोगाद्ददत्वित्यर्थः । किंविशिष्टास्ते जिनाः **प्राज्यप्रभाः** प्राज्या प्रभा कान्तिर्येषां ते तथा । अथाऽऽदर्शादीनामपि प्राज्यैव प्रभाऽस्ति तेनैतेषां किमाधिक्यमायातमित्याशङ्क्याह–कथंभूता जिनाः **प्रभवः** स्वामिनो योगक्षेमकारित्वान्नाथा इति यावत् । कस्य ? **धर्मस्य** पुण्यस्य, अथ द्वितीयविशेषणेन प्रथमविशेषणस्य दार्ढ्यं दर्शयति, यत एवैते धर्मस्य प्रभवः, तत एवैते कथंभूता **अस्तरजस्तमा** अतिशयेन रजो रजस्तमं घनं पापमित्यर्थः, तमप्प्रत्ययविधानादस्तं रजस्तमं यैस्ते तथेति । पुनः कथंभूतास्ते **निर्वृतात्मानो** निर्वृतः सिद्ध आत्मा येषां ते निर्वृतात्मान इति द्वितीयकाव्यस्याऽर्धद्वयम् ॥ २ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

अथैकवचनबहुवचनश्लेषेण चतुर्विंशतेर्जिनानां नमस्कारमाह–'**प्राज्यप्रभावः**' इत्यादि । प्राज्यप्रभावो धर्मस्य प्रभवोऽस्तरजस्तमा निर्वृतात्मा आद्यो जिना [ जिनः ] नो मुदं ददतामित्याद्यजिनपक्षेऽन्वयः, अन्यजिनपक्षे तु–प्राज्यप्रभा धर्मस्य प्रभवोऽस्तरजस्तमा निर्वृतात्मनोऽन्येऽपि जिना वो मुदं ददतामित्यन्वयः । **तत्राद्यजिनपक्षे–प्राज्यप्रभावः**=प्राज्यः प्रचुरः प्रभावस्तेजः शक्तिर्वा यस्य स तथा "प्रभावस्तेजसि शक्तौ" इत्यनेकार्थसंग्रहः । **धर्मस्य**=अहिंसादिलक्षणस्य । **प्रभवः**=कारणम्, उपदेशादिना जनक इत्यर्थः । "प्रभवो जन्मकारणे" इत्यनेकार्थसंग्रहः । **अस्तरजस्तमाः**=अस्ते नाशं गते रजस्तमसी रजोगुणतमोगुणौ यस्य स तथा, सत्त्वगुणावर्जनात् सत्त्वगुणान्वित इत्यर्थः । एतेन परमात्मनि ये निर्गुणत्वं स्वीकुर्वन्ति तन्मतमपास्तम् । सत्त्वादिगुणलक्षणं चेदम्–"सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः । गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥१॥" इति सांख्यतत्त्वकौमुदी । यद्वा अस्ते क्षिप्तेऽपनीते रजस्तमसी रजस्तमस्सदृशे बध्यमानबद्धे बद्धनिकाचिते वा कर्मणी येन स तथा । **निर्वृतात्मा**=निर्वृतः शिवं गत आत्मा यस्य स तथा । "......अथ निर्वृतिः । मोक्षे मृत्यौ सुखे सौस्थे......।" इत्यनेकार्थसंग्रहः । **आद्यः**=प्रथमः । **जिनाः**=अर्थवशाद् वचनविपरिणामेन जिन इतिसंस्कारः । तदर्थस्तु रागादिजेता देवः, ऋषभदेवनामा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**दिशतु विरतिलाभानन्तरं पार्श्वसर्प-न्नमिविनमिकृपाणोत्संगदृश्याङ्गलक्ष्मीः ।**
**त्रिजगदपगतापत् कर्तुमात्तान्यरूप-द्वय इव भगवान् वः सम्पदं नाभिसूनुः ॥३॥ [मालिनी]॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

तथाऽपरस्य श्लोकद्वयस्य कियत्पदव्याख्या क्रियते-**विरतिलाभः** सर्वसावद्ययोगनिवृत्तिप्राप्तिः । **पार्श्वसर्पन्नमिविनमिकृपाणोत्संगदृश्याङ्गलक्ष्मीः** पार्श्वयोरुभयपक्षयोः सर्पन्तौ चलन्तौ नमिविनम्यो राजपुत्रयोः कृपाणौ खड्गौ तयोरुत्संगे मध्ये दृश्ये दर्शनयोग्ये अङ्गलक्ष्म्यौ शरीरशोभे मूर्त्तिलक्षणे यस्य स तथोक्तोऽत्र च बहुव्रीहौ समासे नदीलक्षणः को न भवति, तत्रैकवचनान्तस्यैव लक्ष्मीशब्दस्य कविधानाद् । एतेन भगवतो रूपत्रयं जातमिति दर्शितम्, एतदुत्प्रेक्षते कविः-**आत्तान्यरूपद्वय इव** गृहीतापरमूर्त्तिद्वितय इव, किं कर्तुं ? **त्रिजग**त्त्रिभुवनमपगतापन्निवृत्तविपत्तिकं कर्तुम्, तच्च शरीरत्रयेण सुखेनैवापायरहितं क्रियते रक्षणात् [ **स्वपदं** ] स्वं पदमात्मीयं स्थानं मुक्तिमित्यर्थः, **संपदं** स्वर्गापवर्गसमृद्धिम् ॥ ३ ॥

## 卐 श्रीपद्मसागरविबुधरचिता व्याख्या 卐

अथ सकलजिनानां प्राथम्याद्बहुजनसंमतदेवत्वाच्च सकलाभीष्टार्थसाधनसमर्थत्वेन पुनरादीश्वरं स्तौति **दिशत्वि**ति । व्याख्या० **वो** युष्माकं **नाभिसूनु**र्वृषभो भगवान् **सम्पदं दिशत्विति** तावदन्वयः । अथैतस्य भगवतः सम्पद्दानमापन्निराकरणसमर्थत्वे सति संभवतीति विशेषणद्वारेतद्दर्शयति कथंभूतो भगवान्, **आत्तान्यरूपद्वय** आत्तं गृहीतमधिकाराद्र्थं इति न्यायाद्धात्वर्थानामनेकत्वाच्च स्वमूर्त्यपेक्षयाऽन्यद्रूपद्वयं येन स तथेति, इवोत्प्रेक्षायाम्, त्रिरूपधारी बभूवेति तात्पर्यम् । ननु भगवतः स्वमूर्त्यपेक्षयाऽपररूपद्वयकरणे किमिति प्रयोजनमित्याशङ्क्याऽऽह-किं **कर्तुं** विधातुं, किं **त्रिजगत्** त्रयाणां जगतां समाहारस्त्रिजगत्, कथंभूत**मपगतापत्** अपगताऽऽपदापत्तिर्यस्य तत्तथेति, विपद्वन्ध्यं त्रिजगत् कर्तुमित्यर्थः । एकेनैकेन रूपेणैकस्यैकस्य भुवनस्याऽऽपदुद्धारसंभवात् । अथ किं तत्स्वरूपान्यरूपद्वयमित्याशङ्क्य विशेषणद्वारैतद्दर्शयति, कथंभूतो भगवान्, **विरतिलाभानन्तरं पार्श्वसर्पन्नमिविनमिकृपाणोत्संगदृश्याङ्गलक्ष्मीः** । विरतिश्चारित्रं तस्य लाभः प्राप्तिर्विरतिलाभस्तदनन्तरं तदनु, चारित्रे गृहीते सतीत्यर्थः । पार्श्वे समीपे सर्पन्तौ गच्छन्तौ यौ नमिविनमी कच्छमहाकच्छसुतौ भगवत्पालितपुत्रौ तयोर्यौ कृपाणौ खड्गौ, गृहीतखड्गौ हि नमिविनमी भगवत्पार्श्वे सपर्यापरौ परिभ्रमत इति श्रुतेस्तयोरुत्संगेन साचिव्येन दृश्या दर्शनीयाऽङ्गलक्ष्मीर्देहश्रीर्यस्य स तथा, अयं भावार्थः, पार्श्वे सर्पद्भ्यां नमिविनमिभ्यां गृहीतखड्गद्वयमिषेणाऽतिभास्वरकान्तिमत्तया भगवतैव रूपद्वयं विहितमिति, एकं च रूपं भागवतं वास्तवमेवेति रूपत्रयं सुप्रतीतमिति तृतीयकाव्यार्थः ॥ ३ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

प्रथमतीर्थंकर इत्यर्थः । **नः**=अस्मभ्यम् । **मुदं**=धर्मप्रकाशकत्वेन हर्षम् । **ददतां**=यच्छतु, 'ददि दाने' इत्यस्य पञ्चम्येकवचने रूपम् । **अथान्यजिनपक्षे-प्राज्यप्रभाः**=प्राज्या प्रचुरा प्रभा येषां ते तथा । **धर्मस्य**=अहिंसादिलक्षणस्य । **प्रभवः**=स्वामिनः, प्रभुशब्दस्य बहुवचनम् । **अस्तरजस्तमाः**=अस्तौ रजस्तमौ रजोगुणतमोगुणौ यद्वा प्रागुक्तकर्मविशेषौ येषां ते तथा, तमशब्दोऽकारान्तोऽप्यस्ति, यदुक्तं शब्दस्तोममहानिधौ तम-पु० ताम्यति तम-अच् । तमोगुणे, मतान्तरे राहौ च । तमालवृक्षे च । रात्रौ स्त्री । अन्धकारे पादाग्रे च न० । इति । यद्वा अस्तं रजो रजस्सदृशं पापं येषां तेऽस्तरजसः, अतिशयेनास्तरजस इति अस्तरजस्तमाः, प्रकृष्टार्थे तमप्प्रत्ययः । **निर्वृतात्मानः**=निर्वृतिं गतो मोक्षं सुखं सौस्थं वा प्राप्त आत्मा येषां ते तथा । **अन्येऽपि**=न केवलमाद्य एव अपि तु तद्व्यतिरिक्ता अपि । **जिनाः**=रागादिविजेतारो देवाः, अजितादिवर्द्धमानान्तास्त्रयोविंशतिस्तीर्थंकरा इत्यर्थः । **वः**=युष्मभ्यम् । **मुदं**=धर्मप्रकाशकत्वेन हर्षम् । **ददतां**=यच्छन्तु, 'डुदांञ् दाने' इत्यस्य पञ्चमीबहुवचने रूपम् । इदं मविपुलाख्यं विषमवृत्तम्, तल्लक्षणं तु प्रथमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

अस्मिन् किलावसर्पिणीकाले प्रथमोपकारित्वाद् आदिनाथस्य नमस्कारमाह-**दिशतु विरती**त्यादि । विरतिलाभानन्तरं पार्श्वसर्पन्नमिविनमिकृपाणोत्संगदृश्याङ्गलक्ष्मीस्त्रिजगद् अपगतापत् कर्तुमात्तान्यरूपद्वय इव भगवान् नाभिसूनुर्वः सम्पदं दिशत्वित्यन्वयः । **विरतिलाभानन्तरं**=विरतेः सम्यग्ज्ञानपूर्वकसर्वसावद्ययोगनिवृत्तिरूपाया दीक्षाया यो लाभः प्राप्तिः स्वीकार इति यावत्, तस्माद् अनन्तरमव्यवहितोत्तरकालम् । **पार्श्वसर्पन्नमिविनमिकृपाणोत्संगदृश्याङ्गलक्ष्मीः**=पार्श्वयोरुभयोः पक्षयोः सर्पन्तौ चलन्तौ यौ नमिविनमी नमिविनमिनामानौ पुत्रत्वेन पालितौ स्वपौत्रौ तयोर्यौ कृपाणौ खड्गौ तयोरुत्संगे मध्ये दृश्ये दर्शनीये अङ्गलक्ष्म्यौ शरीरशोभे मूर्त्तिलक्षणे यस्य स तथा । अत्र लक्ष्मीशब्दान्तबहुव्रीहेः "पुमनडुन्नौपयोलक्ष्म्या एकत्वे" [ ७, ३, १४३ ] इति समासान्तः कच् प्रत्ययो न भवति, उक्तसूत्रे एकवचनान्तस्य लक्ष्मीशब्दस्य ग्रहणात् प्रस्तुते तु द्विवचनान्तत्वात् । एतेन विशेषणेन भगवतो रूपत्रयं जातमिति दर्शितम् । एतदुत्प्रेक्षते कविः-**आत्तान्यरूपद्वय इव**=आत्तं गृहीतमन्यद् अपरं रूपद्वयं शरीरद्वयं येन स तथेव । किं कर्तुम् ? **त्रिजगत्**=त्रिभुवनम् । **अपगतापत्**=अपगता दूरीभूता नष्टा वा आपद् आपत्तिर्यस्य तादृशम्, **कर्तुं**=विधातुम् । भुवनस्य त्रयत्वाद् शरीरस्यापि त्रये सति सुखेनैवापत्तेर्दूरीकरणं भवेदित्यर्थः । **भगवान्**=भगो ज्ञानादिरस्यास्तीति भगवान्, "भगोऽर्कज्ञानमाहात्म्ययशोवैराग्यमुक्तिषु । रूपवीर्यप्रयत्नेच्छाश्रीधर्मैश्वर्ययोनिषु ॥१॥" इति वचनाद् अनुपमज्ञानादिगुणकलितः परमात्मा । **नाभिसूनुः**=श्रीनाभिनरेन्द्रनन्दन ऋषभनाथ इत्यर्थः । **सम्पदं**=सम्यग् अनन्तसुखनिधानत्वेन शोभनं पदं मोक्षरूपं स्थानम्, यद्वा सम्पद् स्वर्गापवर्गादिका सम्पत्तिः ताम्, '**स्वपदम्**' इति पाठे तु स्वमात्मीयं पदं स्थानं मुक्तिमित्यर्थः । **वः**=युष्मभ्यम् । **दिशतु**=ददातु ॥ अत्रायं सम्प्रदायः-

एकदा भगवतो वृषभनरेन्द्रस्य नमिविनमिनामानौ नन्दननन्दनौ नगरान्तरमनाखिष्टाम्, इतश्च भगवान् वृषभनरेन्द्रश्चिन्तयामास, यदुत, असारोऽयं संसारः, इमे भोगा भोगभाजां भोगाभा भीमा भालितमात्राः सुदृशा, स्पृष्टाश्चाचिरं चित्तविचित्ततां तन्वाना अन्ते विषमविषमादधाना कटुफलम्, नास्ति च च्युतिप्रसूतिभ्यां सहचरतैषाम्, इमेऽमेयजन्ममालायां मिलितास्तथापि केऽपि न सहायाताः, केषाञ्चिदपि न निष्पन्ना स्मृतिः सत्त्वानाम्, एवमेतद्भवभवानामपि भावना भाव्या । कथमेतदर्थं निरर्थकं मनुष्यत्वं कर्तव्यं सुकृतिभिः । समित्संदोहैः समीरसख इव कीलालालिभिः कीलालालिरिव विषयैस्तृष्णास्तृप्तिं नाभ्युपयन्ति कदाचन । स्वजना अपि निशि शाखिशाखाशायिनः शकुनय इवासादितसंगाः स्वावासनिबन्धनबन्धनविघटनाद् विविक्ताः सन्तो दैवानुसारेण यथोचितमध्वानमध्यारोक्ष्यन्ति । धर्ममधारयमाणः प्राणी चारघट्टघटिकाघटनया भ्रमितोऽमितवारमपारे भवकूपारे । धर्म एवाशरणशरणम्, धर्मादेव भाविनी भविनां भवभिदा, स च प्रवज्याप्रधान इति ध्यात्वा तनुजेभ्यो राज्यदायं दत्त्वा प्रतिपद्य च प्रव्रज्यां वसुधायां विजहार । प्रत्यायातौ च तौ नमिविनमी राज्यदायार्थं यत्र भगवान् कायोत्सर्गमुद्रया स्थितस्तत्र गत्वा कण्टकादीनपास्योद्घाटितं कृपाणमारच्य प्रत्येकं प्रभुपार्श्वे सेवार्थं समुपस्थितौ । इदं वृत्तमवधिज्ञानेनावबुध्य विबुधाधिपतिना विद्याविद्याधरधराप्रभृति वितीर्णमिति ।

इदं मालिनी नाम वृत्तम् । तल्लक्षणं तु 'नौ म्यौ यो मालिनी' [ ननमयया, जैरिति वर्तते, जैः=अष्टभिश्चेद् यतिः ] इतिच्छन्दोऽनुशासने ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ध्वानेनाऽमृतवर्षिणा श्रवणयोरायोजनं भ्राम्यता,
भिन्दाना युगपद् विभिन्नविषयं मोहं हृदि प्राणिनाम् ।
आद्ये धर्मकथाविधौ जिनपतेराद्यस्य वाणी नृणां,
वृन्दैरुद्यदपूर्वविस्मयरसैराकर्णिता पातु वः ॥४॥ [ शार्दूलविक्रीडितम् ]॥

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**मोहमत्र** ज्ञानं संशयविपर्ययरूपम्, **विभिन्नविषयम**नेकार्थसंबन्धिनम् । क्व ? **हृदि** मनसि मनोगतमित्यर्थः । केषां ? **प्राणिनां** देवनरतिरश्चाम् । **भिन्दाना** विदारयन्ती । कथं ? **युगपदे**ककालम् । का ? **वाणी** भारती । क्वाद्ये **धर्मकथाविधौ** प्रथमे धर्मकथने समवसरणव्यवस्थितस्योत्पन्नकेवलज्ञानस्य ॥ ४ ॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथाऽस्य भगवतो वाणीगुणं वर्णयितुमाह-**ध्वानेने**ति । व्याख्या० अस्य [ आद्यस्य ] जिनपते**र्वाणी वो** युष्मान् **पातु** रक्षतु, अथ वाणीफलं तु श्रवणेनैव स्यादित्याशङ्क्याऽऽह-कथंभूता वाणी **आकर्णिता** श्रुता, कै**र्नृणां** मनुष्याणां **वृन्दैः** समूहैः, किंलक्षणै**रुद्यदपूर्वविस्मयरसैः**, उद्यन्तौ दीप्तावपूर्वौ पूर्वं कचिदप्यननुभूतौ विस्मय आश्चर्यं रसः शान्तादिको यैस्ते तथा तैः । अथ वाणीश्रवणात् किं फलं भवतीत्येतद्दर्शयति,-किं कुर्वाणा वाणी **भिन्दाना** भेदं विनाशं कुर्वाणा भिन्दाना, कं **मोहं** मूढताम्, क्व **प्राणिनां हृदि** जन्तूनां हृदये, जन्तुहृदयस्थमोहभेदकरणमाह-केन कृत्वा **ध्वानेन** शब्देन, अथ शब्दस्यैव स्वरूपमाह-किंलक्षणेन ध्वानेना**ऽमृतवर्षिणा**ऽमृतममृतप्रायं माधुर्यं वर्षतीत्यमृतवर्षी तेनाऽमृतवर्षिणा, क्व **श्रवणयोः** कर्णयोः, श्रोतॄणां कर्णयोर्मध्येऽमृतप्लाविणेत्यर्थः । अथाऽस्य शब्दस्य शक्तिविशेषणमाह-किं कुर्वता शब्देना**ऽऽयोजनं भ्राम्यता,** योजनमामर्यादीकृत्य पर्यटता, योजनगामित्वाद्भगवच्छब्दस्येति । ननु समस्तानामपि जिनपतीनां स्वस्वतीर्थप्रवर्तकत्वेनाऽऽद्यत्वमेवाऽस्ति, तथा चाऽस्याऽऽद्यस्य जिनपतेरित्युक्ते को विशेष इत्याशङ्क्याऽऽह-क्वाऽऽद्यत्वमस्या**ऽऽद्ये** कर्मविधौ प्रथमसकलकर्मारम्भे भगवत एव मुख्यत्वेन कर्तृत्वादाद्यत्वमिति चतुर्थकाव्यार्थः ॥ ४ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

**ध्वानेने**त्यादि । 'आद्यस्य जिनपतेर्वाणी वः पातु' इत्यन्वयः । **आद्यस्य**=प्रथमस्य, **जिनपतेः**=जिनेश्वरस्य तीर्थंकरस्येति यावत्, वृषभदेवस्येत्यर्थः, तस्य चतुर्विंशतौ तीर्थंकरेषु प्रथमत्वात् । **वाणी**=भारती । **वः**=युष्मान्, **पातु**=रक्षतु । किंविशिष्टा वाणीत्याकाङ्क्षायां 'ध्वानेन मोहं भिन्दाना' इत्यन्वयः, **ध्वानेन**=ध्वनिना **मोहम्**=अज्ञान-संशयविपर्ययरूपं रागद्वेषादिरूपं वा, **भिन्दाना**=नाशयन्ती । कीदृशेन ध्वानेनेत्याकाङ्क्षायां 'श्रवणयोरमृतवर्षिणा आयोजनं भ्राम्यता चेत्यन्वयः । **श्रवणयोः**=कर्णयोः, **अमृतवर्षिणा**=अमृतवृष्टिं कुर्वता, अत्यन्तमधुरेणेत्यर्थः, **आयोजनं**=योजनं योजनमितक्षेत्रमभिव्याप्येत्यायोजनम्, क्रोशचतुष्टयरूपयोजनमितक्षेत्रसर्वभागेष्वित्यर्थः । **भ्राम्यता**=प्रसरता । कथम्भूतं मोहमित्याह-**विभिन्नविषयं**=कञ्चनकामिन्यादिविविधवस्तुसम्बन्धिनम्, कुत्र स्थितमित्याह-प्राणिनां हृदि, **प्राणिनां**=देवनरतिरश्चाम्, **हृदि**=मनसि, स्थितमिति शेषः । कया रीत्या भिन्दानेत्याह-**युगपद्**=एककालम्, मोहस्य तदाश्रयप्राणिनां चानेकविधत्वेऽपि वागतिशयविशेषान्न तत्र कालक्रमापेक्षा; इदमुक्तं भवति-तीर्थंकरस्य भगवत एकरूपापि अर्द्धमागधीभाषा प्रचुरपुण्यजनितातिशयबलाद् वारिदमुक्तवारिवदाश्रयानुरूपतया परिणमते, यदुक्तम्-" देवा दैवीं नरा नारीं शबराश्चापि शाबरीम् । तिर्यञ्चोऽपि तैरश्चीं मेनिरे भगवद्गिरम् ॥१॥ " नह्येवंविधभुवनाद्भुतातिशयमन्तरेणानेकप्राणिनां विभिन्नविषयो मोहो युगपच्छेत्तुं शक्यः । पुनः कथम्भूता वाणीत्याकांक्षायां 'नृणामुद्यदपूर्वविस्मयरसैर्वृन्दैराकर्णिता' इत्यन्वयः । **नृणां**=मनुजानाम्, " नुर्वा " [ १, ४, ४८ ] इति दीर्घविकल्पनाद् ह्रस्वत्वम् । नृमात्रस्योपादानं तेषां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव्याज्जगन्ति पुरुषोत्तमनाभिसूते-
देवस्य वक्त्रकमलोदरमावसन्त्याः।
धौतेव दन्तकिरणप्रकरेण मूर्त्ति-
र्देव्या गिरामधिपतेः शरदिन्दुगौरी ॥५॥ [वसन्ततिलकावृत्तम्] ॥

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

पञ्चमश्लोकव्याख्या क्रियते-**अव्याद्** रक्षतु का? **मूर्त्तिस्**तनुः कस्याः? **गिरामधिपतेर्देव्याः** सरस्वत्याः। कीदृशी? **शरदिन्दुगौरी** शरच्चन्द्रधवला, उत्प्रेक्षते कवि**र्धौतेव** प्रक्षालितेव। केन? **दन्तकिरणप्रकरेण** दशनानां सुसंघातेन। किं कुर्वन्त्या? **आवसन्त्या**स्तिष्ठन्त्याः। किं त**द्वक्त्रकमलोदरं** मुखपद्ममध्यम्, कर्मत्वं तु उपान्वध्याङ्वस [२-२-२१] इति मुखकमलमध्ये इत्यर्थः। कस्य? **देवस्य** किमभिधानस्य? **पुरुषोत्तमनाभिसूतेः** पुरुषोत्तमश्चासौ नाभिसूतिश्च नाभेयश्च स तथोक्तस्तस्य ऋषभस्येत्यर्थः। लोकभाषया पुरुषोत्तमो विष्णुस्तस्य नाभिर्नाभिपद्मं तात्स्थ्यात् तस्मिन् सूतिरुत्पत्तिर्यस्य स तथोक्तस्तस्य ब्रह्मण इत्यर्थः। कानि रक्षतु? **जगन्ति** जगत्त्रयस्थितप्राणिनः ॥५॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ भगवन्मुखकमलमावसन्त्याः सरस्वत्या मूर्त्तिस्तुतिमाह-**अव्याज्जगन्ती**ति। व्याख्या० **गिरामधिपतेर्**वाचां स्वामिन्या **देव्याः सरस्वत्या** 'मूर्त्तिमत्करणकायमूर्त्तय' इत्यभिधानचिन्तामणिवचनान्**मूर्त्तिः** शरीरं **जगन्ति** भुवना**न्यव्यात्पा**यात्। अथाऽस्या मूर्त्तिः कीदृशी, **शरदिन्दुगौरी** शरच्चन्द्रशुभ्रेत्यर्थः, मूर्त्तेः शुभ्रत्वं तु प्रायो धौतत्वे सति संभवतीत्याह-मूर्त्तिः कथंभूता, इवोत्प्रेक्ष्यते **धौता,** केन **दन्तकिरणप्रकरेण,** भगवद्दन्तसम्बन्धिमरीचिजालेन धौतत्वाच्छुभ्रा सारस्वती मूर्त्तिरित्यर्थः। ननु सारस्वत्या मूर्त्तेर्देवसम्बन्धित्वेन सुधादिना तावद्धौतत्वं संभवति, कथं पुनरादीश्वरसम्बन्धिदन्तकिरणप्रकरेणेत्यत आह-किंलक्षणाया देव्या **वक्त्रकमलोदरमावसन्त्या** वक्त्रमेव मुखमेव कमलं पद्मं तस्योदरं मध्यं तदाश्रित्याऽऽवसन्त्या वसतिं कुर्वाणाया इत्यर्थः। कस्येदं वक्त्रकमलमित्याशङ्क्याऽऽह-**देवस्य** स्वामिनः किंलक्षणस्य **पुरुषोत्तमनाभिसूतेः,** पुरुषाणां मध्ये कुलकरत्वेनोत्तमः पुरुषोत्तमः स चाऽसौ नाभिरिति नाभिकुलकरस्तस्मात्सूतिरुत्पत्तिर्यस्य स तथा तस्य, **देवस्य** ऋषभस्वामिन इत्यर्थः। अयमस्य कवेरभिप्राय आदीश्वरसम्बन्धिमुखकमले किल सरस्वतीमूर्त्तिर्वसति, सा च प्रत्यासन्नत्वाद्दन्तकिरणप्रकरेण चन्द्रज्योत्स्नाशीतलेन धौता संभवतीति तात्पर्यम्, यद्यपि मुखे साक्षान्मूर्त्तिमत्याः सरस्वत्या वासो न संभवति तथापि यथार्थवक्तृत्वलक्षणतत्फलदर्शनेनाऽनुमापित एवाऽर्थोऽयं मन्तव्यः। अथ सरस्वत्याः कविसमये ब्रह्मपुत्रीत्वेन सम्मतत्वात्तन्निरूपणार्थं द्वितीयार्थमाह-पुरुषोत्तमः कृष्णस्तस्य नाभितः सूतिरुत्पत्तिर्यस्य स तथेत्येवंविधो ब्रह्मा, तस्य लोके देवत्वेन प्रसिद्धत्वाद्देवस्य वक्त्रकमलं मुखकमलमुदरं जठरं तद्द्वयं समाहृतं यथा स्यात्तथाऽऽवसन्त्याः स्थितिं कुर्वन्त्या इत्यर्थः। अयं भावार्थः पितृस्नेहेन स्वोत्सङ्गे स्थितायाः सरस्वत्याः पुत्रीस्नेहेन चुम्बनार्थं हि किल ब्रह्मा स्वमुखं स्वोदरासन्नं करोति तदानीं तदन्तःस्थाया अस्या मूर्त्तिर्ब्रह्मणो दन्तकिरणप्रकरेण धौतेव भवतीति द्वितीयार्थ इति वृत्तार्थः ॥ ५ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

विस्मयरसातिरेकज्ञापनार्थम्, यद्यपि देवानां तिरश्चां च विस्मरसो भवति तथापि स न तदानीन्तनमनुजानां विस्मयरससदृशः, यतो देवैरन्यतीर्थंकरतोऽपि विस्मयरसः प्रागनुभूतो भवति, तिर्यञ्चश्च मन्दचैतन्या भवन्ति। **उद्यदपूर्वविस्मयरसैः**=उद्यन् उच्छलन् अपूर्वः प्रागननुभूतोऽनुत्तरो वा विस्मयरसः 'इयं वाणी किंवा सुधाप्रवाहः' इत्याद्याश्चर्यरसो येषां ते तथा। **वृन्दैः**=समूहैः। **आकर्णिता**=श्रुता। कदाकर्णितेत्याह-आद्ये धर्मकथाविधौ, **आद्ये**=केवलज्ञानो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

त्पत्त्यनन्तरं प्रथमे, **धर्मकथाविधौ**=धर्मस्य दानशीलतपोभावनारूपस्य साधुधर्मगृहिधर्मादिभेदस्य वा या कथा कथनं तस्या विधौ कार्ये, अत्रापि 'आद्यस्य जिनपतेः' इत्यस्य योजना कार्या । तथा चायमर्थः-लब्धकेवलज्ञानेन भगवता श्रीवृषभदेवेन समवसरणे उपविश्य या प्रथमधर्मदेशनायां भारती प्रवर्तिता, मनुजादिना चात्यन्ताश्चर्यरसपूर्वकं श्रुता सा पात्विति भावः । इदं शार्दूलविक्रीडितं वृत्तम्, तल्लक्षणन्तु-'अतिधृत्यां म्सौ ज्सौ तौ गः शार्दूलविक्रीडितं छैः' [ मसजसततगाः, छैरिति द्वादशभिर्यतिः ] इतिच्छन्दोऽनुशासने ॥४॥

**अव्यादिति** । गिरामधिपतेर्देव्या मूर्त्तिर्जगन्त्यव्यादित्यन्वयः । **गिरां**=वाणीनाम्, **अधिपतेः**=स्वामिन्याः, **देव्याः**=देवतायाः, सरस्वत्या इत्यर्थः, **मूर्त्तिः**=आकृतिः, **जगन्ति**=जगत्त्रयम्, त्रिभुवनगतप्राणिन इत्यर्थः, **अव्याद्**=रक्षतु । कथम्भूताया देव्या इत्याकाङ्क्षायां 'पुरुषोत्तमनाभिसूतेर्देवस्य वक्त्रकमलोदरमावसन्त्याः' इत्यन्वयः, **पुरुषोत्तमनाभिसूतेः**=पुरुषेषु उत्तमः पुरुषोत्तमः स चासौ नाभिश्च नाभिनामा राजा च पुरुषोत्तमनाभिः तस्मात् सूतिरुत्पत्तिर्यस्य स पुरुषोत्तमनाभिसूतिस्तस्य तथा । यद्वा पुरुषोत्तमश्चासौ नाभिसूतिश्च नाभिजन्मा च पुरुषोत्तमनाभिसूतिस्तस्य तथा, **देवस्य**=परमेश्वरस्य, नाभिनृपनन्दनस्य ऋषभदेवस्येत्यर्थः । यद्वा पुरुषोत्तमेषु उत्तमजनेष्वपि नाभिः प्रधाना सूतिरुत्पत्तिर्जन्म यस्य तस्य तथा, तीर्थंकरस्येत्यर्थः, यतस्तीर्थंकरजन्मनि त्रिभुवनव्यापी उद्योतः, षट्पञ्चाशतो दिक्कुमारीणां चतुष्षष्टेरिन्द्राणाञ्चागमनम्, मेरुशिखरेऽभिषेकः, इत्यादिकं भवति । "प्राण्यङ्गे क्षत्रिये नाभिः प्रधाने नृपतावपि" इति शाश्वतः । **वक्त्रकमलोदरं**=वक्त्रं वदनं तदेव प्रफुल्लतादिसाम्यात् कमलं तस्योदरं मध्यभागम्, "उपान्वध्याङ्वसः" [ २, २. २१ ] इत्यधिकरणस्य कर्मत्वविधानेन द्वितीया, अतोऽधिकरणार्थो बोध्यः, तथा च 'मुखकमलमध्यभागे' इत्यर्थो बोध्यः, **आवसन्त्याः**=निवासं कुर्वन्त्याः, सरस्वती नाम वाण्यधिष्ठात्री शरदिन्दुगौरदेहा देवी, तदधिष्ठिता वाण्यपि सरस्वतीशब्देनोच्यते, एवं तन्मूर्त्तिरपि द्वेधा भवति, एका करचरणादिमद्देहरूपा, अपरा वाणीसंदोहरूपा च, अस्मिन् पद्ये उभय्यपि समाश्रिता, 'आवसन्त्याः' इत्यत्र वाणीरूपा सरस्वती गृहीता, 'शरदिन्दुगौरी' इत्यत्र करचरणादिमद्देहरूपा सरस्वतीमूर्त्तिर्गृहीता, 'धौतेव' इत्यत्र वाणीसंदोहरूपा सरस्वतीमूर्तिर्गृहीता । कथम्भूता मूर्त्तिरित्याह-**शरदिन्दुगौरी**=शरद् आश्विनकार्तिकमासात्मक ऋतुः, तस्या य इन्दुश्चन्द्रस्तद्वद् गौरी धवला, आश्विनकार्तिकमासयोर्मध्ये रजोवृष्टिजलवृष्टिघनघटादिविरहेण स्वच्छे गगने चन्द्रोऽतीवधवलो दृश्यते तत्सादृश्यप्रतिपादनार्थं शरदुपादानम् । कथं शरदिन्दुगौरी जातेत्यत्रोत्प्रेक्षते दन्तकिरणप्रकरेण धौतेव, **दन्तकिरणप्रकरेण**=दन्तानां किरणप्रकरेण धवलकान्तिसमूहेन, **धौतेव**=प्रक्षालितेव, वाणीरूपमूर्त्या मुखान्निर्गमनसमये दन्तकिरणप्रवाहेण प्रक्षालनं जातमतः शरदिन्दुगौरी जातेति भावः । अत्र सरस्वतीदेहवाण्योरभेद आश्रितः । लौकिकैः सरस्वती ब्रह्मणः पुत्रीति प्रतिपन्नम्, तदनुकूलोऽर्थोऽयं बोध्यः । तथाहि । **पुरुषोत्तमनाभिसूतेः**=पुरुषोत्तमो लोकरूढ्या कृष्णस्तस्य नाभिः तात्स्थ्यात् तद्व्यपदेशेन नाभिगतं कमलं तत्र सूतिरुत्पत्तिर्यस्य स तथा तस्य, ब्रह्मण इत्यर्थः, लौकिकैः किल ब्रह्मण उत्पत्तिः कृष्णनाभिकमलादभ्युपगता, नन्वस्य ब्रह्मणो लौकिकैर्देवत्वमपि स्वीकृतं तत् किं न निर्दिश्यतेऽत आह-**देवस्य,** कीदृश्याः सरस्वत्या इत्याह-वक्त्रकमलोदरम् आवसन्त्याः, **वक्त्रकमलोदरं**=वक्त्रमेव कमलं वक्त्रकमलं तेन सन्निहितं वक्त्रकमलसन्निहितम्, वक्त्रकमलसन्निहितम् उदरं यस्मिन् कर्मणि तत् वक्त्रकमलोदरम्, मध्यमपदलोपी समासः, क्रियाविशेषणं च, तथा चायमर्थः, वक्त्रकमलसन्निहितमुदरं यथा स्यात्तथा आवसन्त्या पितृपुत्रीभावमर्यादया निवासं कुर्वन्त्याः । अयं भावः । सरस्वती पितृस्नेहेन ब्रह्मण उत्सङ्गे तिष्ठति, ब्रह्मा च पुत्रीस्नेहेन तन्मुखं चुम्बति, एतच्चुम्बनकाले ब्रह्मणो वदनकमलं स्वोदरसन्निहितं भवति, एवं मुखविकाशे धवलदन्तकिरणजालेन उत्सङ्गस्थितसरस्वतीदेहो धौतो भवति, एतदाह-दन्तकिरणप्रकरेण धौतेवेति, अतः कीदृशी जातेत्याह-शरदिन्दुगौरी शेषं स्पष्टम् ॥

इदं वसन्ततिलकावृत्तम् । तल्लक्षणं तु 'त्भौ जौ गौ वसन्ततिलका' [ तभजजगगाः ] इतिच्छन्दोऽनुशासने ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**रक्षन्तु स्खलितोपसर्गगलितप्रौढप्रतिज्ञाविधौ,**
**याति स्वाश्रयमर्जितांहसि सुरे निश्वस्य संचारिताः ।**
**आजानुक्षितिमध्यमग्नवपुषश्चक्राभिघातव्यथा-**
**मूर्छान्ते करुणाभराञ्चितपुटा वीरस्य वो दृष्टयः ॥६॥ [ शार्दूलविक्रीडितम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

अधुनाऽऽसन्नतीर्थोपकारकत्वाद्भगवतो वर्द्धमानस्येष्टाभिमतदेवस्यैव पुनर्नमस्कारमाह-**रक्षन्त्वि**त्यादि, **अर्जितांऽहसि** गृहीतपापे ॥ ६ ॥

## 卐 श्रीपद्मसागरविबुधरचिता व्याख्या 卐

अथैतच्छासनाधिपतित्वेन प्रत्यासन्नोपकारित्वाच्छ्रीमहावीरस्तुतिमाह-**रक्षन्तु स्खलित**० इति । व्याख्या० **वीरस्य** वर्धमानस्वामिनो **दृष्टयो** नेत्राणि बहुवचनं चाऽत्र समदर्शित्वेन पूज्यत्वाद्वो युष्मान् **रक्षन्तु** पान्तु । अथ दृष्टया भरणं करुणार्द्रत्वमुपदर्शयति, कथंभूता दृष्टयः **करुणाभराञ्चितपुटाः**, करुणाभरेण कृपाजालेनाऽञ्चितानि व्याप्तानि तन्मयं गतानि पुटानि यासां तास्तथा । अथ स्वसुहृदादौ सर्वेषामपि दृष्टिषु करुणार्द्रत्वं स्यादेव किमस्याधिक्यमित्याशङ्क्य परमवैरिणोऽप्युपरि भगवद्दृष्टीनां करुणार्द्रत्वं दर्शयति, दृष्टयः किंलक्षणाः **संचारिताः**, क्व **सुरे**, कथंभूते **अर्जितांहसि**, अतीवघोरोपसर्गकारित्वादर्जितमंहः पापं येन स तथा तस्मिन् । किं कृत्वा निःश्वस्य हा हाऽस्य परमपापकारिणः का गतिर्भाविनीति चिन्तया निःश्वासं मुक्त्वेत्यर्थः । नन्वनेन भगवति कीदृश उपसर्गः कृत इत्येतद्भगवद्विशेषणद्वारा दर्शयति, कथंभूतस्य वीरस्य, **आजानुक्षितिमध्यमग्नवपुषो** जानुपर्यन्तं भूमध्यमग्नदेहस्य । ननु कथमस्य परमवीर्यवतो भगवतस्त्वेतादृश्यवस्था जातेति सप्तम्यन्तविशेषणद्वारा दर्शयति-कस्मिन् सति भगवताऽस्मिन् सुरे दृष्टयः संचारिता-**श्चक्राभिघातव्यथामूर्च्छान्ते** सति, चक्रेणाऽभिघातो हननं तेन कृत्वा समुत्पन्ना या व्यथा ततः समायाता या मूर्च्छा तस्या अन्ते क्षये सतीति । अयं भावार्थः, एकदा किल शक्रेण स्वसुरपर्षदि घोरानुष्ठानपरस्य भगवतः समुदित-त्रिलोकीजनाक्षोभ्योऽयं भगवान् परसाहाय्यनिरपेक्षतया तपश्चरतीति प्रशंसायां कृतायामश्रद्दधताऽभव्येन देवाधमेनाऽनेन समागत्य घनकालं घोरतरविविधोपसर्गाश्चक्रिरे तथापि विशेषाद्भगवतोऽक्षोभ्यतां दृष्ट्वा "यदि त्वं निषेधको न स्यात्तदा-ऽहमेनमवश्यं तपस्तश्चालयामीति" शक्रपुरः कृतात्मीयप्रतिज्ञाध्वंसो मा भूदित्यतीव कोपाटोपपटुर्भगवच्छिरसि सहस्रलोह-भारमयं चक्रं दिव्यशक्त्याऽयं मुमोच, तदभिघातव्यथातो भगवतोऽपि मूर्च्छा समायाताऽनन्तरं च मूर्च्छाक्षये तस्मिन्नेव देवे परमकारुण्यवता भगवता सुप्रसन्ना दृष्टयः संचारिता इति रहस्यम् । अथाऽनेन सुरेण भगवतः किंचित्कृतं स्थाने गतं वेति मुग्धशङ्कानिराकरणार्थमाह-किं कुर्वति देवे **याति** गच्छति, कं **स्वाश्रयं** सुरलोकलक्षणम्, कीदृशः सन्नसौ सुरलोकं व्रजन्नभूदित्याशङ्कयाऽऽह-कथंभूते देवे **स्खलितोपसर्गगलितप्रौढप्रतिज्ञाविधौ**, स्खलिता अफला य उपसर्गास्तानुद्दिश्य भग्नोत्साहत्वेन गलिता भ्रष्टा प्रतिज्ञा यस्य स तथा तस्मिन् । एवंविधेऽपि देवे याति सति भगवतो करुणाभराञ्चितपुटाः सन्त्यः संचारिता दृष्टयो युष्मान् पान्त्विति वृत्तार्थः ॥ ६ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

वर्तमानशासनाधिपतितयाऽऽसन्नोपकारित्वाद् दृष्टिद्वारा महावीरदेवं स्तौति '**रक्षन्त्वि**'त्यादिना । 'वीरस्य दृष्टयो वो रक्षन्तु' इत्यन्वयः । **वीरस्य**=महावीराभिधानस्य चतुर्विंशतितमस्य तीर्थंकरस्य, **दृष्टयः**=लोचनानि, प्रशमरस-बाहुल्यादिना बहुत्वविवक्षया बहुवचनम्, तथा च प्रचुरप्रशमरसादियुक्तं लोचनयुगलमित्यर्थः । **वः**=युष्मान् **रक्षन्तु**= पान्तु । कथम्भूतस्य वीरस्येत्याह-**आजानुक्षितिमध्यमग्नवपुषः**=आ जानुभ्यामित्याजानु, जानुपर्यन्तमित्यर्थः, क्षिति-

३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रबन्धानामनध्यायः, सा वाग् जयति शुद्धया ।
यया प्रतिपदेवेन्दुः, कविः क्षीणोऽपि जीवति ॥७॥ [ पथ्यावृत्तम् ] ॥

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

वाच उत्कृष्ट[ता]माह– **सा वाग्**वाणी **जयत्**युत्कृष्टा वर्त्तते । **यया** वाचा **कविः**, कीदृशः ? **क्षीणोऽपि** जीनोऽपि, **जीवति** उच्छ्वसिति प्राप्तसिद्धिर्लोके भवति, यद्वा **जीवति** जीव इव बृहस्पतिरिवाचरति अयिलोपे (?) रूपं बृहस्पतीयत्यर्थः । कयेव कः ? **प्रतिपदेव** शुक्लपक्षप्रथमतिथ्येवेन्दुः, यथा चन्द्रः प्रतिपदा क्षीणोऽपि क्षयप्राप्तोऽपि जीवति । किंभूतया वाचा प्रतिपदा च ? **शुद्धया** निर्दोषया शुभ्रया च, कीदृशी वाक् प्रतिपच्च ? **अनध्यायो**ऽनध्ययन-हेतुत्वादपठनं तथाविधार्थालङ्कारायभावेनोद्वेगहेतुत्वात्, केषां ? **प्रबन्धानां** शास्त्राणाम्, प्रतिपद्यप्यनध्यायः शास्त्राणामध्ययनस्य निषेधाच्छास्त्रे ॥ ७ ॥

## 卐 श्रीपद्मसागरविबुधरचिता व्याख्या 卐

अथैवमविघ्नेनाऽऽरब्धग्रन्थपरिसमाप्त्यर्थं वृषभादिवर्धमानपर्यन्तजिनस्तवनलक्षणातिशयितमङ्गलमाधाय तावत्सकल-शास्त्रोपजीवकत्वेनाऽऽराध्यतमां वाचं स्तुवन्नाह–**प्रबन्धानामि**ति । व्याख्या० **सा वाग् जयती**त्यन्वयः । तस्याः प्रतिपत्तिथिसाम्येन स्वरूपमाह–कथंभूता वाक्, **अनध्यायो**ऽध्यायो नामाऽधिकारो, न अध्यायोऽनध्यायोऽनधिकार इत्यर्थः, केषां **प्रबन्धानां,** प्रकर्षेण बन्धानां विशिष्टबन्धानामनधिकारः । अयं भावः, नवशिक्षितकविकृतत्वेन यद्यपि विशिष्ट-बन्धाधिकारा काचिद्वाग् न भवत्यपि, तथापि सा वागग्रे वक्ष्यमाणगुणकारित्वेन श्लाघ्यैवेति, साऽपि वाग् जयतीत्यपेरध्या-हारपर एवाऽयं कवेरध्यवसायः, प्रतिपत्साम्यं तु, प्र प्रकृष्टो बन्धो रचना येषां तानि प्रकृष्टबन्धानि शास्त्राणि तेषामनध्यायः पाठा-भावाप्रतिपत्तिथिर्भवतीति सिद्धमेव । ननु प्रबन्धानामनध्यायत्वेन प्रतिपत्तिथिसमयाऽनया वाचा किं भवतीत्याशङ्कय यद्भवति तद्दर्शयति, **प्रतिपदेव यया वाचेन्दुरिव क्षीणोऽपि कविर्जीवत्य**भ्युदयवान् भवतीति, अयं भावः, यथा प्रतिपद्दिनमाहात्म्येनाऽस्तं गतोऽपि चन्द्रो भाव्युदयेन स जीव इवोच्छ्वसितो भवति तथा कविरपीत्यर्थः । अथ द्वितीयार्थो यथा वाचा **कविः** शुक्रोऽपि **जीवति** जीव इव बृहस्पतिरिवाऽऽचरत्युभयोरपि वक्तृत्वफलाविशेषात् । यद्वा **कविः** काव्यकारी **जीवति** जीव इवाऽऽचरतीति वृत्तार्थः ॥ ७ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

मध्ये भूमिमध्ये मग्नं चक्राभिघातेन प्रविष्टं वपुः शरीरं यस्य तस्य तथा, कथम्भूता दृष्टय इत्याह–**करुणाभराञ्चित-पुटाः**=करुणाया 'अरेरे ! परमपापकारिणोऽस्य देवस्य किं भावि' इति दयाया भरेण समुदायेनाञ्चिताः पूजिता उत्तम-तामापादिताः पुटाः कनीनिकाच्छादिकाः पुटाकारा त्वचो यासां तास्तथा । कदा ईदृश्यो दृष्टयो जाता इत्याह–**चक्रा-भिघातव्यथामूर्छान्ते**=चक्रेण कालचक्राभिधानेन देवक्षिप्तेन शस्त्रविशेषेण योऽभिघातः प्रहारस्तेन जाता या पीडा तया जनिता या मूर्छा तदन्ते, निरुक्तमूर्छापगमानन्तरमिति भावः, अत्र चक्राभिघातव्यथा इति विश्लिष्य दृष्टिष्वपि योज्यम् । पुनः कथम्भूता दृष्टय इत्याकाङ्क्षायां 'सुरे निश्वस्य संचारिता, इत्यन्वयः । **सुरे**=चक्रक्षेपकदेवे, **निश्वस्य**=निश्वासं मुक्त्वा, **संचारिताः**=गमिताः । कथम्भूते देवे ? **स्खलितोपसर्गगलितप्रौढप्रतिज्ञाविधौ**=स्खलितैः विफलीभूतै-रुपसर्गैरुपद्रवैर्गलितो नष्टः प्रौढप्रतिज्ञायाः 'वीरमहं चालयिष्यामि' इति महत्तरप्रतिज्ञाया विधिः कार्यं यस्य तस्मिंस्तथा । पुनः कीदृशे देवे ? **स्वाश्रयम्**=देवलोकलक्षणं स्वस्थानं प्रति, **याति**=गमनं कुर्वाणे, पुनः कीदृशे देवे ? **अर्जितां-हसि**=अर्जितानि संचितानि अंहांसि पापानि येन तस्मिंस्तथा । अत्रायं सम्प्रदायः–

पुरा किलैकदा देवसभायां निषण्णेन शचिपतिना श्रमणस्य भगवतो महावीरस्य घोरातिघोरतपोगुणसमुल्लसिताऽचला ध्यानधारा विलोकिता, तदनु देवानामग्रे 'श्रमणो भगवान् महावीरो देवगणैरपि ध्यानान्न चालयितुं शक्यः' इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वन्द्यास्ते कवयः काव्य-परमार्थविशारदाः ।**
**विचारयन्ति ये दोषान्, गुणांश्च गतमत्सराः ॥८॥ [ पथ्यावृत्तम् ] ॥**

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ स्वाधिकगुणवत्पुरुषवन्दनाद्याचारालोपेनैव स्वस्याऽतिशायिनी राढा भवतीति कृत्वा सत्कवीनां वन्द्यत्वमुपवर्णयति, **वन्द्यास्ते कवय इति** । व्याख्या० **ते कवयो वन्द्या** वन्दनीयाः सन्तीति, कथंभूताः **काव्यपरमार्थविशारदाः**, काव्यानां स्वपरकृतानां परमार्थस्तात्पर्यं तत्र विशारदा विचक्षणाः । एवंविधाश्च सन्तस्ते किं कुर्वन्तीत्याह–**ये गतमत्सराः** सन्तो **गुणान् दोषांश्च** विचारयन्ति, अरक्तद्विष्टतया दुष्टानि काव्यानि दुष्टतया सत्काव्यानि च सत्तया *विचारयन्तीति वृत्तार्थः ॥ ८ ॥*

## 卐 *श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः* 卐

महावीरदेवस्य निरुक्तध्यानाचलता वर्णिता च, एनामसहमानः कश्चित् संगमनामा सुराधमः 'वीरमहं चालयिष्यामि' इति प्रतिज्ञाय यत्र श्रमणो भगवान् महावीरो ध्यानमुद्रया स्थितस्तत्र गत्वा दारुणातिदारुणान् विविधान् उपसर्गान् चकार, एवं क्रियमाणेषूपसर्गेषु भगवन्तमचलितं विलोक्य दिव्यं कालचक्राभिधं महच्चक्रं जगद्बन्धोः प्रभोः शिरसि निपातितवान्, एतत्प्रहारेण जानुदघ्न्यां भूमौ भगवान् निमग्नो जातः, जाता च महती वेदना, दृष्टयोऽपि वेदनासंकुला बभूवुः, एवं सत्यपि भगवान्न चलितः, अथ विगलितप्रतिज्ञः स सुराधमो लज्जितः सन् देवलोकं गच्छति, अस्मिन्नवसरे भगवान् निश्वस्य नयनयुगलमुन्मील्य च गच्छन्तं तं पश्यति, पश्यंश्च भगवान् विचारयति–अहो ! मदन्तिकमागत्यानेन धर्मलेशोऽपि नासादि, प्रत्युत घोरं कर्म निबद्धं हा ! किमस्य भावीति, एतद्विचारणायां भगवतो नयनयुगलं करुणानीरप्लावितमभूदिति । इदं शार्दूलविक्रीडितं वृत्तम्, तल्लक्षणं तु 'अतिधृत्यां म्सौ ज्सौ तौ गः शार्दूलविक्रीडितं ठैः' [ मसजसततगाः, ठैरिति द्वादशभिर्यतिः ] इतिच्छन्दोऽनुशासने ॥६॥

इदानीं वाच उत्कर्षमाह–'**प्रबन्धानाम्**' इत्यादिना । सा वाग् जयतीत्यन्वयः । **सा**=यत्पदप्रतिपाद्यत्वेन वक्तृबुद्धिविषया । **वाग्**=वाणी । **जयति**=उत्कर्षेण वर्तते । कीदृशी वाणी ? इत्याकाङ्क्षायां प्रतिपत्साम्येनाह–प्रबन्धानामनध्यायः, तत्र वाणीपक्षे **प्रबन्धानां**=प्र प्रकृष्टा ये बन्धा अवरोधा गहनविषयप्रतिपादनासमर्थत्वादयस्तेषा**मनध्यायः**=अविषयः, सकलविषयप्रतिपादिकेत्यर्थः । यद्वा प्रकृष्टानां बन्धानां रचनानामनध्यायोऽविषयः । विशिष्टकाव्यरचनयापि यस्या यथास्थितं समग्रस्वरूपं वर्णयितुं न शक्यत इत्यर्थः, अवर्णनीयस्वरूपाऽत्युत्तमेतिफलितोऽर्थः । प्रतिपत्पक्षे तु **प्रबन्धानां**=शास्त्राणाम्, **अनध्यायः**=अनध्यायहेतुत्वादनध्यायः, प्रतिपदि लोके शास्त्राध्ययननिषेधात्, यदुक्तम्–"प्रतिपत्पाठलेशेन विद्या याति रसातलम्' एवं सीतावृत्तान्तं पृष्टेन हनूमता रामायाभिहितं "प्रतिपत्पाठशीलानां विद्येव तनुतां गता" इति । अनध्यायशब्दस्य वाणीविशेषणत्वेऽपि नियतलिङ्गत्वात् नपुंसकलिङ्गे निर्देशः । सा का ? यया=वाचा, कीदृश्या ? शुद्धया=दोषरहितया, प्रतिपदा=प्रतिपत्तिः प्रतिपत् तया, बुद्ध्येत्यर्थः, क्षीणोऽपि=हीनोऽपि, कविः=काव्यकारी, जीवति=उच्छ्वसिति लोके लब्धप्रतिष्ठो भवतीत्यर्थः, यद्वा जीवो बृहस्पतिः स इवाचरतीति जीवति बृहस्पतिसमानो भवतीत्यर्थः । 'जीवौ जन्तुबृहस्पती' इति शास्वतः । कयेव कः ? प्रतिपदेवेन्दुः प्रतिपदा=प्रतिपद्यते पक्षस्याद्यतया ज्ञायते इति प्रतिपत् पक्षप्रथमतिथिस्तयेव, कथम्भूतया ? यया शुद्धया=धवलया, शुक्लपक्षसत्कप्रथमतिथ्येत्यर्थः, "प्रतिपत् तिथिसंविदोः" इति शास्वतः । इन्दुः=चन्द्रः, कथम्भूतश्चन्द्रः ? क्षीणोऽपि=शुक्लप्रतिपदा विगलितकलोऽपि, किं करोति ? जीवति=उत्तरकालिकाधिकाधिककलारूपप्राणान् धारयति । इदं पथ्यावृत्तम्, तल्लक्षणं तु 'तद्युजोर्जः पथ्या' [ तद् 'अनुष्टुभि नाद्यात् स्नौ तुर्याद्यो वक्त्रम्' इत्युक्तं वक्त्रं युजोः पादयोस्तुर्यादक्षरात् परो जगणश्चेद् भवति तदा पथ्या ] इतिच्छन्दोऽनुशासने ॥७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वार्योऽनार्यः स निर्दोषे, यः काव्याध्वनि सर्पताम् ।
अग्रगामितया कुर्वन्, विघ्नमायाति सर्पताम् ॥९॥ [ पथ्यावृत्तम् ] ॥

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

अथ कविवर्णनं दुर्जननिन्दां चाह–**वन्द्या** इति सुगमम् । **सोऽनार्यो** दुर्जनो **वार्यो** निवारणीयो **य आयाति** प्राप्नोति, कां ? **सर्पता**महिताम्, किं ? **कुर्वन्** विदधानः, किं ? **विघ्न**मन्तरायं दोषोत्पादनलक्षणम्, कयाऽ**ग्रगामितया** पुरोगन्तृत्वेन, केषां ? **सर्पतां** प्रवर्त्तमानानाम्, क्व ? **काव्याध्वनि**=काव्यमार्गे, किंभूते ? **निर्दोषे** छन्दोऽलङ्कारादिदोषरहिते, सर्पोऽपि यदा मार्गे चोरादिदोषशून्ये गच्छतामग्रगामित्वेन विघ्नं करोति तदा वार्योऽ**नार्यः** क्रुद्धः ॥९॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ स्वाधिकपुरुषवन्दनाद्याचारपरेण हीनसंगपरिहारः कार्य इत्येतद्दर्शयति, **वार्योऽनार्यः स** इति, व्याख्या० **सोऽनार्यो** नीचो दूरदूरतरपरित्यागेन वार्यो निषेध्यस्तस्यासद्दोषाविष्कारकत्वेन वचनान्यपि नाऽऽकर्णनीयानीत्यर्थः । अथैतस्य परिहारनिदानस्वरूपमाह–**यो निर्दोषे** दोषरहिते **काव्याध्वनि** काव्यमार्गे रचनारूपे **सर्पतां** व्रजतां तत्कुर्वतामित्यर्थः, यत्तत्प्रलापितया **विघ्न**मन्तरायं कुर्वन्**अग्रगामितया** नीचपुरस्सरतया **सर्पतामायाति** प्राप्नोति, यथाहि निर्दोषे मार्गे गच्छतां पुंसामन्तरायातः सर्पः स्खलनारूपं विघ्नं करोति तथाऽयमपि तत्स्वभावतया सत्काव्यकरणादरवतां सतामसद्दोषाविष्कारकरत्वेनोत्साहभङ्गरूपं विघ्नं करोतीति वार्य एव हेय एवाऽनार्य इति वृत्तार्थः ॥ ९ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

सम्प्रति सत्कवीन् स्तौति '**वन्द्यास्ते**'इत्यादिना । ते कवयो वन्द्या इत्यन्वयः । **वन्द्याः**=वन्दितुं योग्याः। किंविशिष्टाः कवयः ? **काव्यपरमार्थविशारदाः**=काव्यानां 'काव्यं रसात्मकं वाक्यम्' इत्याद्युक्तलक्षणानां यः परमार्थो यथास्थितसमीचीनार्थस्तस्मिन् विशारदास्तद्विचारणे निपुणा इत्यर्थः, यद्वा काव्यमेव परमार्थः परोपकारस्तस्मिन् विशारदाः कुशला इति । ते के ? **ये विचारयन्ति,** कान् विचारयन्ति ? **गुणान्**=रसोत्कर्षहेतून् माधुर्यौजःप्रसादाख्यकाव्यगुणान्, **दोषांश्च**=च पुनः, दोषान्=वक्ष्यमाणकाव्यदोषान्, न केवलं गुणान् किन्तु दोषानपीत्यर्थः । कीदृशाः सन्तो विचारयन्ति ? **गतमत्सराः**=गतो नष्टो मत्सरोऽन्यशुभद्वेषो येषां ते तथा । इमे दोषाः–रसादेः स्वशब्दोक्तिः क्वचित्संचारिवर्जं दोषः । रसदोषा विभावानुभावक्लेशव्यक्तिः पुनःपुनर्दीप्त्यकाण्डप्रथाच्छेदाङ्गातिविस्ताराङ्ग्यननुसंधानानङ्गाभिधानप्रकृतिव्यत्ययाश्च, निरर्थकासाधुत्वे पदस्य, वाक्यदोषा विसन्धिन्यूनाधिकोक्तास्थानस्थपदपतत्प्रकर्षसमाप्तपुनरात्ताविसर्गहतवृत्तसंकीर्णगर्भितभग्नप्रक्रमानन्वितत्वानि, पदवाक्यदोषा अप्रयुक्ताश्लीलासमर्थानुचितार्थश्रुतिकटुक्लिष्टाविमृष्टविधेयांशविरुद्धबुद्धिकत्वानि । अर्थदोषाः कष्टापुष्टव्याहतग्राम्याश्लीलसाकाङ्क्षसंदिग्धाक्रमपुनरुक्तभिन्नसहचरविरुद्धव्यङ्ग्यप्रसिद्धिविद्याविरुद्धत्यक्तपुनरात्तपरिवृत्तनियमानियमविशेषसामान्यविध्यनुवादत्वानि । इदं पथ्यावृत्तम्, तल्लक्षणं तु "तद्युजोर्जः" [ तद् 'अनुष्टुभिनाद्यात्स्नौ तुर्याद्यो वक्त्रम्' इत्युक्तं वक्त्रं युजोः पादयोस्तुर्यादक्षरात् परो जगणश्चेद् भवति तदा पथ्या ] इतिच्छन्दोऽनुशासने ॥८॥

अथ दुर्जनपरिहारं दर्शयति '**वार्योऽनार्य**'इत्यादिना । 'सोऽनार्यो वार्यः' इत्यन्वयः, **सः, अनार्यः**=दुर्जनः, **वार्यः**=निवारणीयः, दूरतः परिहरणीयः । स कः ? **यः सर्पतां**=सर्पत्वमहित्वम्, **आयाति**=प्राप्नोति, सर्पसमानो भवतीत्यर्थः । किं कुर्वन् ? **विघ्नम्**–उपद्रवमलीकदोषोद्भावनलक्षणम्, **कुर्वन्**=विदधानः, कया रीत्या ? **अग्रगामितया**=पुरोगन्तृत्वेन, केषाम् ? निर्दोषे काव्याध्वनि सर्पताम्, **निर्दोषे**=छन्दोऽलंकारादिसत्कदोषरहिते, **काव्याध्वनि**=काव्यमेवाध्वा नानातत्त्वपिपासुजनपथिकैः समाश्रितत्वात् पन्थास्तत्र, **सर्पताम्**=सर्पन्ति गच्छन्तीति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**शेषे सेवाविशेषं ये, न जानन्ति द्विजिह्वताम् ।**
**यान्तो हीनकुलाः किं ते, न लज्जन्ते मनीषिणाम् ? ॥१०॥ [ पथ्यावृत्तम् ] ॥**

## विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम्

**शे** तालव्यशकारे **षे** मूर्धन्यषकारे **से** दन्त्यसकारे **वा** समुच्चये **विशेषं** भेदं **ये** नरा न **जानन्ति** न बुध्यन्ते **ते किं न लज्जन्ते** लज्जितव्यमेव तैर्भवति, केषां ? **मनीषिणां** विदुषाम्, किं कुर्वन्तो ? **यान्तो** गच्छन्तः, कां ? **द्विजिह्वतां** दुर्जनतामग्रे पृष्ठतो गुणदोषग्राहित्वात्, कीदृशा ? **हीनकुला** नीचगोत्रा इत्येकोऽर्थः । अपरश्च **शेषे** नागराजे **सेवाविशेषं** विशिष्टाराधनं **ये न जानन्ति,** अहीनामीनः स्वामी नागराजस्तस्य कुलं गोत्रं येषां ते तथोक्ता नागराजकुलजातास्ते **किं न लज्जन्ते** ? लज्जन्त एव मनीषिणाम्, किं कुर्वन्तो ? **यान्तः,** कां ? **द्विजिह्वतां** सर्पताम्, अवश्यमेव ये नागराजकुले जातास्ते नागराजसेवां जानन्ति, यद्वा **ही** विस्मये, **ते नकुलाः किं न लज्जन्ते** लज्जन्त एव, केषां ? **मनीषिणां** बुद्धिमताम्, किं कुर्वन्तो ? **यान्तः,** कां ? **द्विजिह्वतां** सर्पताम्, वयं सर्पा इति भणन्तः ॥१०॥

## श्रीमत्पद्मसागरविबुधरचिता व्याख्या

अथैतादृशस्वभाववतां पदे पदे लज्जैव कर्तुं युक्तेत्येतद्दर्शयति—**शेषे सदा** इति, व्याख्या० **ते मनीषिणः** पण्डितम्मन्याः **किं न लज्जन्ते** लज्जावन्तः किं न भवन्त्यपि तु तथाविधे स्थाने निर्लज्जा अपि लज्जां प्राप्नुवन्तीत्यर्थः । **के ते** मनीषिण इत्याह—ये सर्वस्याऽपि विश्वस्य स्वस्वभावतुल्यतया पश्यन्तः **शेषे** स्वस्मादितरस्मिन् सत्पुरुषे **सदा** निरन्तरं **विशेषं** सदाचरणादिगुणाधिक्यं **न जानन्ति** न विदन्ति । ननु कथं नैते तद्विशेषं जानन्तीत्याह—किं **कुर्वन्तस्ते यान्तः** प्राप्नुवन्तः कां **द्विजिह्वतां** पिशुनतां, तादृशा हि न कस्याऽपि गुणं जानन्तीत्यर्थः । अथ तादृशा भवन्तस्ते लोके कीदृशं व्यपदेशं प्राप्नुवन्तीति दर्शयति, **हीनकुला** इति व्यक्तम् । अत एव ते प्रस्तावे स्वलक्षणजनिततापेन लज्जन्त एवेति । अथ द्वितीयं व्यङ्ग्यार्थमाह—**ये शेषे** शेषनागे **द्विजिह्वतां सर्पतां** 'गत्यर्था ज्ञानार्था' इति वचनाद्यान्तो विदन्तो यथैते सर्पास्तथाऽयमपि सर्प एवेति ज्ञानवन्तो वसुन्धराधारित्वाहिविशेषं न जानन्त्यपरसर्पेष्विव शेषेऽप्याचरन्ति । ते च क इत्याह—**हीने**ति हीति निश्चये खेदे वा ते नकुला किं न लज्जन्त इति योज्यम् । किंविशिष्टा नकुला **मनीषिण** इति, नकुल्यौषध्यादाने मनीषा बुद्धिरस्त्येषां ते तथेति वृत्तार्थः ॥१०॥

## श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः

सर्पन्तस्तेषाम्, गच्छतामित्यर्थः, काव्यरूपमार्गे प्रवर्तमानानां जनानामिति फलितोऽर्थः । अहिरपि यदा चौरादिरूपदोषरहिते मार्गे गच्छतामग्रगामितया तिरोगच्छन् विघ्नं=अपशकुनलक्षणमुपद्रवं करोति तदाऽनार्यः क्रुद्धो वार्यः । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते दर्शितम् ॥९॥

अथ दुर्जनदुर्दशां दर्शयति—**शेषेसेवाविशेष**मित्यादिना 'ये शे षे से वा विशेषं न जानन्ति ते हीनकुलाः किं न लज्जन्ते' इत्यन्वयः । **ये शे**=तालव्यशकारे, **षे**=मूर्धन्यषकारे, **से**=दन्त्यसकारे, **वा**=च, **विशेषं**=तालव्यमूर्धन्यदन्त्यरूपं भेदम्, **न जानन्ति**=नावबुध्यन्ते, **ते, हीनकुलाः**=अधमकुला दुर्जनाः, **किं न लज्जन्ते**=अर्थादवश्यं तैर्लज्जितव्यमिति काकुः । यद्वा—**शेषे**=स्वातिरिक्ते सज्जने **सेवाविशेषं**=विशिष्टसेवागुणम्, अन्यत् समम् । कीदृशाः सन्तः ? द्विजिह्वतां यान्तः, **द्विजिह्वतां**—द्वे जिह्वे कथनप्रवृत्ते रसने येषां ते द्विजिह्वास्तेषां भावो द्विजिह्वता तां तथा, रसनायुगलमित्यर्थः । **यान्तः**=गच्छन्तः । अयं भावः—दुर्जना हि प्रत्यक्षे गुणोच्चारणप्रवृत्तां जिह्वां परोक्षे दोषोच्चारणप्रवृत्तां च जिह्वां धारयन्ति, प्रत्यक्षे गुणवाचिनः परोक्षे दोषवाचिनश्चेत्यर्थः, यद्वा पूर्वमन्यवदनप्रवृत्तां पश्चात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**स्वादुतां मधुना नीताः, पशूनामपि मानसम् ।**
**मदयन्ति न यद्वाचः, किं तेऽपि कवयो भुवि ? ॥११॥ [ पथ्यावृत्तम् ] ॥**

### 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**किं तेऽपि कवयः**=कवितारो न कवय इत्यर्थः, कस्यां ? **भुवि**=जगति, **यद्वाचो** येषां गिरो **न मदयन्ति** न हर्षयन्ति, किं तत् ? **मानसम्**, केषां ? **पशूनामपि** मूर्खाणामथाऽऽस्तां विदुषाम्, किंभूताः ? **नीताः** प्रापिताः, कां ? **स्वादुतां** मधुरताम्, केन ? **मधुना** माधुर्येणेत्येकोऽर्थः । अपरश्च **किं तेऽपि कवयः** कं जलं तस्य वयः पक्षिणो हंसादयः कस्य ब्रह्मणो वा वयो=हंसा वाहनत्वात्, एतच्चोपलक्षणं कोकिलादिपक्षिणाम्, न कवय इत्यर्थः, **यद्वाचो** यद्गिरो **भुवि**=पृथिव्यां **पशूनां**=तिरश्चामथास्तां मनुष्याणां **मानसं न मदयन्ति** न मत्तं कुर्वन्ति । किंभूता यद्वाचो ? **नीताः** प्रापिताः, कां ? **स्वादुतां**=माधुर्यम्, केन ? **मधुना** चैत्रेण तत्र पुष्परसपानादिना स्वरमाधुर्यप्राप्तेः, अथवा **पिकवयः** किं कोकिलपक्षिणस्ते **भुवि**=पृथिव्यां नैवेत्यर्थः ॥ ११ ॥

### 卐 श्रीपद्मसागरविबुधरचिता व्याख्या 卐

ननु दुर्जनपरिहारेण कवीनां वन्द्यत्वमुपदर्शितं ते च कवयः किं वाङ्मात्रेण स्युर्वाग्विशेषेण वेति शिष्यसन्देहनिरासार्थं वाग्विशेषेणैव कविता स्यान्न यथातथेति दर्शयन्नाह–**स्वादुता**मिति । व्याख्या० अत्र हि कवीनां कोकिलानां च साम्यमुपवर्णितम्, तथा च **तेऽपि किं भुवि** पृथिव्यां **कवयः** स्युर्नैव स्युरित्यर्थः । ते च क इत्याह **यद्वाच** इति येषां गिरो **मधुना** माधुर्यगुणेन **स्वादुतां नीताः** प्रापिताः सत्यः **पशूनामपी**ति पशुप्रायाणामपि जनानां **मानसं** चेतो न **मदयन्ति** मदैचि हर्षे इति धातोर्न मदवद्धर्षवत् कुर्वन्ति । अयं भावः, कवीनां स्ववाग्विलासफलं तु मुग्धजनबोध एव, मुग्धजनास्तु पशुप्राया एव, तथा च कविभिस्तथा स्ववाग्विलासः कर्तव्यो यथा मुग्धा बुध्यन्ते हर्षवन्तश्च भवन्ति, येषां वाचस्तु नैतादृशास्ते स्ववाक्फलाभावात् कवय एव न स्युरिति तात्पर्यम् । अथ कोकिलार्थं उपदर्श्यते, **ते किं** पिकाश्च ते वयश्च पक्षिणश्च **पिकवयः** कोकिलपक्षिणो भण्यन्ते नैव भण्यन्त इत्यर्थः, के त इत्याह–**मधुना** चैत्रेण **स्वादुतां नीताः** सत्यो **यद्वाचो** येषामालापा गवादीनामपि **पशूनां मानसं** चेतो **न मदयन्ति** न मदोन्मत्तं कुर्वन्ति । अयं भावः, कोकिला हि चैत्रमासे मधुरभाषिणः सन्त आस्तां विदग्धजनान् । पशूनपि रञ्जयन्ति । ये च नैवंविधाः पक्षिणो न ते कोकिलाः किन्तु काकप्राया एवेति वृत्तार्थः ॥ ११ ॥

### 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

तदन्यतद्विपरीतवदनप्रवृत्तां च जिह्वां धारयन्तीत्यर्थः, मिथ्याभाषिण इति भावः । क्व लज्जितव्यम् ? **मनीषिणां**=विदुषाम्, 'मध्ये' इति शेषः, निरुक्तदुर्जनैर्विद्वत्सभायामवश्यं लज्जितव्यमिति फलितोऽर्थः । मनीषिण इतिपाठे मनीषिणः=पण्डितंमन्या दुर्जना इत्यर्थः । सर्पपक्षे–'द्विजिह्वतां यान्तो ये अहीनकुलाः शेषे सेवाविशेषं न जानन्ति ते मनीषिणां [मध्ये] किं न लज्जन्ते इत्यन्वयः । **द्विजिह्वतां**=सर्पत्वम्, **यान्तः**=प्राप्नुवन्तः, सर्पलक्षणभूतजिह्वाद्वयधारिण इत्यर्थः, **ये, अहीनकुलाः**=अहीनां सर्पाणामिनः स्वामी नागराज इत्यर्थः, तस्य कुलं गोत्रं येषां ते तथा, नागराजकुलोत्पन्ना इत्यर्थः, **शेषे**=नागराजे, **सेवाविशेषं**=विशिष्टाराधनाम्, **न जानन्ति, ते, मनीषिणां**=तत्त्ववेदिनाम्, मध्ये, **किं न लज्जन्ते**=लज्जन्त एवेत्यर्थः, नागराजकुले समुत्पन्नैरवश्यं नागराजसेवा ज्ञातव्या भवति, अत्र तु तथात्वाभावो लज्जाकारणमिति भावः । यद्वा नकुलपक्षे–'ही द्विजिह्वतां यान्तो नकुला मनीषिणां [मध्ये] किं न लज्जन्ते' इत्यन्वयः । ही=हीशब्दो विस्मये वर्तते, तथा च विस्मयोऽत्र वर्तते, कोऽयं विस्मयः ? द्विजिह्वतां=सर्पत्वम्, यान्तः प्राप्नुवन्तः, वयं सर्पा इति भाषिण इत्यर्थः, नकुलाः=प्रसिद्धाः, मनीषिणां=बुद्धिमताम्, मध्ये किं न लज्जन्ते, लज्जन्त एवेति । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते दर्शितम् ॥१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**काव्यं तदपि किं वाच्य-मवाञ्चि न करोति यत् ।**
**श्रुतमात्रममित्राणां, वक्त्राणि च शिरांसि च ॥१२॥ [ पथ्यावृत्तम् ]॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**तदपि किं काव्यं वाच्यं**=भणनीयं न काव्यं वाच्यमित्यर्थः यन्न **करोति**, किं भूतं सत्? **श्रुतमात्र**माकर्णितमात्रमास्तामर्थादिनाऽवधारितम्, कानि? **वक्त्राणि** मुखानि **शिरांसि** मस्तकानि चकारौ परस्परापेक्षया समुच्चयार्थौ, केषाममित्राणां द्विषतां दुर्जनानामित्यर्थः, किं भूतानि न करोति? **अवाञ्चि** वचनरहितानि वक्त्राणि शिरांसि चाऽधोमुखानि गुणयुक्तत्वेन दोषरहितत्वेन च ॥ १२ ॥

## 卐 श्रीपद्मसागरविबुधरचिता व्याख्या 卐

अथ सत्कविकृतकाव्यस्याऽतिशयं दर्शयति, **काव्यं तदपी**ति। व्याख्या० **तदपि किं काव्यं वाच्यं** नैवेत्यर्थः, किं तदित्याह-**यच्छ्रुतमात्र**माकर्णितमात्रं सद**मित्राणां** स्वस्पर्धिनां **वक्त्राणि** मुखानि **चः** पुनरर्थे **शिरांसि** मस्तकानि, **अवाञ्चि** इति वक्त्रार्थे न विद्यन्ते वाचो वचनानि येषु तान्यवाञ्चि, शिरोऽर्थे तु अवाक्शब्दस्याऽग्रतः प्रथमा-[द्वितीया] बहुवचनस्य विद्यमानत्वेनाऽवाञ्चीति रूपसिद्धेरवाञ्चीत्यधःस्थानि न कुर्वन्ति, अयं भावो यस्मिन् काव्ये श्रुते सति स्पर्धिनो न किंचिद्वक्तुं शक्नुवन्ति, यतस्ते हि सर्वथा गुणपरिहारेण किंचिद्दूषणमेव वदन्ति, दूषणस्य तत्र लेशमात्रस्याऽप्यभावान्मौनवन्त एव ते स्युः । शिरांसि तु तत्र दूषणकणस्याऽप्यलाभात्तदनीप्सिततत्तद्गुणश्रवणसंजातशोका इव शिरांस्यधः कुर्वन्तीति वृत्तार्थः ॥ १२ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

सम्प्रति कविगुणं ध्वनयति '**स्वादुतामि**'त्यादिना । 'किं तेऽपि कवयः' इत्यन्वयः । **किम्? ते, अपि, कवयः**=कवितारः, अर्थान्न कवय इत्यर्थः । क? **भुवि**=जगति । ते के? इत्याकाङ्क्षायाम् 'मधुना स्वादुतां नीता यद्वाचः पशूनामपि मानसं न मदयन्तीत्यन्वयः । **मधुना**=माधुर्येण, **स्वादुतां**=मनोज्ञताम्, **नीताः**=प्रापिताः, **यद्वाचः**=येषां गिरः, **पशूनामपि**=पशुसदृशानां मूर्खाणामपि, आस्तां विदुषाम्, यद्वा **पशूनां**=देवानाम् **मानसं**=चित्तम्, न मदयन्ति=न हर्षयन्ति ॥ कोकिलपक्षे-किं ते पिकवय इत्यन्वयः । तत्र **पिकवयः**=पिकपक्षिणः, कोकिला इत्यर्थः, **मधुना**=चैत्रमासेन, तत्र पुष्परसपानादिना स्वरमाधुर्यप्राप्तेः । **पशूनामपि**=मृगादीनामपि तिरश्चाम्, आस्तां मनुष्याणाम् । **भुवि**=पृथिव्याम् । शेषं पूर्ववत् । यद्वा 'किं तेऽपि कवयः' इत्यत्र कवय इत्यस्यायमर्थः-कस्य जलस्य वयः पक्षिणो हंसादयः, अथवा कस्य ब्रह्मणो वयः पक्षिणो हंसवाहनत्वाद् हंसा एतच्चोपलक्षणं कोकिलादिपक्षिणाम् । शेषं प्राग्वत् । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्तेऽभिहितम् ॥११॥

अधुना काव्यं समीक्षते '**काव्यं तदपि**'इत्यादिना । 'तदपि किं काव्यं वाच्यम्' इत्यन्वयः । **तदपि, किम्? काव्यं**='प्रज्ञा नवनवोल्लेख-शालिनी प्रतिभा मता । तदनुप्राणनाजीव-द्वर्णनानिपुणः कविः ॥१॥ तस्य कर्म स्मृतं काव्यम् ।' इत्याद्युक्तं लोकोत्तरं कविकर्म, **वाच्यं**=इदं काव्यमस्तीति भणनीयम्, न भणनीयमित्यर्थः, अर्थात्तन्न काव्यमिति फलितोऽर्थः । तत् किम्? **यत् श्रुतमात्रम्**=श्रवणगोचरीभूतं सत्, आस्तामर्थादिनाऽवधारितम्, **अमित्राणां**=शत्रूणां दुर्जनानामित्यर्थः । **वक्त्राणि**=मुखानि, **शिरांसि**=मस्तकानि, परस्परापेक्षया समुच्चयार्थौ चशब्दौ **न करोति**=न विदधाति, कीदृशानि? **अवाञ्चि**=मुखपक्षे न विद्यते वाक् वाणी यत्र तादृशानि, वाणीरहितानीत्यर्थः, अत्र अवाच्-शब्दस्य नपुंसके द्वितीयाबहुवचने रूपं ज्ञेयम्, मस्तकपक्षे अव अधोऽञ्चन्ति गच्छन्तीति, अवाञ्चि तानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्पतन्त्यजवद् व्योम्नि, केचित् प्राप्तपदत्रयाः ।
विशन्त्यन्ये प्रबन्धेऽपि, लब्धे बलिरिव क्षितिम् ॥१३॥ [ पथ्यावृत्तम् ॥ ]

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

कविविशेषमाह–**उत्पतन्ति** उद्गच्छन्ति उदयन्त इत्यर्थः । **केचित्** कवयः । क्व ? **व्योम्नि**=आकाशमपि बुद्ध्या व्याप्नुवन्ति । किंभूताः सन्तः ? **प्राप्तपदत्रया** उत्पात-व्यय-ध्रौव्यलक्षणं पदत्रयं प्राप्ता यद्वा सुबन्ततिङन्त-पदत्रयं प्राप्ताः, **अन्ये तु विशन्ति,** कां ? **क्षितिं** क्षयं बुद्धिरहिततां यान्ति, कस्मिन् सत्यपि ? **प्रबन्धेऽपि** शास्त्रेऽपि, किंभूते ? **लब्धे** प्राप्ते, क इवोत्पतन्ति ? क इव विशन्ति ? **अजवत्** विष्णुवत्, यथा विष्णुराकाश उत्पतितः, किंभूतः ? **प्राप्तपदत्रयो** लब्धाधऊर्ध्वतिर्यक्क्रमत्रितयः, **बलिरिव** यथा बलिः **प्रबन्धे** प्रकृष्टबन्धने प्राप्ते **क्षितिं** भूमिं प्रविष्टो विभक्तिपरिणामेनैकवचनं योजनीयम् ॥ १३ ॥

## 卐 श्रीपद्मसागरविबुधरचिता व्याख्या 卐

अथ परमोत्कर्षवतां कवीनां हीनोपमया तिरस्कारपूर्वं सत्कवीन् प्रशंसयन्नाह–**उत्पतन्त्यजवद् व्योम्नि ।** व्याख्या० **अजवद्विष्णुवत् केचित्कवयः प्राप्तपदत्रयाः** सन्तो **व्योम्नि** गगने **उत्पतन्त्यूर्ध्वं** गच्छन्ति, अयं भावः, यथाहि **प्राप्तपदत्रयः** कृतत्रिपादो विष्णुर्गगन उत्पतितवानयं हि लोकसमये यद्बलिभूपालस्य पातालक्षेपावसरे पादत्रयं विकृत्य व्योम्न्युत्पपात तथा च केचित् कवयोऽप्येकद्वित्रिपदबोधेनोत्कर्षिणः सन्तो व्योम्न्युत्पतन्त्युद्गच्छन्तीत्यर्थः । अत्र चाऽजशब्दवाच्यबुत्कटस्य व्यङ्ग्यत्वेन हीनोपमानादुत्कर्षवतां कवीनां तिरस्कारः कृतो भवतीति । अथ शान्तोत्कर्षान् कवीनुत्तमोपमानेन प्रशंसयन्नाह–**विशन्तीति,** **अन्ये** पूर्वोक्तेभ्यः कविभ्योऽन्यस्वभावतया इतरे कवयः, प्रकृष्टो बन्धो रचना यत्र तत्प्रबन्धं सुशास्त्रं तस्मिन् **लब्धे** प्राप्ते सच्छास्त्रेऽधीते सत्यपीत्यर्थः । सर्वथा गलितोत्कर्षतया जनैः श्लाघिताः सन्तो बलिरिव बलिभूपालवत् क्षितिं पृथ्वीं विशन्ति प्रविशन्ति । अयं भावः, अधीतसच्छास्त्रत्वेन गलितोत्कर्षतया च ते साधुकवयो जनैः प्रशंसिताः सन्तो न मनागप्युच्छ्वसन्ति किन्तु जनप्रशंसावसरे सलज्जत्वेनाऽधोमुखाः सन्तो ज्ञायते पृथ्वीं प्रविशन्तीति । बल्यर्थे तु **प्रबन्धे** प्र प्रकर्षेण बन्धे बन्धने वाग्यन्त्रणरूपे **लब्धे** सति **क्षितिं** पातालं प्रविष्टवानिति । अत्र च बलिदृष्टान्तस्योत्तमत्वेन तद्दार्ष्टान्तिककवीनां प्रशंसा कृता भवतीति वृत्तार्थः ॥ १३ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

तथा अधोगतानीत्यर्थः, अत्र अवोपसर्गपूर्वकेण क्विबन्तेन अञ्च्धातुना निष्पन्नस्य अव-अच् अवाच्-शब्दस्य नपुंसके द्वितीयाबहुवचने रूपम् । अभिमतकाव्यस्य गुणयुक्तत्वेन दोषरहितत्वेन च दुर्जनानां मुखानि वचनरहितानि मस्तकानि चाधोगतानि भवन्तीति भावः । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते दर्शितम् ॥१२॥

अथाल्पज्ञकवेर्दृप्ततामुपहसन् बहुश्रुतकवेर्नम्रतां प्रशंसन् प्राह–**उत्पतन्ती**त्यादि । प्राप्तपदत्रयाः केचिद् व्योम्नि उत्पतन्तीत्यन्वयः । **प्राप्तपदत्रयाः**=प्राप्तमवगतं पदानां पदसंज्ञकानां 'राज्ञोऽयं ग्रामः' इत्यादिस्याद्यन्तशब्दानां 'जयति नयति पचति' इत्यादि त्याद्यन्तशब्दानां वा त्रयं यैस्ते तथा, अल्पज्ञा इत्यर्थः । विभक्त्यन्तशब्दस्य वैयाकरणैः पदसंज्ञा कृता, सा च विभक्तिर्द्विधा स्यादिरूपा त्यादिरूपा चेति तदन्तस्य पदत्वं सिद्धमेव । **केचित्**=कतिपये, कविप्रस्तावात् कवयः । व्योम्नि=आकाशे, **उत्पतन्ति**=उड्डयन्ते, वागाडम्बरबहुला भवन्तीत्यर्थः, क इव ? **अजवत्**=विष्णुरिव, यथा विष्णुर्बलिनाम्नो राज्ञः सकाशात् पदत्रयं पदत्रयप्रमाणभूमिं वरेणासाद्याकाशे उत्पतितः । **अन्ये**=निरुक्ताल्पज्ञदृप्तकवि-व्यतिरिक्ताः कवयः, **प्रबन्धे**=शास्त्रे, **लब्धेऽपि**=अधिगतेऽपि, **क्षितिं**=पृथिवीम्, **विशन्ति**=प्रविशन्ति, नम्रा भवन्तीत्यर्थः । क इव ? **बलिरिव**=बलिभूपाल इव, यथा बलिराजः, **प्रबन्धे**='पदत्रयप्रमिता भूमिर्मया दत्ता' इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कषाश्मनेव श्यामेन, मुखेनाधोमुखेक्षणः ।**
**काव्यहेम्नो गुणान् वक्ति, कलाद इव दुर्जनः ॥१४॥ [ मविपुलावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

दुर्जनस्वरूपमाह **वक्ति**=ब्रूते, को ? **दुर्ज्जनः**, कान् ? **गुणान्** श्लेषादीन्, कस्य ? **काव्यस्य,** क इव कस्य ? **कलाद** इव सुवर्णकार इव हेम्नः सुवर्णस्य यथा वक्ति गुणान् विषापनयनादीन्, केन ? **मुखेन** वक्त्रेण, किंभूतेन ? **श्यामेन** कृष्णेन, काव्यस्यानेकगुणदर्शनेन श्यामता, कीदृशो दुर्ज्जनोऽ**धोमुखेक्षणो**ऽवाग्लोचनः, केनेव ? **कषाऽश्मनेव** कषवर्तकप्रस्तारेणेव मुखेन, तेनापि किंभूतेन ? **श्यामेन**=कृष्णेन, कलादोऽप्यधोमुखेक्षणः सुवर्णदत्तलोचनत्वात् ॥ १४ ॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथैतादृशकविकृतकाव्यगुणान् पटुपटुतरवचनैः सज्जनाः स्तुवन्त्येव परं दुर्जना अप्यनया चेष्टया गुणान् वदन्तीति दर्शयति–**कषाश्मनेवे**ति । व्याख्या० **काव्यहेम्न** इति, काव्यरूपस्वर्णस्य **कलाद** इव स्वर्णकार इव **दुर्जनो गुणान् वक्ति,** यथा स्वर्णकारः स्वर्णगुणान् वक्ति तथा काव्यगुणान् दुर्जनोऽपि वक्तीत्युभयोः साम्येन विशेषणमाह–कथंभूतो दुर्जनोऽ**धोमुखेक्षणो** मुखं चेक्षणे च मुखेक्षणानि, अधःस्थानि मुखेक्षणानि यस्याऽसावधोमुखेक्षण एवंविधः सन् केन कृत्वा गुणान् वक्तीत्याह, केन ? **मुखेन,** कथंभूतेन ? **श्यामेन** कालेन, कोऽर्थो ? दुर्जनो हि सत्काव्यश्रवणानन्तरं तत्र दूषणलेशाभावात्स्वमुखं कृष्णं करोति, तदानीं तन्मुखकाष्ण्येनैव परैर्ज्ञायतेऽवश्यमत्र काव्ये गुणा एव सन्त्यन्यथा परदूषणग्रहणपटोरस्य मुखकाष्ण्यं न स्यादिति परप्रत्ययोत्पादकत्वेन काव्यगुणान् वक्तीत्युक्तम् । अथ तन्मुखकाष्ण्योपमानमाह–केनेव श्यामेन कषाश्मनेव कषपट्टपाषाणवच्छयामेन मुखेनेत्यर्थः । अथ स्वर्णगुणवर्णने स्वर्णकारविशेषणमाह–कीदृशः कलादोऽ**धोमुखेक्षणो**ऽधःस्थापितवदननयनः, परीक्षार्थं हि स्वर्णधमनं कुर्वन् कलादोऽधोमुखनयनो भवंस्तद्गुणान् वक्ति, केन ? **मुखेन,** कथंभूतेन ? **श्यामेन** प्रबलधूमसंपर्कतः श्यामीभूतेनेत्यर्थः । अत्र साक्षिकदृष्टान्तमाह केनेव ? **कषाश्मनेव,** यथाहि कषपट्टपाषाणेन कृत्वा स्वर्णकारस्तद्गुणान् वक्ति तथाऽयमप्येतेन कृत्वेति वृत्तार्थः ॥ १४ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

वचननियन्त्रणरूपे **प्रबन्धे**=प्रकृष्टे बन्धे बन्धने, **लब्धे**=प्राप्ते सति, **क्षितिं**=पातालरूपां पृथिवीम्, **विशन्ति**=वचनविपरिणामेन प्रविशति । अत्र पौराणिकाः–बलिभूपालस्य मनोवाञ्छितप्रदानेनाभिमानो जातः, तद्दूरीकरणाय विष्णुना रूपान्तरं विकृत्य पदत्रयप्रमाणा भूमिर्याचिता, बलिनापि दत्ता । अथ विष्णुरारचितविशालरूपः सन् एकेन पदेन मानवलोकं द्वितीयेनाकाशं तृतीयेन च देवलोकमेवं पदत्रयेण बलिभूमिं गृहीतवान्, बलिरपि मयेयं भूमिर्दत्ताऽतो नात्र स्थेयमिति ध्यात्वा पातालं जगामेति । यद्वा **प्राप्तपदत्रयाः**=प्राप्तं तीर्थंकरादवगतं पदत्रयं 'उत्पद्यते विनश्यति ध्रुवति च' इति उत्पादव्ययध्रौव्यलक्षणं पदत्रिकं त्रिपदी यैस्ते तथा, स्याद्वादवादिन इत्यर्थः, **केचित्**=गौतमगणधरादिसदृशाः कतिपये कवयः, न तु सर्वे, **व्योम्नि**=लोकालोकरूपे आकाशे, **उत्पतन्ति**=उड्डयन्ते, आकाशमपि स्वधिया व्याप्नुवन्तीत्यर्थः । अयं भावः–गणधरस्तीर्थंकरस्य सकाशात् 'उत्पद्यते विनश्यति ध्रुवति च' इति त्रिपदीमासाद्य समासादितज्ञानविकासः सकलश्रुतमयीं द्वादशाङ्गीं रचयति, तत्र निखिलभावकलितलोकालोकरूपाकाशस्यापि निरूपणमायातीति पदत्रयेणाकाशव्यापनम्' क इव ? **अजवत्**=न जायत इत्यजः, जन्मरहितो मुक्तात्मा सिद्ध इत्यर्थः, मुक्तात्मा केवलज्ञानेन लोकालोकरूपमाकाशं जानाति व्याप्नोति, एवमव्यवहारराशिपदं व्यवहारराशिपदं मुक्तावस्थापदं च क्रमेण प्राप्तोऽस्ति । **अन्ये**=त्रिपदीज्ञानविकला अपरे कवयः, **प्रबन्धे**=एकान्तवादकलिते शास्त्रे, **लब्धेऽपि**=अधिगतेऽपि, **क्षितिं**=क्षयं व्यापकबुद्धिरहिततां वादे पराजयं वा, **विशन्ति**=प्रविशन्ति, प्राप्नुवन्तीत्यर्थः, क इव ? **बलिरिव,** यथा पूजोपहारादिरूपो बलिः समुद्गादिरूपे प्रकृष्टे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अखण्डदण्डकारण्य-भाजः प्रचुरवर्णकात् ।**
**व्याघ्रादिव भयाघ्रातो, गद्याद् व्यावर्त्तते जनः ॥१५॥ [ पथ्यावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

ईदृशं गद्यं न कार्यमिति दर्शयितुमाह-**गद्या**च्छन्दोरहितवचनाद्**व्यावर्त्तते** निवर्त्तते, **जनो** लोको न स्वीकरोतीत्यर्थः । किंभूतः सन् ? **भयाघ्रातो** भीग्रस्तः । कस्मादिव ? **व्याघ्रादिव** पुण्डरीकादिव । कीदृशात् गद्यात् ? कीदृशाच्च व्याघ्राद् ? **अखण्डदण्डकारण्यभाजः**=अखण्डा परिपूर्णा ये दण्डका बह्वक्षरबहुसमासवचनानि त एवाऽरण्यमतिगम्भीरार्थत्वात्तद्भजते यद्गद्यं तत्तथोक्तं तस्मात्तद्युक्तादित्यर्थः, तथा **प्रचुरवर्णकात्** प्रचुरबहुतरा [ प्रचुरा बहुतरा वर्णा ] वर्णनानि यस्मिन् तत्तथोक्तं तस्माद्, बहुवर्णकं हि गद्यमुद्वेजनीयं भवति तथा अखण्डदण्डकं च । व्याघ्रादपि कीदृशादखण्डं निरन्तरं यद्दण्डकारण्यमतिप्रचुरो मानुषरहितो देशस्तद्भाजस्तत्सेविनः, तथा प्रचुरवर्णकादनेकवर्णात् ॥१५॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ पद्यमयकाव्यवर्णनानन्तरं गद्यस्वरूपव्यावर्णनार्थं व्याघ्रोपमानेन गद्यस्य दुरधिगमत्वं दर्शयति, **अखण्ड०** इति । व्याख्या० **व्याघ्रादिव गद्याद्भयाघ्रातो जनो व्यावर्तते** निवृत्तिमान् भवतीत्यन्वयः । अथ व्याघ्रगद्ययोरौपम्योपमेययोर्विशेषणसाम्यं दर्शयति, कथंभूताद्गद्या**दखण्डदण्डकारण्यभाजः**, अखण्डाः शब्दार्थसमाप्तप्राया ये दण्डका आलापकास्तेष्वासमन्ताद् व्याप्तिमन्तो द्वित्र्याद्यर्थनिरूपणनिपुणा अण रण इति दण्डकधातो रणन्तीति रणाः शब्दास्तेषां समूह आरण्यं, समूहार्थे यणिति सिद्धेस्तद् भजत इति तद्भाक् तस्मात्तद्भाजः, अखण्डदण्डकेषु हि गद्येषु प्राय एवंविधा एव शब्दा भवन्तीति । व्याघ्रार्थे तु कथंभूताद् व्याघ्रा**दखण्डदण्डकारण्यभाजो**ऽखण्डाः पूर्णा आयन्तवन्तो वंशादीनां दण्डा यत्र तत् स्वार्थे कात्, अखण्डदण्डकमेवंविधं यदरण्यमटवी तद्भाज इति, घोराटवीवासिन इत्यर्थः । पुनः कथंभूताद्गद्यात् **प्रचुरवर्णकात्** प्रचुरा घना वर्णा अक्षराणि यत्र तत्तस्मात् । व्याघ्रार्थे तु प्रचुरश्चित्रो रक्तादिरूपो वर्णो यस्य स तथा तस्मात्, यथैवंविधाद् व्याघ्राद्भयाघ्रातो जनो व्यावर्तते तथैवंविधाद्गद्याद् व्यावर्तते कथमहमेवंविधस्यैतस्य पारं यास्यामीति भीतो जनः प्रायो गद्यान्निवर्तते, इति गद्यस्य दुरधिगमत्वं दर्शितं तथा चाऽस्याः कथाया गद्यमयत्वेन दुरधिगमता वर्णितेति वृत्तार्थः ॥ १५ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

बन्धने लब्धे सति **क्षितिं**=क्षयं निरुद्धत्वात् पर्युषितत्वादिना विनाशं प्राप्नोतीति, यद्वा प्राग्वद् भावना कार्या । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रदर्शितम् ॥१३॥

अथ काव्यगुणकथने दुर्जनरीतिं दर्शयति **कषाश्मनेवे**त्यादिना । दुर्जनः काव्यहेम्नो गुणान् वक्तीत्यन्वयः, **दुर्जनः**=खलः, **काव्यहेम्नः**=काव्यमेव सुकृतिसमुपादेयत्वादिना हेम सुवर्णं तस्य, **गुणान्**=रसोत्कर्षहेतून् माधुर्यौजः-प्रसादाख्यान् श्लेषादीन् वा, **वक्ति**=कथयति, कीदृशो दुर्जनः ? **अधोमुखेक्षणः**=मुखं च ईक्षणे नयने चैषां समाहारो मुखेक्षणम् " प्राणितूर्य० " [ २, १, १३७ ] इत्येकवद्भावः, अधोऽधःस्थितं मुखेक्षणं यस्य स तथा, अयम्भावः-खलः काव्ये दोषाभावेन मुखमूर्ध्वीकृत्य दोषकथनतत्परो न भवितुमर्हति किन्तु गुणदर्शनेन निम्नं मुखं कृत्वा भूतलं पश्यति, केन गुणान् वक्ति ? **मुखेन**=वक्त्रेण, कीदृशेनेव ? **कषाश्मनेव श्यामेन**=कषाश्मा यत्र रेखां कृत्वा सुवर्णं परीक्ष्यते तादृशः पाषाणखण्डविशेषस्तेनेव श्यामेन कृष्णवर्णेन मलिनेनेत्यर्थः, अयं भावः-काव्ये दोषादर्शनेन दुर्जनस्य मुखं श्यामं मलिनं भवति, एतादृशेन मुखेनापि यद्यपि दुर्जनत्वात् स्वयं काव्यगुणान् न वदेत् तथापि तादृशं मलिनं मुखमवलोक्येतरे विचक्षणा जानन्ति, यदुत-अस्मिन् काव्ये गुणाः सन्ति, अन्यथाऽस्य मुखं मलिनं न स्यादिति 'मुखेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वर्णयुक्तिं दधानाऽपि, स्निग्धाञ्जनमनोहराम् ।**
**नातिश्लेषघना श्लाघां, कृतिर्लिपिरिवाश्नुते ॥१६॥ [ पथ्यावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

ईदृशी च कृतिर्न कार्येति दर्शयति–**नाश्नुते** न प्राप्नोति, काऽसौ ? **कृतिः** काव्यरचना, केव ? **लिपिरिव** लिपिर्यथा, कां च नाश्नुते ? **श्लाघां** प्रशंसाम्, किंभूता कृतिर्लिपिश्च ? **अतिश्लेषघना** अति अतिशयेन–श्लेषेण द्व्यर्थ-प्रतिपादकवचनेन घना व्याप्ता निरन्तरश्लेषेत्यर्थः ? लिपिरतिश्लेषघना इति वर्णान्योऽन्यश्लेषेण घना निरन्तरा, कीदृश्यपि द्वयी, **वर्णयुक्तिं दधानापि** वर्णकयोगं दधाना बिभ्राणाऽपि वर्णयुक्ताऽपीत्यर्थः, लिपिश्च वर्णयुक्तिमक्षरयोगं दधानापि, वर्णयुक्तापीत्यर्थः । किंभूतां वर्णयुक्तिं ? **स्निग्धाञ्जनमनोहरां** स्निग्धामरूक्षां माधुर्यादियुक्तां जनमनोहरां लोकचित्तर-ञ्जिकाम्, अन्यत्र स्निग्धं यदञ्जनं तेन मनोहरां रमणीयामतिकृष्णत्वात् ॥१६॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

ननु यदि गद्याजनो व्यावर्तेते तर्हि गद्यकृतिरश्लाघ्यैवेति चेन्न, एवंविधगद्यकृतेः श्लाघ्यत्वादित्यतस्तस्यास्तथाविधाया एव श्लाघाप्तिं दर्शयति, **वर्णयुक्तिमिति ।** व्याख्या० **लिपिरिवा**ऽक्षरविन्यास इव **कृतिः** करणं प्रस्तावाद्गद्यस्यै-वेत्यध्याहार्यम्, **श्लाघां** प्रशंसा**मश्नुते** व्याप्नोति प्रस्तावात् प्राप्नोतीत्यर्थः । लिपिकृत्योर्विशेषणसाम्यमाह–किं कुर्वाणा कृति**र्दधाना,** कां ? **वर्णयुक्तिमक्षर**युक्तिमक्षररचनामित्यर्थः । कथंभूतां वर्णयुक्तिं ? **स्निग्धां** स्नेहलां तथाविधरसो-त्पादकत्वान्न तु रूक्षां, अपेक्षार्थत्वाद् व्यवहितसंबन्धत्वाच्च । पुनः कथंभूतां वर्णयुक्तिं ? **जनमनोहरां** जनानां मनांसि हरतीत्येवं शीला सा तथा ताम् । नन्वस्या अतिश्लेषमयत्वेन कर्कशत्वात् कथं स्निग्धता जनमनोहरता च स्यादित्यत आह–कथंभूता कृति**र्नाऽतिश्लेषघना** न नैवाऽतिशयेन श्लेषो नाऽतिश्लेषोऽल्पश्लेषस्तेन घना निबिडा, अतिश्लेषा-भावाच्चाऽत्र वर्णयुक्तेः कर्कशत्वाभावात् स्निग्धता जनमनोहरता च सिद्धेति । लिप्यर्थे तु वर्णः कार्ष्ण्यरूपस्तस्य युक्तिं योगं तन्मयत्वमित्यर्थः । अथ वर्णद्योतनार्थमेवाऽऽह–वर्णयुक्तिं कथंभूतां स्निग्धाञ्जनमनोहरां, स्निग्धं यदञ्जनं कज्जलं तद्वन्मनोहरा मनोज्ञा तां । पुनर्लिपिः किंलक्षणा नाऽतिश्लेषाघना न विद्यतेऽतिशयेन श्लेषः कूर्चको यस्यां सा नाऽति-श्लेषा । अतिकूर्चकपातेन हि लिपेर्विनाशो भवतीति, एवंविधा चाऽसौ घना चेति कर्मधारयो, यथा चैवंविधा लिपिः प्रशस्या भवति तथैवंविधा गद्यकृतिरपीत्यर्थ इति वृत्तार्थः ॥ १६ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

वक्ति ' इत्यस्य मुखेन ज्ञापयतीत्यर्थः । यदा दुर्जनत्वेऽपि कदाचित् सभाक्षोभेण सत्यगुणान् वदेदपि तथापि तादृशेन मलिनमुखेनैवेति । क इव ? **कलाद इव**–सुवर्णकार इव । सुवर्णकारपक्षे–**कषाश्मना**=कषपाषाणेन, कषपाषाणे रेखां कृत्वा निर्णये जाते सतीत्यर्थः । **अधोमुखेक्षणः**=अधःस्थितमुखनयनः सन्, भूतलादिस्थितं सुवर्णं परीक्षितुं मुखं नयनयुगलं चाधः कृत्वेत्यर्थः । **श्यामेन**=ध्मानकालिकधूमसंसर्गजनितश्यामलतायुक्तेन, **मुखेन**=वक्त्रेण, यद्वा **श्यामेन कषाश्मना**=कृष्णवर्णेन कषपाषाणेनेति योजना । **हेम्नः**=सुवर्णस्य, **गुणान्**=विषापनयनादीन् गुणान्, **कलाद इव**=यथा सुवर्णकारः । वक्ति=कथयति, तथा दुर्जनोऽपीति । इदं मविपुलावृत्तम्, तल्लक्षणं प्रथमश्लोकस्य विवृतिप्रान्तेऽभिहितम् ॥१४॥

अथ दुरधिगमं गद्यं नादरणीयं भवतीति दर्शयति–**अखण्डे**त्यादिना । गद्याद् जनो व्यावर्तत इत्यन्वयः । **गद्यात्**=छन्दोरहितवचनात्, **जनः**=लोकः, **व्यावर्तते**=निवर्तते, तत्र प्रवृत्तिमान् न भवतीत्यर्थः । कीदृशाद् गद्यात् ? **अखण्डदण्डकारण्यभाजः**=अखण्डाः परिपूर्णा दीर्घा इति यावत्, ये दण्डका बह्वक्षरबहुसमासरूपा आलापकास्त एवातिगम्भीरत्वाद् अरण्यं तद् भजते इत्यखण्डदण्डकारण्यभाक् तस्मात्तथा, पुनः कीदृशाद् गद्याद् ? **प्रचुरवर्णकात्**=प्रचुरा वर्णा वर्णनानि यत्र तस्मात्तथा, कीदृशो जनः ? **भयाघ्रातः**=भयाकूलः, हा ! कथमस्य दुरधिगमस्य गद्यस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अश्रान्तगद्यसन्ताना, श्रोतॄणां निर्विदे कथा ।**
**जहाति पद्यप्रचुरा, चम्पूरपि कथारसम् ॥१७॥ [ मविपुलावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

ईदृशी कथा न कार्येति दर्शयति–**निर्विंदे** या विरागार्था भवति, का ? **कथा,** केषां ? **श्रोतॄणां** श्रावकाणाम्, कीदृशी ? **अश्रान्तगद्यसंताना** निरन्तरगद्यप्रवाहा, तथा **जहाति** त्यजति, कं ? **कथारसं** कथाया रसः शृङ्गारादिस्तम्, कासौ ? **चम्पूरपि** गद्यपद्यमय्यपि कथा, कीदृशी ? **पद्यप्रचुरा** निरन्तरपद्या, तस्मादीदृश्यपि न कार्या ॥१७॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथैवंविधगद्यबन्धविरचिता कथा श्रोतॄणां तोषाय स्यादितरा तु खेदाय भवतीति दर्शयति **अश्रान्तेतिति** । व्याख्या० श्रान्तिः समाप्तिस्तया रहितोऽश्रान्तो गद्यवंशो यस्यां सा तथा, एवंविधा च कथा **श्रोतॄणां निर्विंदे** खेदाय स्यात्, यस्यां हि कथायां महागद्यवंश एव स्यात् समाप्तिसूचकपदाभावात्, सा हि कथा कदाचिदप्यर्थासमाप्त्या उद्वेजकत्वेन खेदाय स्यादिति तात्पर्यम्, ननु तर्हि अश्रान्तगद्यसन्ताना चम्पूरपि कथं कथारसं दास्यतीति चेन्न कथमपि ददातीति दर्शयति **पद्यप्रचुरेति,** अर्थसमाप्तिपदस्य दूरस्थत्वेन पद्यविकला **चम्पूरपि** चम्पूकथाऽपि **कथारसं जहाति** त्यजति । रसवत्यपि चम्पूकथा तथाविधपद्याभावाच्छ्रोतॄणामुद्वेजकत्वेन नीरसा भवतीति वृत्तार्थः ॥ १७ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

पारं यास्यामीति धिया भीतिग्रस्त इव ततो निवर्तत इत्यर्थः । कस्मादिव ? **व्याघ्रादिव** कीदृशाद् व्याघ्राद् ? **अखण्डदण्डकारण्यभाजः**=अखण्डं निरन्तरं यद् दण्डकारण्यमतिप्रचुरो मनुष्यरहितो देशोऽटवीविशेषो वा तद्भाजः, यद्वा अखण्डाः परिपूर्णा दण्डा वंशादीनां दण्डा यस्मिन् तदखण्डदण्डकं तादृशंयद्अरण्यं तद्भाजस्तत्सेविनः, घोराटवीवासिन इत्यर्थः । पुनः कीदृशाद् व्याघ्राद् ? **प्रचुरवर्णकात्**=प्रचुरा घना वर्णा पीतादयो यस्य स तथा तस्मात् । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्तेऽभिहितम् ॥१५॥

अन्यगुणकलिताऽपि विपुलश्लेषा काव्यरचना श्लाघनीया न भवतीत्याह–**वर्णयुक्तिमि**त्यादिना । कृतिः श्लाघां नाश्नुत इत्यन्वयः । **कृतिः**=काव्यरचना, **श्लाघां**=प्रशंसाम्, **नाश्नुते**=न प्राप्नोति । का इव ? **लिपिरिव**=यथा पत्रादावक्षरविन्यासरूपा लिपिः । कीदृशी कृतिः कीदृशी च लिपिरित्याह–**अतिश्लेषघना=**अतिशयेन ये श्लेषा अनेकार्थप्रतिपादकवचनानि तैर्घना निरन्तरा, लिपिपक्षे–अतिश्लेषो लिखिताक्षराणामविभागेन मीलनं तेन घना निरन्तरा, कीदृश्यपि कृतिर्लिपिर्वा ? **दधानाऽपि**=बिभ्राणाऽपि, कां दधाना ? **वर्णयुक्तिं**=वर्णनयोगम्, लिपिपक्षे–लिखिताक्षररचनाम् । कीदृशीं वर्णयुक्तिं ? **स्निग्धाञ्जनमनोहरां**=स्निग्धां रसकलितत्वेन स्नेहलां न तु रूक्षाम्, माधुर्यादिरसयुक्तामित्यर्थः, जनमनोहरां जनमनोरञ्जिकाम्, लिपिपक्षे स्निग्धं यद् अञ्जनं मषी तेन मनोहरामतिकृष्णत्वाद् रमणीयाम् । यद्वा लिपिरिव कृतिः श्लाघामश्नुत इत्यर्थः । अन्यत्सर्वमुक्तवत्, केवलं ‘नातिश्लेषणघना’ इत्यस्यायमर्थः–न अतिश्लेषेण घना, अर्थात् अल्पश्लेषा इत्यर्थः, अल्पश्लेषस्य गुणत्वेन श्लाघां प्राप्नोतीति भावः । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥१६॥

ईदृशी कथा न कार्येति दर्शयति–**अश्रान्ते**त्यादिना । अश्रान्तगद्यसन्ताना कथा श्रोतॄणां निर्विदे इत्यन्वयः । **अश्रान्तगद्यसन्ताना**=अश्रान्तः समाप्त्यर्थकपदसान्निध्याभावाद् असमाप्तो गद्यस्य सन्तानः प्रवाहो यस्यां सा तथा, निरन्तरगद्येत्यर्थः । **कथा**=प्रसिद्धा, **श्रोतॄणां**=श्रवणकर्तॄणाम्, **निर्विदे**=उद्वेगाय, स्यादित्यध्याहार्यम् । अतो नेदृशी कथा कार्येति भावः । तथा पद्यप्रचुरा चम्पूरपि कथारसं जहाति, **पद्यप्रचुरा**=पद्यैः श्लोकैः प्रचुरा विशाला, **चम्पूरपि**=

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्कथारसवन्ध्येषु, निबन्धेषु नियोजिताः ।
नीचेष्विव भवन्त्यर्थाः, प्रायो वैरस्यहेतवः ॥१८॥ [ पथ्यावृत्तम् ] ॥
नमो जगन्नमस्याय, मुनीन्द्रायेन्द्रभूतये ।
यः प्राप्य त्रिपदीं वाचा, विश्वं विष्णुरिवानशे ॥१९॥ [ पथ्यावृत्तम् ] ॥

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

तथा यत्र कुत्रापि शास्त्रेऽर्था न योजनीया इति दर्शयति–**भवन्ति** जायन्तेऽ**र्था** अभिधेयाः, कीदृशा भवन्ति ? **वैरस्यहेतवो** विगतशृङ्गारादिरसकारणभूताः, कथं ? **प्रायो** बाहुलकेन, किंभूताः सन्तो ? **नियोजिताः** संघटिताः, केषु ? **निबन्धेषु** शास्त्रेषु, कीदृशेषु ? **सत्कथारसवन्ध्येषु** सन्तः शोभना ये कथारसाः शृङ्गारादयस्तैः वन्ध्येषु, शून्येषु, केष्विव ? **नीचेष्विव** यथा नीचेषु हीनेषु **नियोजिताः** समर्पिता अर्था धनानि प्रायो भवन्ति, कीदृशा ? **हेतवः** कारणानि, कस्य ? **वैरस्य** विरोधस्य, किंभूतेषु ? नीचेषु, **सत्कथारसवन्ध्येषु** सतां सत्पुरुषाणां कथा वार्त्ता तस्या रस आदरस्तेन वन्ध्येषु रहितेषु नीचत्वादेव ॥१८॥

अथ गौतमगणधरस्य नमस्कारमाह–**त्रिपदीं**० पूर्ववद् व्याख्येया ॥१९॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ यत्र तथाविधपद्याभावात् कथारसो न भवति तत्र नियुक्तानामप्यर्थानां प्रायो वैरस्यं भवतीति दर्शयति, **सत्कथे**ति । व्याख्या० श्रोतृणामानन्दकत्वेन सन् प्रधानो यः कथारसस्तेन वन्ध्येषु शून्येषु तद्रहितेष्वित्यर्थः । **निबन्धेषु** प्रबन्धेषु **नियोजिता अर्था नीचेष्विवा**ऽधमेष्विव प्रायो वैरस्य द्वेषस्य हेतवः कारणानि भवन्ति तथा तथाविधप्रबन्धेषु नियोजिता अर्था वैरस्यं विरसता तद्धेतवो भवन्ति वैरस्यं कुर्वन्तीत्यर्थ इति वृत्तार्थः ॥ १८ ॥

अथाऽऽदीश्वरादिदेवस्तवनरूपमङ्गलाचरणपूर्वं ग्रन्थप्रस्तावनां विधाय तदभिधेयं विवक्षुर्द्विर्बद्धं सुबद्धं भवतीति न्यायेनाऽखिलविघ्नोपशमनसमर्थस्याऽऽदेयनाम्नो भगवतो गौतमस्य नमस्काररूपं पुनर्मङ्गलमाचरति । **नमो जगदि**ति । व्याख्या० **इन्द्रभूतय** इन्द्रभूतिनाम्ने श्रीमच्चरमजिनप्रथमगणाधिपाय **नमो**ऽस्त्विति तावदन्वयः । कथंभूतायेन्द्रभूतये ? मुनीन्द्राय, चरमजिनप्रदत्तगच्छाधिपत्येन समस्तमुनिस्वामिने । नन्वेतस्यैव कवेः किमयं प्रणामार्ह उताऽपरस्याऽपीत्याशङ्क्याऽऽह–कथंभूतायेन्द्रभूतये **जगन्नमस्याय** जगतां प्रणामार्हायेत्यर्थो, ननु जगन्नमस्यत्वं विष्णोरेव स्यात् तस्यैव तदधीशत्वान्नाऽपरस्येति चेन्न, अस्याऽपि विष्णुसमत्वात्, ननु कथमस्य विष्णुसमत्वमित्याशङ्क्य तद्दर्शयति, **यो** भगवान् **विष्णुरिव त्रिपदी**मुत्पादव्ययध्रौव्यरूपं पदत्रयं **प्राप्य** लब्ध्वा **वाचा** द्वादशाङ्गीरचनासमर्थया वाण्या **विश्वं** जग**दानशे** व्याप्तवान्, भगवानिद्रभूतिश्चरमजिनशासने प्रथमं द्वादशाङ्गीं रचितवानिति जगद्विख्यातत्वात्, विष्णुपक्षे तु बल्यधःक्षेपावसरे त्रिपदीं चरणत्रयं प्राप्य त्रिलोकीं व्याप्तवान्, अत्र वाचेति बलेः प्रतिज्ञाभङ्गकवचनेन कृत्वेति करणपदमिति विष्णुसमत्वेन विष्णोरिवाऽस्य जगन्नमस्यत्वं सिद्धमिति वृत्तार्थः ॥ १९ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

" गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते । " इत्युक्तलक्षणा चम्पूरूपापि कथा, **कथारसं**–कथायाः शृङ्गारादिकं रसम्, **जहाति**–त्यजति, चम्पूकाव्येऽल्पपद्यत्वं रसप्रदं भवतीति चम्पूकाव्यमपि पद्यप्रचुरं न विधेयमिति भावः । यद्वा चम्पूरपि यदि अश्रान्तगद्यसन्ताना सती श्रोतृणां निर्विदे भवति, पद्यप्रचुरा सती च कथारसं जहाति, अन्यकथायास्तर्हि का वार्ता ॥ इदं मविपुलावृत्तम् तल्लक्षणं प्रथमश्लोकविवृतिप्रान्तेऽभिहितम् ॥१७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**प्रस्तावनादिपुरुषौ, रघुकौरववंशयोः ।**
**वन्दे वाल्मीकिकानीनौ, सूर्याचन्द्रमसाविव ॥२०॥ [ भविपुलावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

प्रथमकवित्वाद् लोके वाल्मीकिव्यासयोर्नमस्कारमाह–**वन्दे**=स्तुवे, कौ ? **वाल्मीकि–कानीनौ,** किंभूतौ ? **प्रस्तावनादिपुरुषौ**=प्रस्तावनायां वर्णनायामादिपुरुषौ प्रथमनरौ, कयोर्वर्णनायां ? **रघु–कौरववंशयोः,** रघुवंश–कौरववंशवर्णनं ताभ्यामेव प्रथमं कृतमित्यर्थः, काविव वन्दे ? **सूर्याचन्द्रमसाविव**=रविचन्द्राविव तावपि प्रस्तावनादिपुरुषौ प्रस्तावना=प्रारम्भप्रवृत्तिः, तस्यामादिपुरुषौ, कयोः ? **रघुकौरववंशयोः,** रघुवंशकौरववंशौ ताभ्यां वृत्तावित्यर्थः ॥२०॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ स्वाधिककाव्यारम्भरमणीयतरकविजनपूज्यत्वदर्शनाय काव्यग्रन्थे परमकवयः प्रणामार्हा इति नामग्राहं तान्नमस्कुर्वन्नाह–**प्रस्तावनेति** । व्याख्या० **सूर्याचन्द्रमसाविव** भानुचन्द्राविव वाल्मीकिकानीननामानौ परमकवीश्वरावहं वन्द इत्यन्वयः । अयं भावो यथा किल लोके भानुचन्द्रौ वन्दनीयौ तद्वत्तत्समानधर्मत्वेनैतावपि वन्दनीयावेवेत्यहं **वन्द** इति, तत्समानधर्मत्वमेवैतयोर्विशेषणमुखेन दर्शयति, कथंभूतौ वाल्मीकिकानीनौ ? **प्रस्तावनादिपुरुषौ,** प्र प्रकर्षेण स्तवनं प्रस्तावना तस्यां प्रथमकर्तृत्वेनाऽऽदिपुरुषौ, कयोः प्रस्तावनेत्याह–रघुकैरववंशयोः, रघुकैरववंशयोः प्रस्तावना ह्याभ्यां प्रथमं विहितेति तत्राऽऽदिपुरुषौ । भानुचन्द्रपक्षे तु रघुकैरववंशयोः प्रस्तावनायां रचनायामुत्पादन आदिपुरुषौ, रघुवंशस्य हि भानुतो मनुर्मनुतो दिलीपादय इत्यनेन क्रमेण भानुतः संभूतत्वात्, कैरववंशस्याऽपि चन्द्रतो जातत्वात् तत्राऽऽदिपुरुषावेताविति । यद्वाऽघु रघु गताविति धातो रघन्ति गच्छन्ति तांस्तानर्थानिति रघवः पदार्थास्तेषां वंशः समुदायस्तस्य प्रस्तावनायां प्रकाशे भानुरेवाऽऽदिपुरुष इति । कैरवाणि तु चन्द्रविकाशिकमलानि तेषां प्रस्तावना प्रकाशः प्रबोधस्तत्र चन्द्र एवाऽऽदिपुरुष इति समानधर्मत्वमाभ्यामनयोः सिद्धमिति वृत्तार्थः ॥ २० ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

अथ रसरहितग्रन्थे प्रतिपादिता अर्था विरसतायै भवन्तीतिदर्शयति–**सत्कथे**त्यादिना । सत्कथारसवन्ध्येषु निबन्धेषु नियोजिता अर्थाः प्रायो वैरस्यहेतवो भवन्तीत्यन्वयः । **सत्कथारसवन्ध्येषु**=सन्त उत्तमा ये कथाया रसाः शृङ्गारादयस्तैः वन्ध्येषु रहितेषु, **निबन्धेषु**=ग्रन्थेषु, **नियोजिताः**=प्रतिपादिताः, **अर्थाः**=पदार्थाः, **प्रायः**=बाहुल्येन, **वैरस्यहेतवः**=विगतो रसः शृङ्गारादिर्यस्मात् स विरसः, तस्य भावो वैरस्यं, तस्य हेतवः कारणानि, विरसतानिमित्तानीत्यर्थः, **भवन्ति**=जायन्ते । केष्विव ? **नीचेष्विव**=यथा नीचेषु अधमजनेषु । नीचपक्षे–**सत्कथारसवन्ध्येषु**=सतां सत्पुरुषाणां या कथा तस्या य रस आदरभावस्तेन वन्ध्येषु नीचत्वाद् रहितेषु, **नियोजिताः**=समर्पिताः, **अर्थाः**=धनादीनि, **प्रायो**=बाहुल्येन, **वैरस्य**=विरोधस्य, **हेतवः**=कारणानि, **भवन्ति**=जायन्ते । "अर्थोऽभिधेये शब्दानां, धनकारणवस्तुषु । प्रयोजने निवृत्तौ च विषये च प्रयुज्यते ॥१॥" इति शास्वतः । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्तेऽभिहितम् ॥१८॥

अथ कविविशेषप्रशंसावसरे निखिलकविशिरोमणेः श्रीगौतमस्वामिनो नमस्कारमाह–**नम** इत्यादि । **नमः**=नमस्कारो भवतु, कस्मै ? **मुनीन्द्राय**=मुनीश्वराय, किंनामधेयाय ? **इन्द्रभूतये**=इन्द्रभूतिनाम्ने गौतमेति प्रसिद्धाय, कीदृशाय ? **जगन्नमस्याय**=विश्ववन्द्याय, यच्छब्दोपादानेन तच्छब्दार्थाक्षेपात् तस्मै इत्यध्याहार्यम्, तस्मैकस्मै ? यस्त्रिपदीं प्राप्य वाचा विश्वमानशे । **यः, त्रिपदीं**=' उत्पद्यते विनश्यति ध्रुवति च ' इत्युत्पादव्ययध्रौव्यलक्षणं पदत्रयम्, **प्राप्य**=महावीर-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सत्यं बृहत्कथाम्भोधे,-बिन्दुमादाय संस्कृताः ।**
**तेनेतरकथाः कन्थाः, प्रतिभान्ति तदग्रतः ॥२१॥ [ पथ्यावृत्तम् ] ॥**

२१ एतस्य श्लोकस्योपरि टिप्पनकं नोपलभ्यते ।

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथैतादृशकविकृतकथाम्भोधिं वर्णयन्नाह—सत्यमिति । व्याख्या० **सत्यमिति** वितर्कणार्थं पदं, **कथाम्भोधेर्बिन्दु-** मंशमात्रं व्यञ्जयार्थत्वे त्वनुस्वारमादाय गृहीत्वा संस्कृताः पद्यगद्यादिविशेषेण संस्कृतिमापादिता इतरैरस्मदादिभिः कृताः कथा इतरकथाः कन्था इव तदग्रत इति कथाम्भोधेः पुरस्तात् प्रतिभान्ति कन्था इव दृश्यन्त इत्यर्थः, एतेन पूर्वकविकृतकथाम्भोधेरुत्कर्षो वर्णितः स्वस्य गर्वोद्धत्यं च परिहृतं भवतीति वृत्तार्थः ॥२१॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

देवसकाशाद् अवगम्य, **वाचा**=स्वोपज्ञद्वादशाङ्गीरूपवचनेन, **विश्वं**=निखिलं जगत्, **आनशे**=व्याप, द्वादशाङ्ग्यां निखिलजगन्निरूपणात द्वादशाङ्गीरूपेण विश्वं व्याप्तवान् कक्षीकृतवानित्यर्थः । क इव ? **विष्णुरिव**=यथा विष्णुः कृष्णो विष्णुकुमारमुनिर्वा, तत्र कृष्णपक्षे—**वाचा**=वचनेन, **त्रिपदीं**=पदत्रयमेयभूमिम्, **प्राप्य**=बलिनृपाद् वरेणासाद्य, **विश्वं**= मानवलोकाकाशदेवलोकरूपं जगद्, **व्यानशे**=व्याप्तवान्, एतद्भावना **उत्पतन्त्यजवद्**िति श्लोकविवृतौ दर्शिता । विष्णुकुमारमुनिपक्षे **वाचा**=वचनेन, **त्रिपदीं**=पदत्रयमेयभूमिम्, **प्राप्य**=चक्रवर्तिस्थानीयनमुचिमन्त्रिणः सकाशाद् आसाद्य, **विश्वं**=लक्षयोजनमितजम्बूद्वीपस्य पूर्वापरपर्यन्तरूपं जगद्, **व्यानशे**=व्याप्तवान् । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्तेऽभिहितम् ॥१९॥

लोके प्रथमकवित्वाद् वाल्मीकिव्यासयोः स्तुतिमाह—**प्रस्तावनादी**ति । वाल्मीकिकानीनौ वन्दे इत्यन्वयः । **वाल्मीकिकानीनौ**=वल्मीकः कीटविशेषकृतो मृत्तिकास्तूपस्तत्र भव इति वाल्मीकिः, रामायणग्रन्थकर्ता ऋषिविशेषः, कन्याया अनूढाया अपत्यमित्यणि कानीनादेशे च कानीनः, महाभारतग्रन्थकर्ता व्यासः, तौ, **वन्दे**=स्तुवे, कीदृशौ तौ ? रघुकौरववंशयोः प्रस्तावनादिपुरुषौ । **रघुकौरववंशयोः**=रघुः सूर्यवंशीयदिलीपसूनुर्नृपतिविशेषः, कुरुश्चन्द्रवंशीयराजविशेषस्तस्यायमिति कौरवः, धृतराष्ट्रात्मजरूपा पाण्डवरूपा वा कुरुनृपसन्ततिरुभयोरपि कुरुवंशजातत्वात्, तयोर्वंशः पुत्रपौत्राद्यपत्यवर्गस्तयोः **प्रस्तावनादिपुरुषौ**=प्रस्तावनायां वर्णनायामादिपुरुषौ, वाल्मीकिना रामायणे रघुवंशस्य कानीनेन महाभारते कौरववंशस्य प्रथमं वर्णनं कृतमिति भावः । काविव ? **सूर्याचन्द्रमसाविव**=सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ यथा, " वेदसह० " [ ३-२-७९ ] इति दीर्घत्वम् । कीदृशौ सूर्याचन्द्रमसौ ? **रघुकौरववंशयोः**=उक्तस्वरूपयोः, **प्रस्तावनादिपुरुषौ**=प्रस्तावना प्रारम्भस्तत्रादिपुरुषौ आदिभूतौ, सूर्यतो रघुवंशस्य प्रारम्भश्चान्द्रतः कौरववंशस्य प्रारम्भो जात इति भावः । इदं मविपुलावृत्तम्, तल्लक्षणं प्रथमश्लोकविवृतिप्रान्तेऽभिहितम् ॥२०॥

गुणाढ्यकविविरचितबृहत्कथायाः प्रशंसामाह—**सत्य**मित्यादिना । [येन] तदग्रत इतरकथाः कन्थाः प्रतिभान्ति तेन बृहत्कथाम्भोधेर्बिन्दुमादायेतरकथाः संस्कृता इति सत्यमित्यन्वययोजना कार्या । तच्छब्दोपादानेन यच्छब्दार्थाक्षेपाद् येनेत्यध्याहार्यम्, येन कारणेन, **तदग्रतः**=तस्या बृहत्कथाया अग्रतः समीपे, **इतरकथाः**=इतरकविविरचिताः कथाः, **कन्थाः**=जीर्णवस्त्रखण्डानादाय निर्मिताः प्रावरणविशेषाः कन्थाः, उपमाया गम्यमानत्वात् कन्था इव **प्रतिभान्ति**= दृश्यन्ते, **तेन**=तेन कारणेन, **बृहत्कथाम्भोधेः**=बृहत्कथा गुणाढ्यकविना पैशाचिकभाषायां विरचितः कथाविशेषः, सैवानेककथारत्नकलितत्वाद् अम्भोधिः समुद्रस्तस्माद्, **बिन्दुं**=कथालेशम्, **आदाय**=गृहीत्वा, **इतरकथाः**=इतरकविकृतकथाः,**संस्कृताः**=संस्कृतप्राकृतगद्यपद्यादिरूपेण संस्कारमापाद्य विरचिताः, इति, **सत्यम्**=यथार्थम्, एतां कल्पनां स्वीकरोमीत्यर्थः । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥२१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**जितं प्रवरसेनेन, रामेणेव महात्मना ।**
**तरत्युपरि यत्कीर्तिः, सेतुर्वाङ्मयवारिधेः ॥२२॥ [ पथ्यावृत्तम् ] ॥**
**प्रसन्नगम्भीरपथा, रथाङ्गमिथुनाश्रया ।**
**पुण्या पुनाति गङ्गेव, गां तरङ्गवती कथा ॥२३॥ [ मविपुलावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**जितं**=जयः प्राप्तः कविमध्ये, केन ? **प्रवरसेनेन** कविना, कीदृशेन ? **महात्मना**=बृहत्तरेण, **यत्कीर्त्तिः**=यस्य यशः, कोऽसौ ? **सेतुः**=सेतुबन्धशास्त्रं कीर्त्तिहेतुत्वात् कीर्त्तिः, किं ? **तरति**=प्लवते, क्व ? उपरि=उपरिष्टात्, कस्य ? **वाङ्मयवारिधेः**=निःशेषशास्त्रवृन्दोदधेः, सकलशास्त्राणामुपरि वर्त्तत इत्यर्थः, केन इव **रामेणेव**=यथा रामेण दशरथात्मजेन जयः प्राप्तो लोकमध्ये, तेनापि कथंभूतेन ? **प्रवरसेनेन** तथा **महात्मना**=पूज्येन विष्णोरवतारात्, यत्कीर्त्तिः **सेतुबन्धो** गिरिकृतस्**तरति**=प्लवते, न निमज्जति, क्व तरति ? **उपरि**, कस्य ? **वारिधेः**=लवणसमुद्रस्य ॥२२॥

**पुनाति**=पवित्रयति, का ? **कथा,** किमभिधाना ? तरङ्गवती, कां ? **गां**=पृथिवीम्, केव ? **गङ्गेव**=सुरनदीव, किंभूता तरङ्गवती गङ्गा च ? **प्रसन्नगम्भीरपथा**=प्रसादवद्गम्भीरार्थवचनमार्गा निर्मलालब्धमध्यप्रवाहा, तथा **रथाङ्गमिथुनाश्रया**=चक्रवाकयुगलाश्रिता, चक्रवाकयुगलं हि तत्र वर्ण्यत इति । गङ्गा च चक्रवाकयुगलानामाधारभूता, तत्र तानि सुखमाहारादिकं लभन्त इति, तथा **पुण्या**=पवित्रा पुण्यकारणं च, गङ्गा कीदृशी ? तरङ्गवती=कल्लोलयुक्ता ॥२३॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ तथाविधकथाकारिणो महाकवीन् त्रिजगतीव्याप्तख्यातीन् दर्शयति–जितमिति । व्याख्या० **रामेणेव** लक्ष्मणाग्रजेनेव **महात्मना प्रवरसेनेन** प्रवरसेननाम्ना कविना तथाविधानेकप्रबन्धकारित्वेन **जितं,** तथाविधानेकप्रबन्धकारिपुरोगामी स बभूवेत्यर्थो, रामेणेवेति, यथा प्रवरा सेना सैन्यं यस्य स तथा तेन रामेण जितं जयवता जातं तथाऽस्याऽपि प्रवरसेनत्वाविशेषाज्जयित्वमिति भावः । नन्वस्य रामसाम्यस्पष्टीकरणाय किंचित्तत्स्वरूपमिहाऽऽरोप्य दर्शनीयमित्यतस्तत्स्वरूपमिहाऽऽरोपयति, तरतीति **यत्कीर्त्ति**रूपसेतुः पद्यवाङ्मयवारिधेः शास्त्ररूपसागरस्योपरि **तरति,** यथा रामबद्धः सेतुः सागरोपरि तरति तथाऽस्य कीर्त्तिस्तत्कृतशास्त्रोपरि तदध्येतृकविजनप्रशंसया तरतीत्यर्थ इति वृत्तार्थः ॥२२॥

अथ प्रवरसेनरचितकथातिशयं दर्शयति, प्रसन्नेति । व्याख्या० **गङ्गेव** भागीरथीव **पुण्या** पवित्रा **कथा गां** वाचं गङ्गापक्षे तु **गां** पृथ्वीं **पुनाति** पवित्रीकरोति, गङ्गाकथयोर्विशेषणसाम्यं दर्शयति, कथंभूता कथा **प्रसन्नगम्भीरपथा,** प्रसन्नैर्व्यक्ततरैर्गम्भीरैर्गूढार्थैः शब्दैः पथो मार्गः प्रस्तावनारूपो यस्याः सा तथा, यद्वा प्रसाद्यते व्यक्तीक्रियतेऽर्थ एभिरिति प्रसन्नाः शब्दास्तैर्गम्भीरो निर्बुद्धयगम्यः पथो मार्गो रचनारूपो यस्याः सा तथा, यद्वा प्रसन्नोऽकर्कशो गम्भीरः सद्बुद्धिगम्यः पथो मार्ग उपदेशरूपो यस्यां सा तथा । गङ्गापक्षे तु कथंभूता गङ्गा **भीरपथा,** भीर्भयमीरक् गताविति धातोरीर्ते गच्छतीति भीरो भयदायी पथो मार्गो यस्याः सा तथा, कं प्रति **प्रसन्नगं** प्रति, प्र प्रकर्षेण सन् प्रधानो नगः पर्वतस्तं प्रसन्नगं महान्तं पर्वतं प्रति गङ्गामार्गः प्रबलप्रवाहमयत्वेन विदारणभयाद्भयं ददातीवोत्प्रेक्षितं विशेषणं, पुनः कथा कथंभूता **रथाङ्गमिथुनाश्रया** रथेऽङ्गं वपुर्यस्य तद्रथाङ्गं तन्मिथुनं चेति कदाचिदपि पादाभ्यामहिण्डनेन रथस्थं मिथुनं राजराजपत्नीरूपं तयो रथादिनैव यायित्वात्तन्मिथुनं प्रबन्धावदाताविष्करणेनाऽऽश्रयतीति तदाश्रया, कथायां हि प्रायो राजराज्योरवदाताविष्करणात् । गङ्गापक्षे तु रथाङ्गमिथुनं चक्रवाकमिथुनं तदाश्रया तत्तटे चक्रवाकमिथुनस्य सत्त्वात्, पुनः कथा कथंभूता **तरङ्गवती,** तस्तत्त्वं तस्मिन् रङ्गोऽस्या अस्तीति तरङ्गवती, गङ्गापक्षे तु तरङ्गाः कल्लोलास्तद्वतीति वृत्तार्थः ॥२३॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

सेतुबन्धकथाकारस्य प्रवरसेनकवेः प्रशंसामाह–**जित**मित्यादिना । प्रवरसेनेन जितमित्यन्वयः । **प्रवरसेनेन**=

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**प्राकृतेषु प्रबन्धेषु, रसनिष्यन्दिभिः पदैः ।**
**राजन्ते जीवदेवस्य, वाचः पल्लविता इव ॥२४॥ [पथ्यावृत्तम् ] ॥**

अस्य चतुर्विंशतितमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ।

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ संस्कृता एव कथा हृद्या न तु प्राकृता इति भ्रमनिरासार्थं प्राकृतकथास्तत्कर्तारं च वर्णयन्नाह-**प्राकृतेष्विति** । व्याख्या० **प्राकृतेषु** शुद्धप्राकृतव्याकरणनिष्पन्नेषु, **प्रबन्धेषु रसनिःस्यन्दिभि**र्नवरसश्राविभिः **पदैः** कृत्वा **जीवदेवस्य** महाकवेर्**वाचो** गिरः **पल्लविता इव** संस्कृतकथापेक्षयाऽऽबालगोपालप्रतीतसुललितानेकार्थसूचाचतुरशब्दसन्दोहघटितत्वेनाऽतीवाऽऽनन्ददायित्वाद्राजन्त इति वृत्तार्थः ॥२४॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

प्रवरसेननाम्ना सेतुबन्धकथाकारेण कविना, **जितं**=निरुपमकाव्यरचनया कविकुलेषु जयो लब्धः । कीदृशेन प्रवरसेनेन ? **महात्मना**=माहात्म्यशालिना । यच्छब्दोपादानेन तच्छब्दार्थाक्षेपात् 'तेन' इत्यध्याहार्य तेन प्रवरसेनेनेतियोजना कार्या । तेन केन ? **यत्कीर्त्तिः सेतुः**=यस्य कीर्त्तिः-कीर्त्तिहेतुत्वात् कीर्तिरूपो यशोरूपो यः सेतुः-नामैकदेशे नामोपचारात् सेतुबन्धनामा कथा, स **वाङ्मयवारिधेः**=वाचो विकारा वाङ्मयानि शास्त्राणि तान्येवानेकाभिधेयरत्नकलितत्वाद् वारिधिः जलधिस्तस्य तथा, शास्त्ररूपसमुद्रस्य, **उपरि**=उपरिभागे, **तरति**=प्लवते, सकलकाव्यग्रन्थेषु प्रधानपदवीं दधातीत्यर्थः । केनेव ? **रामेणेव**=यथा रामेण, तत्र रामपक्षे-रामेण जितमित्यन्वयः, **रामेण**=दशरथसूनुना रामचन्द्रेण, **जितं**=लोकमध्ये जयो लब्धः । कीदृशेन ? **प्रवरसेनेन**=प्रवरा सेना यस्य तेन तथा । पुनः कीदृशेन ? **महात्मना**=पूज्येन, अत्रापि तेनेत्यध्याहारात् तेन रामेणेति योजना । तेन केन ? **यत्कीर्तिः सेतुः**=यस्य कीर्त्तिः-कीर्त्तिहेतुः सेतुः-सेतुबन्धः, लङ्कागमनार्थं नलकपिद्वारा कारितः समुद्रस्योपरि पालिबन्ध इत्यर्थः, **वारिधेः**=जलधेः, **उपरि**=उपरिभागे, **तरति**=प्लवते, ग्रन्थकर्तुः साक्षाद् बुद्धिविषयत्वेन वार्तमानिको निर्देशः । तरति स्मेत्यर्थः । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥२२॥

तरङ्गवतीकथाकारस्य श्रीपादलिप्तसूरेः कथाप्रशंसामाह-**प्रसन्नगम्भीरे**त्यादिना । तरङ्गवती कथा गां पुनातीत्यन्वयः । **तरङ्गवती**=तरङ्गवतीनाम्नी, **कथा**=श्रीपादलिप्ताचार्यविरचिता कथा, **गां**=वाणीम्, **पुनाति**=पवित्रीकरोति, कीदृशी तरङ्गवती कथा ? **प्रसन्नगम्भीरपथा**=प्रसन्नोऽल्पसमासार्थसुगमनादिरूपप्रसादाख्यकाव्यगुणयुक्तः, गम्भीरो गम्भीरार्थयुक्तः पन्था वचनमार्गो रचनाशैली यस्यां सा तथा, अत्र "ऋक्पूःपथ्यपोऽत्" [ ७-३-७६ ] इत्यत्-समासान्ते "नोऽपदस्य तद्धिते" [ ७-४-६१ ] इत्यन्त्यस्वरादिलोपे पथिन्स्थाने पथ इति । पुनः कीदृशी ? **रथाङ्गमिथुनाश्रया**=रथाङ्गौ चक्रवाकपक्षिणौ तयोर्यन्मिथुनं युगलं तस्याश्रयाऽऽधारभूता, तरङ्गवत्यां चक्रवाकयुगलस्य वर्णनात् । पुनः कीदृशी ? **पुण्या**=पवित्रा । केव ? **गङ्गेव**=यथा गङ्गा, गङ्गापक्षे-गङ्गा गां पुनातीत्यन्वयः । **गङ्गा**=गङ्गानाम्नी नदी, **गां**=पृथ्वीम्, **पुनाति**=पवित्रीकरोति । "गोशब्दः पशुभूम्यंशु-वाग्दिगर्थे प्रयुज्यते । स्वर्गलोचनबाणाम्बुकुलिशार्थोऽपि दृश्यते ॥१॥" इति शाश्वतः । कीदृशी गङ्गा ? **प्रसन्नगम्भीरपथा**=प्रसन्नो निर्मलो गम्भीरोऽतलस्पर्शो गहनो वा पन्थाः प्रवाहमार्गो यस्याः सा तथा । पुनः कीदृशी ? **रथाङ्गमिथुनाश्रया**=रथाङ्गानां चक्रवाकपक्षिणां यानि मिथुनानि युगलानि तेषामाश्रयाऽऽधारभूता, गङ्गायास्तीरयोः कमलादौ वा चक्रवाकयुगलानां सुखेन निवसनाद्, यद्वा षष्ठारकप्रान्ते रथचक्रयुगलान्तरालप्रमितो गङ्गाप्रवाहो भविष्यतीतिवृत्तमाश्रित्य व्याख्येयम् । तथाहि, **रथाङ्गमिथुनाश्रया**=रथाङ्गे चक्रे तयोर्मिथुनं युगलं तदेवाश्रयो यस्याः सा तथा, चक्रयुगलान्तरालप्रमितेत्यर्थः । पुनः कीदृशी गङ्गा ? **पुण्या**=पवित्रा, **तरङ्गवती**=प्रचुरकल्लोलयुक्ता इदं भविपुलावृत्तम्, तल्लक्षणं तु प्रथमश्लोकविवृति प्रान्ते प्रोक्तम् ॥२३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**म्लायन्ति सकलाः कालि-दासेनासन्नवर्तिना ।**
**गिरः कवीनां दीपेन, मालतीकलिका इव ॥२५॥ [ मविपुलावृत्तम् ] ॥**

अस्य पञ्चविंशतितमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ।

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथायं कविः स्वकालवर्तिनं कालिदासनामानं महाकविं स्तुवन्नाह=**म्लायन्ती**ति-व्याख्या० **आसन्नवर्तिना** स्वचक्षुर्गोचरमायातेन, **कालिदासेन** कालिदासनाम्ना महाकविना कृत्वाऽपरेषामस्मदादीनां कवीनां **सकलाः** समस्ताः कलान्विता वा **गिरो** वाचो **म्लायन्ति** म्लाना भवन्ति, समीपोपविष्टे कालिदासे सति ये कवयः स्ववाग्विलासं कुर्वन्ति तेषां वाग्विलासस्य तदपेक्षयाऽकिंचित्करत्वेन म्लानीभवनात् । अत्र दृष्टान्तमाह-केन का इव, **इव** यथाऽऽ**सन्नवर्तिना** समीपस्थेन दीपेन कृत्वा मालतीकलिका म्लायन्ति तथाऽनेन ता अपीति वृत्तार्थः ॥२५॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

जीवदेवाभिधकविवरकृतप्राकृतनिबन्धसन्दोहगतवाण्याः प्रशंसामाह-**प्राकृतेष्वि**त्यादिना । जीवदेवस्य वाचो राजन्त इत्यन्वयः । **जीवदेवस्य**=जीवदेवसूरेः कविवरस्य, **वाचो**=वचनानि **राजन्ते**=शोभन्ते । क्व राजन्ते ? **प्राकृतेषु**= प्राकृतभाषाविरचितेषु, **प्रबन्धेषु**=ग्रन्थेषु । कीदृश्य इव ? **पल्लविता इव**=पल्लवानि नूतनपत्राणि संजातानि यासां तास्तथा, नूतनपत्रयुक्ता इव, कैः ? **पदैः**=विभक्त्यन्तशब्दैः । कीदृशैः पदैः ? **रसनिष्यन्दिभिः**=शृङ्गारादिरसवर्षिभिः । अयं भावः-यथा तरुः शाखाप्रशाखादिभिः शोभते, शाखाप्रशाखाः स्तबकैः शोभन्ते, स्तबका नूतनपत्रैः, नूतनपत्राणि स्निग्धतया रसवर्षीणीव दृश्यन्ते, तथा तरुस्थानापन्नः प्राकृतग्रन्थसन्दोहः, शाखाप्रशाखास्थानापन्नास्ते ते ग्रन्थाः, स्तबक-स्थानापन्ना वाचः, दलस्थानापन्नानि पदानि, दलान्तर्गतरसस्थानापन्नाः शृङ्गारादयो रसाः । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्तेऽभिहितम् ॥२४॥

कालिदासकविं वर्णयति-**म्लायन्ती**त्यादिना । कवीनां सकला गिरो म्लायन्तीत्यन्वयः । **कवीनाम्**=इतरकवीनाम्, **सकलाः**=कलासहिता निखिला वा **गिरो**=वाचः, **म्लायन्ति**=म्लानिं प्राप्नुवन्ति, हतप्रभावा भवन्तीत्यर्थः । केन ? **कालिदासेन**=कालिदासनाम्ना कविना, कथम्भूतेन कालिदासेन ? **आसन्नवर्तिना**=समीपस्थेन । केन क इव ? दीपेन मालतीकलिका इव, **दीपेन**=प्रसिद्धेन, कीदृशेन ? **आसन्नवर्तिना**=समीपस्थेन, **मालतीकलिका इव**=मालती पुष्पजातिविशेषः, तस्याः कलिका इव । अयं भावः-यावत् कालिदासकविः समीपवर्ती न भवति तावद् इतरकवीनां वाचो मालतीकलिका इव विकसन्तु, समीपवर्तिनि तु कालिदासकवौ दीपसान्निध्ये मालतीकलिका इव ता म्लाना भवन्ति । द्वौ कालिदासावास्तामिति विद्वन्मतम्, तत्रैको विक्रमादित्यसमकालीनोऽपरो भोजसमकालीनः, द्वावप्यनेन श्लोकेन संगृहीतौ । यदि विशेषतो भोजसमकालीनः कालिदासो वर्णनीयस्तदा 'आसन्नवर्तिना' इत्यस्य भोजसदसि मम समीपे वर्तमानेनेत्यर्थः करणीयः । इदं मविपुलावृत्तम्, तल्लक्षणं तु प्रथमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥२५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**केवलोऽपि स्फुरन् बाणः, करोति विमदान् कवीन् ।**
**किं पुनः क्लृप्तसंधान–पुलिन्दकृतसन्निधिः ॥२६॥ [ पथ्यावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**करोति**=विदधाति, कः ? **बाणः**=बाणनामा कविः, कान् ? **कवीन्**=काव्यकर्तॄन्, किंभूतान् ? **विमदान्**=विगतदर्पान्, किं कुर्वन् ? **स्फुरन्**=द्योतमानः, किंभूतः ? **केवलोऽपि**=असहायोऽप्येकाक्यपीत्यर्थः, **किं पुनः**=किमुच्यते पुनः ? विशेषेण विमदान् करोति, किंभूतः ? **क्लृप्तसन्धानपुलिन्दकृतसन्निधिः**=क्लृप्तसन्धानः कृतकादम्बरीपरिसमाप्तिर्यः पुलिन्दः पुलिन्दाख्यः सुतस्तेन कृतं संनिधानं यस्य स तथोक्तः, स्वपुत्रकवियुक्त इत्यर्थः । अन्यत्र **केवलोऽपि**=नरादिरहितोऽपि **बाणः**=शरः **करोति, कवीन्** कं जलं तत्र वयः पक्षिणः हंसादयस्तान् पक्षिणः, किंभूतान् ? **विमदान्**=हर्षरहितान् विषादवत इत्यर्थः । किं कुर्वन् ? **स्फुरन्** देदीप्यमानः, किं पुनर्न करोति ? कथंभूतः ? **क्लृप्तसंधानपुलिन्दकृतसंनिधिः**=क्लृप्तं कृतं संधानं धनुष्यारोपणं येन स तथोक्तः स चासौ पुलिन्दश्च शबरश्च तेन कृतः **संनिधिः**=संनिधानं यस्य स तथोक्तः, आरोपितचापनाहलविहितसामीप्यः ॥२६॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ कादम्बरीकारं स्तुवन्नाह–**केवलोऽपी**ति । व्याख्या० **केवलो**ऽन्यपरसहायनिरपेक्षोऽपि **बाणो** बाणनामा कविरपरान् **कवीन् विमदान्** गताभिमानान् करोति, काऽस्येदृशी शक्तिरिति विशेषणमुखेन तां दर्शयति, कथंभूतो बाणः ? **स्फुरन्** स्फुर्तिमान् स्फुर्तिं दृष्ट्वाऽस्याऽपरकवयो मदं त्यजन्तीत्यर्थः । यद्यसौ सहायनिरपेक्ष एवैवं करोति तर्हि ससहायः किं कुर्यादिति दर्शयति, **किं पुनरि**ति क्लृप्तं रचितं सन्धानं ' मया स्वपितुर्ग्रन्थाः शोध्या ' इति प्रतिज्ञा येन स चाऽसौ पुलिन्दः शबरनामा बाणपुत्रस्तस्य संनिधेः साहाय्यादपरकविविमदीकरणे किं भण्यमिति । अथ बाणपदस्य व्यङ्ग्यार्थत्वेन काण्डार्थं उपदर्श्यते, **बाणः** पृषत्कः, **केवलो** धनुर्निरपेक्षोऽपि, कः कलापः, तेनोपलक्षिता वयः पक्षिणो मयूरा इत्यर्थस्तान्, **विमदान्** बाणदर्शनानन्तरं भयविक्लवत्वेन गतहर्षान् करोति, बाणस्य ससहायत्वेऽतिशयं दर्शयति, किं पुनरिति, क्लृप्तं सन्धानं धनुर्ज्यायोजनं यैस्ते च ते पुलिन्दाश्च भिल्लास्तैः कृतः संनिधिर्धरणं तस्मात् । भिल्लहस्तस्थधनुरायुक्तो बाणः कथं न तान् पक्षिणो विमदान् करोतीति भावः इति वृत्तार्थः ॥२६॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

बाणकविं वर्णयति–**केवलोऽपी**त्यादिना । बाणः कवीन् विमदान् करोतीत्यन्वयः । **बाणः**=कादम्बरीप्रमुखग्रन्थकर्ता बाणनामा कविः । **कवीन्**=काव्यकर्तॄन् । **विमदान्**=विगताभिमानान् । **करोति**=विदधाति । कीदृशो बाणः ? **केवलोऽपि**=इतरसाहाय्यरहितोऽपि, एकाक्यपीत्यर्थः । कीदृशः सन् ? **स्फुरन्**=ईषत् स्पन्दमानः सन् । ननु यदि केवलोऽपि बाणः कवीन् विमदान् करोति तदा ससाहाय्यः किं कुर्यादित्याह–क्लृप्तसंधानपुलिन्दकृतसन्निधिः किं पुनः । **क्लृप्तसन्धानपुलिन्दकृतसन्निधिः**=क्लृप्तं विहितं सन्धानं निजजनकनिर्मितकादम्बरीसम्बन्धिनोऽवशिष्टभागस्य समाप्तिपर्यन्तमनुसन्धानं येन स क्लृप्तसन्धानः, एवंविधो यः पुलिन्दः पुलिन्दनामा बाणकवितनयस्तेन कृतः सन्निधिः सामीप्यं यस्य स तथा, पुलिन्दाभिधनिजतनयकविवरसहित इत्यर्थः । **किं**=प्रश्ने वितर्के वा, **पुनः**=पक्षान्तरद्योतने, ससाहाय्यपक्षे किमुच्यते ? विशेषेण कवीन् विमदान् कुर्यादित्यर्थः । इत्येकोऽर्थः । अयं द्वितीयार्थः–**बाणः**=शरः, **कवीन्**=कस्य जलस्य वयः पक्षिणो हंसादयस्तान्, यद्वा कः कलापस्तेनोपलक्षिता वयः पक्षिणः कवयः, कलापिनो मयूरास्तान्, **विमदान्**=विगतहर्षान्, विषादयुक्तानिति यावत्, **करोति**=विदधाति । कीदृशः शरः ? **केवलोऽपि**=धनुरादिसाहाय्यरहितोऽपि । कीदृशः सन् ? **स्फुरन्**=वाय्वादिना ईषत् स्पन्दमानः सन् । ननु केवलोऽपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कादम्बरीसहोदर्या, सुधया वैबुधे हृदि ।**
**हर्षाख्यायिकया ख्यातिं, बाणोऽब्धिरिव लब्धवान् ॥२७॥ [ पथ्यावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

पुनरपि बाणकविं वर्णयितुमाह—

**लब्धवान्** प्राप्तवान्, कः ? **बाणः**, कां ? **ख्यातिं**=प्रसिद्धिम्, कया ? **हर्षाख्यायिकया,** उच्छ्वासनिबद्धा कथैवाख्यायिका हर्षस्य, राज्ञ आख्यायिका तया, **सुधया**=अमृतेन इव आह्लादकत्वाद्, क ? **हृदि**=मनसि, किंभूते ? **वैबुधे**=विशिष्टा बुधाः पण्डिता विबुधाः तेषाम् इदं वैबुधं तत्र, किंभूतया ? **कादम्बरीसहोदर्या**=कादम्बरीकथा-भगिन्यैकजनकत्वात् । क इव कया ? **अब्धिरिव**=समुद्र इव, **सुधया**=अमृतेन, किंभूतया ? **हर्षाख्यायिकया**=हृष्टिकथिकया, क ? **हृदि**=चित्ते, किंभूते ? **वैबुधे**=देवसत्के, तयापि किंभूतया **कादम्बरीसहोदर्या**=सुराभगिन्या द्वयोः समुद्र उत्पन्नत्वात् ॥२७॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ बाणकृतकादम्बरीकथां सुधोपमानेन समुद्रोपमानेन च बाणं स्तुवन्नाह—**कादम्बरी**ति । व्याख्या० **बाणः** कवि**रब्धिरिव** समुद्र इव ख्यातिं लब्धवान्, ननु समुद्रः केन कृत्वा ख्यातिं लब्धवानित्याह—कया **सुधया**ऽमृतेन, कथंभूतया सुधया **कादम्बरीसहोदर्या,** कदम्बं रत्नादिवस्तूनां समूहं रात्यादत्त इति कदम्बरः समुद्रस्तस्याऽपत्यं कादम्बरी लक्ष्मीस्तस्याः सहोदर्या भगिन्या, लक्ष्मीसुधयोः समुद्र एव जातत्वान्मिथो भगिनीत्वमिति । ननु यद्विबुध-हृदयहर्षदायि स्यात्तदेव ख्यातिजनकं सुधा तु क्व हर्षदायिनीत्याह—कथंभूतया सुधया **हर्षाख्यायिकया** हर्षं मोद-माख्यातीति हर्षाख्यायिका तया, हर्षस्थानदर्शनायाऽऽह—क **हृदि** हृदये, किंसंबन्धिनीत्याह—हृदये कथंभूते **वैबुधे** विबुधानां देवानां संबन्धिनीत्यर्थः । ज्ञातास्वादकत्वेन हि देवानां हृदयेऽमृतं विशेषाद्धर्षं ददातीत्युक्तम् । बाणस्तु **कादम्बरीसहोदर्ये**ति, कादम्बरीकथा तस्या एकधनिकजातत्वेन सहोदर्या भगिन्या **सुधये**ति सु शोभनं धत्त इति सुधा सदाचरणं तेन, यथाऽयं बाणः कादम्बर्या कथया प्रसिद्धिं लब्धवान् तथा सदाचरणेनापि प्राप्तवानिति । अथ बाणकृतकादम्बरीसुधयोः समत्वेन संपन्नं समविशेषणमाह—कथंभूतया सुधया, विबुधानां पण्डितानां सम्बन्धिनि हृदये हर्षाख्यायिकयेति पूर्ववदिति वृत्तार्थः ॥२७॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

शरः पक्षिणो विमदान् करोति तदा ससाहाय्यः किं कुर्यादित्याह—**क्लृप्तसन्धानपुलिन्दकृतसन्निधिः**=क्लृप्तं कृतं संधानं धनुर्ज्यारोपणं येन स क्लृप्तसन्धानः, एवंविधो यः पुलिन्दो भिल्लस्तेन कृतः सन्निधिः सान्निध्यं यस्य स तथा भिल्लहस्तगतचापयोजितः शर इत्यर्थः, **पुनः किमुच्यते,** विशेषेण विगतहर्षान् पक्षिणः कुर्यादित्यर्थः ॥ इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥२६॥

पुनरपि बाणकविं वर्णयति—**कादम्बरी**त्यादिना । बाणः ख्यातिं लब्धवानित्यन्वयः । **बाणः**=कादम्बरीहर्षचरित्रा-दिकर्ता बाणनामा कविः, **ख्यातिं**=प्रसिद्धिम्, लब्धवान्=प्राप्तवान् । कया ख्यातिं लब्धवान्? **हर्षाख्यायिकया**=हर्षस्य हर्षनाम्नो नृपतेः हर्षनृपसम्बन्धिनीति यावत्, या आख्यायिका विदितवृत्तान्तार्था कथा तया तथा, हर्षचरित्रेणेत्यर्थः । कथम्भूतया हर्षाख्यायिकया ? कादम्बरीसहोदर्या=कादम्बरी बाणकविकृता स्वनामख्याता कथा तस्याः सहोदर्या भगिन्या, कादम्बरीहर्षाख्यायिकाकथयोः बाणकविरूपैकजनकजातत्वान्मिथो भगिनीत्वमित्यर्थः । पुनः कथम्भूतया ? **सुधया**=माधुर्यादिनाऽमृतसदृशया । कुत्र ख्यातिं लब्धवान्? वैबुधे हृदि, **वैबुधे**=विबुधसम्बन्धिनि पण्डितसम्बन्धिनीत्यर्थः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**माघेन विघ्नितोत्साहा, नोत्सहन्ते पदक्रमे ।**
**स्मरन्ति भारवेरेव, कवयः कपयो यथा ॥२८॥ [ पथ्यावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**नोत्सहन्ते**=नोद्यमं कुर्वन्ति, क ? **पदक्रमे**=सुबन्ततिङन्तपदन्यासे, काव्यकरणे इत्यर्थः, **कवयः**=कवितारः, कीदृशाः सन्तः ? **विघ्नितोत्साहाः**=भग्नोद्यमाः, केन ? **माघेन**=काव्येन कविनाऽतिगम्भीरार्थपदरचितमहाकाव्यत्वात्, तर्हि किं कुर्वन्ति ? **स्मरन्ति**=ध्यायन्ति, कस्य ? **भारवेरेव**=कवेः, कर्मणि षष्ठीयम्, भारविं कविं स्मरन्ति, भारविरेव माघतुल्य इत्यर्थः। क इव नोत्सहन्ते स्मरन्ति च ? **कपयो**=यथा वानरा नोत्सहन्ते, क **पदक्रमे**=पदन्यासे, किंभूताः सन्तः ? **विघ्नितोत्साहा**=भग्नोद्यमाः, केन ? माघेन=माघमासेनातिशीतेन, केवलं **स्मरन्ति**=ध्यायन्ति, काः ? **भाः**=रश्मीन्, कस्य ? **रवेः**=आदित्यस्य, कदा रवेः रश्मयः प्रकटीभविष्यन्तीति ॥२८॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ माघकविं स्तुवन्नाह–**माघेने**ति। व्याख्या० **माघेन** माघमासेन विघ्नितः स्खलितः प्रतितरुप्रतिशाखपर्यटनसत्क उत्साहो येषां ते चैवंविधाः **कपयो** वानरा यथा **पदक्रमे** चरणसंचारे **नोत्सहन्ते** नैवोत्साहवन्तो भवन्ति शीतार्त्तत्वात्, तथा **माघेन** माघनाम्ना कविना विघ्नितस्तच्छक्तिविशेषापेक्षया स्वशक्त्यल्पीयस्त्वदर्शनेन काव्यरचनाभ्यासे भग्न उत्साहो येषां ते तथा, **कवयः** पण्डिताः **पदक्रमे** पदरचनायां नोत्सहन्ते, माघकविविरचितशास्त्रं दृष्ट्वा नाऽस्माकमीदृशं कल्पान्तेऽप्यायास्यतीत्युत्साहभङ्गपुरःसरं पदमात्रमपि नैव रचयन्तीत्यर्थः। अथ यद्येवं तर्हि कवयः कपयश्च किं कुर्वन्तीत्याह–माघमासशीतार्त्ता हि कपयो **रवेः** सूर्यस्य **भाः** किरणान् स्मरन्ति, कदा शीतापहारी सूर्योदयो भावीति चिन्तयन्तीत्यर्थः। कवयस्तु माघकविशक्तिदर्शनाद्गलितस्वशक्तयो **भारवेरि**ति भारविनाम्नः कवेः शक्तिं स्मरन्ति, माघतुल्यस्तु भारविकविरेव जात इति चिन्तयन्तीति वृत्तार्थः ॥२८॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

**हृदि**=हृदये। कया क इव ख्यातिं लब्धवान् ? सुधया अब्धिरिव, **अब्धिरिव**=यथा समुद्रः, **सुधया**=अमृतेन, **ख्यातिं**=प्रसिद्धिम्, लब्धवान्, कीदृश्या सुधया ? **कादम्बरीसहोदर्या**=कादम्बरी मदिरा तस्याः सहोदर्या भगिन्या, सुधामदिरयोः समुद्रजातत्वप्रवादादुभयोर्मिथो भगिनीत्वम्, पुनः। कीदृश्या सुधया ? **हर्षाख्यायिकया**=हर्षस्यानन्दस्य आख्यायिकया प्रतिपादिकया, सुधामास्वाद्य वक्ति जनोऽतीवानन्दो जात इति। कुत्र ख्यातिं लब्धवान् ? **वैबुधे**=विबुधसम्बन्धिनि देवसम्बन्धिनि, **हृदि**=हृदये, सुधामास्वादयन्ति देवा इति कविजनप्रसिद्धिः। इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥२७॥

माघकविं भारविकविं च वर्णयति **माघेने**त्यादिना। 'माघेन विघ्नितोत्साहाः कवयः पदक्रमे नोत्सहन्ते, [किन्तु] भारवेरेव स्मरन्ति' इत्यन्वयः। **माघेन**=शिशुपालवधाभिधकाव्यकारेण माघनाम्ना कविना, **विघ्नितोत्साहाः**=हतोत्साहा विगलितकाव्यकरणरसाः सन्तः, **कवयः**=काव्यकाराः, **पदक्रमे**=पदानां पदसंज्ञकानां विभक्त्यन्तशब्दानां क्रमे नियतपूर्वापरभावरूपेऽनुक्रमे रचनायामिति यावत्, काव्यकरणे इति भावः, **नोत्सहन्ते**=नोद्यमं कुर्वन्ति, काव्यकरणाद् विरमन्तीत्यर्थः। अयं भावः–माघकविनिर्मितं निरुपमकाव्यगुणकलितं शिशुपालवधाभिधकाव्यमवलोक्य काव्यकरणेच्छवः कवयश्चिन्तयन्ति, यदुत–एतादृशकाव्यकरणपटौ माघकवौ विद्यमाने सति अस्मन्निर्मितकाव्यस्य विद्वत्परिषदि कदापि नादरो भविष्यत्यतः काव्यमेव न करणीयमिति माघेन हतोत्साहा सन्तः काव्यकरणाद् विरमन्तीति। ननु कवयः काव्य-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**निरोद्धुं पार्यते केन, समरादि त्यजन् मनः ।**
**प्रशमस्य वशीभूतं, समरादित्यजन्मनः ॥२९॥ [ पथ्यावृत्तम् ] ॥**

### 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**निरोद्धुं केन पार्यते**=शक्यते, न केनापीत्यर्थः, किं ? तन्**मनः**=चित्तं, किं कुर्वत् ? **त्यजत्**=मुञ्चत्, किं तत् ? **समरादि**=संग्राममृगयाद्यूतपरस्त्रीगमनप्रभृति दुष्टवस्तु, कथंभूतं ? **वशीभूतं**=आयत्तम्, कस्य ? **प्रशमस्य**=उपशमस्य क्षान्तेरित्यर्थः, किंभूतस्य प्रशमस्य ? **समरादित्यजन्मनः**=समरादित्याद् हरिभद्रसूरिकृतचरमकथायाः सकाशाद् जन्मोत्पत्तिर्यस्य स तथोक्तस्तस्य ॥२९॥

### 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ परमकविं प्रशममन्दिरं समरादित्यपुत्रं स्तुवन्नाह **निरोद्धु**मिति । व्याख्या० **समरादित्यजन्मनः** समरादित्यपुत्रस्य, **समरादि** संग्रामादिकमधिकारं वर्णनावसरं दारुणकृत्यनिरूपणतया **त्यजत् प्रशमस्यो**पशमस्य वशीभूतं **मन**श्चेतः **केन निरोद्धुं पार्यते** न केनाऽपि रुध्यत इत्यर्थः । अयं हि पूर्वं नवरसपोषकत्वेनैकदा वीररसपोषाधिकारे मिथो वीराणां कलहे जायमाने बहुषु वीरेषु पञ्चत्वमाप्तेषु प्राप्तपरमसंवेगो वीररसपोषे चाऽनर्थहेतुतया सावद्यतां विचिन्त्य प्रशमवशीभूते मनसि " न मया अद्यप्रभृति समराद्यधिकारे वीररसः पोष्य " इति प्रतिज्ञां कृतवानिति तेनाऽत्राऽस्यैवं वर्णनमिति वृत्तार्थः ॥२९॥

### 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

करणाद् केवलं विरमन्ति, उतान्यत् किमपि कुर्वन्तीत्याह–भारवेरेव स्मरन्ति, **भारवेरेव**=किरातार्जुनीयाभिधकाव्यकारस्य भारविनाम्नः कवेरेव, **स्मरन्ति**=माघसदृशत्वेन स्मरणं कुर्वन्ति, " स्मृत्यर्थदयेशः " [ २–२–११ ] इति कर्मणि षष्ठी, अतो भारविमेव स्मरन्तीति बोध्यम् । अयं भावः–भो भारवे कविवर ? माघकविना यादृशं निरुपमकाव्यं कृतं तादृशं किरातार्जुनीयाभिधं काव्यं भवतैव रचितं नास्माकं शक्तिरतो माघसदृशो भवानेवेति भारविकविं स्मरन्ति । क इव ? **कपयो यथा**=वानरा इव, वानरपक्षे–**माघेन**=माघमासेन, कार्यकारणयोरभेदाश्रयणाद् माघमासजन्यशीतेनेत्यर्थः । **विघ्नितोत्साहाः**–भग्नोत्साहाः, **कपयः, पदक्रमे**=पादनिक्षेपे, चलने इत्यर्थः, **नोत्सहन्ते**=नोद्यमं कुर्वन्ति, तर्हि किं कुर्वन्तीत्याह–**रवेः**=सूर्यस्य, **भाः**=किरणान् एव, **स्मरन्ति**=ध्यायन्ति, माघमासजन्यशीतदूरीकरणाय सूर्यातपमिच्छन्तीत्यर्थः । अत्र सभङ्गाभङ्गात्मकः पदश्लेषालङ्कारः । पूर्णोपमालङ्कारश्च, तयोः परस्परं नैरपेक्ष्यरूपा संसृष्टिः इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥२८॥

अथ समरादित्याभिधकथाप्रशंसया तत्कर्तुराचार्यवर्यस्य श्रीहरिभद्रसूरेः प्रशंसां सूचयति–**निरोद्धु**मित्यादिना । समरादित्यजन्मनः प्रशमस्य वशीभूतं समरादि त्यजत् [च] मनो निरोद्धुं केन पार्यत इत्यन्वयः । **समरादित्यजन्मनः**=समरादित्यात् श्रीहरिभद्रसूरिविरचितसमरादित्यकथानकाद् जन्म उत्पत्तिर्यस्य तादृशस्य, **प्रशमस्य**=उपशमस्य क्षमागुणस्य, **वशीभूतम्**=अधीनीभूतम्, परमोपशमरसपोषकसमरादित्यकथाश्रवणजनितोपशमरसनिमग्नमित्यर्थः । **समरादि**=संग्रामादि, आदिपदाद् मृगयाद्यूतपरदारगमनादि ग्राह्यम् । **त्यजत्**=मुञ्चत्, **मनः**=चित्तम्, **निरोद्धुं**=निरोधं कर्तुम्, निरुक्तमनस उपशमरसप्रवृत्तिविघातायेत्यर्थः, **केन**=पुरुषविशेषेण, **पार्यते**=शक्यते, न केनापीति काकुः, " भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते । " इति दर्पणोक्तेः । अत्र लाटानुप्रासाख्योऽलङ्कारः । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥२९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**स्पष्टभावरसा चित्रैः, पदन्यासैः प्रनर्त्तिता ।**
**नाटकेषु नटस्त्रीव, भारती भवभूतिना ॥३०॥ [ पथ्यावृत्तम् ] ॥**
**दृष्ट्वा वाक्पतिराजस्य, शक्तिं गौडवधोद्धुराम् ।**
**बुद्धिः साध्वसरुद्धेव वाचं न प्रतिपद्यते ॥३१॥ [ पथ्यावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**प्रनर्त्तिता**=प्रकर्षेण नर्त्तनं कारिता विस्फारितेत्यर्थः, का ? **भारती**=वाणी, केन ? **भवभूतिना** कविना, केषु ? **नाटकेषु**=वीरचरित्रोत्तरचरित्रादिषु, कथंभूताः ? **स्पष्टभावरसा**=व्यक्तशोकादिभावशृंगारादिरसा, कैः प्रनर्त्तिता ? **पदन्यासैः**=सुबन्ततिङन्तपदरचनाभिः, किंभूतैः ? **चित्रैः**=नानारूपैः समासादिभेदेन, केव ? **नटस्त्रीव**=भरतभार्येव, यथा नटी नटेन प्रनर्त्यते, कैः ? **पदन्यासैः**=पादनिक्षेपैः, कीदृशैः ? **चित्रैः**=जनाश्चर्यकारिभिरनेकप्रकारैर्वा, कीदृशी ? **स्पष्टभावरसा**=स्पष्टभावा व्यक्तस्वररूपा रसाः शृङ्गारादयो यस्याः सा तथोक्ता, भावरसा च अभिप्रायाग्रहो (?) नर्तने यस्याः सा तथोक्ता, यद्वा पूर्ववद्व्याख्या ॥३०॥

**बुद्धिः**=मतिः, **न प्रतिपद्यते**=न गृह्णाति न स्वीकरोति, कां ? **वाचं**=वचनं काव्यकरणे न प्रवर्त्तते, कथंभूतेव ? **साध्वसरुद्धेव**=भयनिषिद्धेव, किं कृत्वा ? **दृष्ट्वा**=अवलोक्य, कां ? **शक्तिं**=सामर्थ्यम्, कस्य ? **वाक्पतिराजस्य**=बृहस्पतिराजस्य, किंभूतां ? **गौडवधोद्धुरां**=गौडवधो नामातिशायिगाथाकोशकाव्यशास्त्रं तत्र उद्धुरामुद्भटामन्यत्र **वाक्पतिराजस्य**=जयवर्मराजस्य (जयवर्मणो राज्ञः), **शक्तिं**=प्रहरणविशेषं **दृष्ट्वा**, किंभूतां ? **गोडवधोद्धुरां**=गौडानां गौडनृपाणां यो वधो घातः तत्रोद्धुरामुद्भटाम्, बुद्धिः साध्वसरुद्धेव वाचं न प्रतिपद्यते, भयेन मुखाद् वचनं न निःसरतीत्यर्थः ॥३१॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ भवभूतिं स्तुवन्नाह–**स्पष्टभावे**ति–व्याख्या० **नाटकेषु** नाट्यशास्त्रेषु नृत्येषु च, **इव** यथा **नटस्त्री** नृत्यकरी तथा **भारती** वाणी **भवभूतिना** भवभूतिनाम्ना कविना **प्रनर्तिता** नृत्यं कारिता, यथा नटस्त्री नाटकेषु नृत्यति तथा नाटकशास्त्रेषु भवभूतिभारती विलासापन्नत्वेन नृत्यतीवेत्यर्थः । नटस्त्रीभारत्योः साम्यं दर्शयति, कैः कृत्वा प्रनर्तितेति करणं दर्शयति, कैः **पदन्यासैः**, नटस्त्र्यर्थे चरणन्यासैर्भारत्यर्थे विभक्त्यन्तपदन्यासैः, कथंभूतै**श्चित्रै**र्विचित्रैश्चरणन्यासैः, विभक्त्यन्तपदन्यासार्थे तु चिज्ज्ञानं त्रायन्तीति चित्रास्तैश्चित्रैः । अथ कथंभूता भारती **स्पष्टभावरसा,** स्पष्टो भावो येषां ते स्पष्टभावा रसाः शृङ्गारादिका यस्याः सा स्पष्टभावरसा, नटस्त्रीपक्षे तु कथंभूता सा स्पष्टभा स्पष्टा भाः कान्तिर्यस्याः सा स्पष्टभा, पुनः कथंभूता वरसा, वरा प्रधाना सा लक्ष्मीर्यस्याः सा वरसेत्युभयोः साम्यमिति वृत्तार्थः ॥३०॥

अथ वाक्पतिराजकविं स्तुवन्नाह–**दृष्ट्वा वे**ति, व्याख्या० **वाक्पतिराजस्य** वाक्पतिराजनाम्नः कवे**र्गौडवधोद्धुरां** गौडवधकाव्यरचनोध्धुरां शक्तिं दृष्ट्वेवोत्प्रेक्ष्यते, **साध्वसरुद्धा** भयाक्रान्ता बुद्धि**र्वाचं** गिरं न प्रतिपद्यते, कवीनां हि काचिद् बुद्धिर्भवत्येव परं तच्छक्तिं दृष्ट्वा नैतादृशं मया कर्तुं शक्यमिति कृत्वा न मुखे सा बुद्धिरायात्यन्तरेव विलयं यातीत्यर्थ इति वृत्तार्थः ॥३१॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

अथ भवभूतिनामानं कविं वर्णयति–**स्पष्टभावरसे**त्यादिना । भवभूतिना भारती प्रनर्तितेत्यन्वयः । **भवभूतिना**= भवभूतिनाम्ना कविना, **भारती**=वाणी, **प्रनर्तिता**=प्रकर्षेण नर्तनं कारिता, विस्फारितेत्यर्थः । कुत्र प्रनर्तिता ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भद्रकीर्त्तेर्भ्रमत्याशाः, कीर्त्तिस्तारागणाध्वना ।**
**प्रभा ताराधिपस्येव, श्वेताम्बरशिरोमणेः ॥३२॥ [ पथ्यावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**भद्रकीर्त्तेः**=बप्पभट्ट्याचार्यस्य **भ्रमति**=पर्यटति, का ? **कीर्त्तिः**, का ? **आशाः**=दिशः, केन ? **तारागणाध्वना**=तारागणाभिधानकाव्यमार्गेण, किंभूतस्य भद्रकीर्त्तेः ? **श्वेताम्बरशिरोमणेः**=श्वेतपटमुनिनायकस्य, कस्येव का भ्रमति ? **प्रभा**=कान्तिः, यथा **ताराधिपस्य**=चन्द्रस्य भ्रमति, का ? **आशाः**=दिशः, केन ? **तारागणाध्वना**=आकाशेन, ताराधिपस्यापि किंभूतस्य ? **श्वेताम्बरशिरोमणेः**=श्वेतश्चासौ अम्बरशिरोमणिश्चाकाशमूर्द्धरत्नं च स तथोक्तस्तस्याकाशभूषणस्येत्यर्थः ॥३२॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

श्वेताम्बरशासनोन्नतिकारिणं भद्रकीर्त्तिनामानं कविं स्तौति, **भद्रकीर्त्तेरिति**–व्याख्या० **भद्रकीर्त्तेः** कवीश्वरस्य कीर्त्तिस्**तारागणाध्वना** व्योममार्गेणाऽऽ**शा** दिशः प्रति **भ्रमति** पर्यटति, **इव** यथा **ताराधिपस्य** चन्द्रस्य प्रभा कान्तिर्व्योममार्गेण दिशः प्रति भ्रमति । अथौपम्योपमेययोश्चन्द्रभद्रकीर्त्त्योर्विशेषणसाम्यं दर्शयति, कथंभूतस्य भद्रकीर्त्तेः **श्वेताम्बरशिरोमणेः** श्वेतवासोधारिसाधुशिरोरत्नस्येत्यर्थः, चन्द्रस्य कथंभूतस्य श्वेताम्बरशिरोमणेः श्वेतं यदम्बरमाकाशं तत्र सर्वग्रहाधिपत्येन शोभाकारित्वाच्छिरोमणेरिति वृत्तार्थः ॥३२॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

**नाटकेषु**=ख्यातवृत्तेषु वीरचरित्रादिषु नाटकग्रन्थेषु, कैः प्रनर्तिता ? **पदन्यासैः**=पदानां विभक्त्यन्तशब्दानां न्यासैः रचनाभिः, कीदृशैः पदन्यासैः ? **चित्रैः**=समासादिभेदेन विविधप्रकारैः । प्रनर्तिता सती भारती कीदृशी जाता ? **स्पष्टभावरसा**=स्पष्टो व्यक्तो भावोऽभिप्रायो रसः शृङ्गारादिर्यस्यां सा तथा । केव ? **नटस्त्रीव**=नटी इव, तत्र नटीपक्षे **भवभूतिना**=भवस्य महादेवस्य भूतिर्नृत्यकलारूपा विभूतिर्यस्य स भवभूतिर्नृत्यकलाकुशलो नटस्तेन, **नटस्त्री**=नटी, **प्रनर्तिता**=प्रकर्षेण नर्तनं कारिता, कैः प्रनर्तिता ? **पदन्यासैः**=चरणविन्यासैः, कीदृशैः पदन्यासैः ? **चित्रैः**=जनाश्चर्यकारिभिः विविधप्रकारैर्वा, कुत्र प्रनर्तिता ? **नाटकेषु**=नाटकक्रियासु, प्रनर्तिता सती नटी कीदृशी जाता ? **स्पष्टभावरसा**=स्पष्टो व्यक्तोऽभिनयेन ज्ञाप्यमानो भावो भ्रूविक्षेपादिरूपः रसः शृङ्गारादिको यस्या सा तथा, उभयत्रास्तीति शेषः । अत्र श्लेषानुप्राणिन्युत्प्रेक्षालङ्कृतिः ॥ इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥३०॥

अथ वाक्पतिराजनामानं कविं वर्णयति–**दृष्ट्वे**त्यादिना । वाक्पतिराजस्य गौडवधोद्धुरां शक्तिं दृष्ट्वा बुद्धिः साध्वसरुद्धेव वाचं न प्रतिपद्यत इत्यन्वयः । **वाक्पतिराजस्य**=गौडवधकाव्यकारस्य वाक्पतिराजनाम्नः कवेः, **गौडवधोद्धुरां**=गौडवधे 'गउडवहो' इति प्रसिद्धे गौडवधनाम्नि काव्ये उद्धुरां दृढाम्, **शक्तिं**=बुद्धिवैभवम्, **दृष्ट्वा**=अवलोक्य, **बुद्धिः**=मतिः, **साध्वसरुद्धेव**=साध्वसेन भयेन रुद्धा इव प्रतिहता इव, **वाचं**=वचनम्, **न प्रतिपद्यते**=न गृह्णाति, काव्यकरणे न प्रवर्तत इत्यर्थः, केषां बुद्धिरिति जिज्ञासायां कविजनानामिति शेषः, इत्येकोऽर्थः, अयं द्वितीयोऽर्थः–**वाक्पतिराजस्य**=गौडवधकाव्ये वर्णितस्य यशोवर्मराजस्य, **गौडवधोद्धुरां**=गौडानां गौडदेशनृपाणां वधे मारणे उद्धुरामुद्भटां दृढाम्, **शक्तिं**=प्रहरणविशेषं सामर्थ्यं वा, **दृष्ट्वा**=अवलोक्य, **बुद्धिः**=मतिः, **साध्वसरुद्धेव**=भयप्रतिहतेव, **वाचं**=वचनम्, **न प्रतिपद्यते**=न गृह्णाति, भयेन मुखाद् वचनं न निस्सरतीत्यर्थः । अत्रोत्प्रेक्षालङ्कारः ॥ इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रदर्शितम् ॥३१॥

अथ बप्पभट्टिसूरिवरं प्रशंसति–**भद्रकीर्त्ते**रित्यादिना । भद्रकीर्त्तेः कीर्त्तिर्भ्रमतीत्यन्वयः । **भद्रकीर्त्तेः**=श्रीबप्पभट्ट्याचार्यस्य, **कीर्त्तिः**=यशः, **भ्रमति**=विचरति । कीदृशस्य भद्रकीर्त्तेः ? **ताराधिपस्य**=ताराणां निर्मलानां जना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**समाधिगुणशालिन्यः, प्रसन्नपरिपक्त्रिमाः ।**
**यायावरकवेर्वाचो, मुनीनामिव वृत्तयः ॥३३॥ [ पथ्यावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**वाचो** वर्त्तन्ते, कस्य ? **यायावरकवे** राजशेखरस्य, **समाधिगुणशालिन्यः**=समाधिलक्षणो यो गुणः शब्दालङ्कारविशेषस्तेन शालिन्यः श्लाघावत्यः, **प्रसन्नपरिपक्त्रिमाः**=प्रसादवत्परिणताः । का इव केषां ? **वृत्तय इव**=व्यापारा इव, **मुनीनां**=यतीनाम्, **समाधिगुणशालिन्यः**=समाधानगुणश्लाघावत्यो यद्वा समाधिश्च गुणाश्च क्षान्त्यादयस्तैः शोभावत्यस्तथा **प्रसन्नपरिपक्त्रिमा**=निर्मलाः स्वर्गापवर्गफलपाकनिर्वृत्ताः ॥३३॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ वरकविगिरः स्तुवन्नाह-**समाधे** इति, व्याख्या० या या मुनीनां वृत्तय इव वरकवेर्वाचः सन्ति, कीदृशा वाचो मुनिवृत्तयश्चेत्युभयोर्विशेषणसाम्यं दर्शयति, **गुणशालिन्यो** गुणप्रधानाः प्रसन्नाः परिपाकशीलाः पक्त्रिमा इति, ताः किमित्याह **समाधे** स्मरामीति वृत्तार्थः ॥३३॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

नामधिपस्य स्वामिनः, पुनः कीदृशस्य ? **श्वेताम्बरशिरोमणेः**=श्वेताम्बरा जैनमुनयस्तेषु शिरोमणेः मुकुटसदृशस्य, श्वेताम्बरमुनिनायकस्येत्यर्थः, कीदृशी कीर्तिः ? **प्रभा**=प्रकर्षेण भातीति प्रभा, प्रकर्षेण शोभमानेत्यर्थः । कुत्र भ्रमति ? **आशाः**=दिशः, व्याप्तिविवक्षया द्वितीया, तथा च सर्वासु दिक्षु इत्यर्थः । केन भ्रमति ? **तारागणाध्वना**=तारागणस्तारागणनामा काव्यग्रन्थस्तद्रूपेणाध्वना मार्गेण, तारागणाभिधकाव्यग्रन्थद्वारेत्यर्थः, कस्य केव ? ताराधिपस्य **प्रभेव**, **ताराधिपस्य**=चन्द्रस्य, **प्रभेव**=ज्योत्स्ना इव, कीदृशस्य चन्द्रस्य ? **श्वेताम्बरशिरोमणेः**=श्वेतं धवलं यद् अम्बरमाकाशं तस्य शिरोमणेः शिरोरत्नस्य । पुनः कीदृशस्य चन्द्रस्य ? **भद्रकीर्त्तेः**=चारुयशसः । कुत्र प्रभा भ्रमति ? **आशाः**=प्राग्वदर्थः, केन प्रभा भ्रमति ? **तारागणाध्वना**=तारागणस्य अध्वा मार्ग आकाशं तेन, आकाशद्वारेत्यर्थः । अत्र श्लेषानुप्राणिन्युत्प्रेक्षा, इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥३२॥

यायावरापराभिधानं राजशेखरकविं वर्णयति-**समाधिगुणे**त्यादिना । यायावरकवेर्वाचः [सन्तीति शेषेण] अन्वयः । **यायावरकवेः**=राजशेखरनाम्नः कवेः, **वाचः**=वचनानि, सन्तीति शेषः । यद्वा **वरकवेः**=उत्तमकाव्यकारस्य, **या या वाचः**=वचनानि, तास्ताः समाधिगुणादिविशेषणसहिताः सन्तीत्यर्थः । कथम्भूता वाचः ? समाधिगुणशालिन्यः प्रसन्नपरिपक्त्रिमाश्च, **समाधिगुणशालिन्यः**=समाधिः "समाधिः सुकरे कार्ये दैवाद् वस्त्वन्तरागमाद्" इत्युक्तः समाधिलक्षणोऽलंकारः, स एव गुणस्तेन, यद्वा गुणाः="गुणा माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा" इति साहित्योक्ता रसधर्मास्तैः शालन्ते श्लाघावत्यो भवन्तीति समाधिगुणशालिन्यः, 'शाडृ् श्लाघायाम्' इत्यस्य डस्य लत्वम् । **प्रसन्नपरिपक्त्रिमाः**=प्रसन्नाः "चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः । स प्रसादः समस्तेषु रसेषु रचनासु च ॥" इति साहित्योक्तो यः प्रसादाख्यो गुणस्तेन युक्ताः, परिपक्त्रिमाः परिपाकेन नैपुण्येन निर्वृत्ताः । का इव वाचः सन्ति ? मुनीनामिव वृत्तयः, **मुनीनां**=संयमधारिणाम्, **वृत्तय इव**=अन्तःकरणपरिणामा इव । इमा अपि तादृश्यस्तथाहि-**समाधिगुणशालिन्यः**=समाधिः ध्येयवस्तुनि एकाग्रतया मनसः स्थापनं स एव गुणस्तेन, यद्वा गुणाः क्षमाप्रभृतयस्तैः शालन्ते श्लाघावत्यो भवन्तीति समाधिगुणशालिन्यः । **प्रसन्नपरिपक्त्रिमाः**=प्रसन्ना निर्मलाः संतुष्टाः कृतानुग्रहविशेषा वा, परिपक्त्रिमाः परिपाकेन नैपुण्येन निर्वृत्ताः । अत्र श्लेषानुप्राणिन्युत्प्रेक्षालङ्कारः, इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥३३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सूरिर्महेन्द्र एवैको, वैबुधाराधितक्रमः ।**
**यस्यामर्त्योचितप्रौढि,-कविविस्मयकृद् वचः ॥३४॥ [ पथ्यावृत्तम् ] ॥**
**स मदान्धकविध्वंसी, रुद्रः कैर्नाभिनन्द्यते ? ।**
**सुश्लिष्टललिता यस्य, कथा त्रैलोक्यसुन्दरी ॥३५॥ [ पथ्यावृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

महेन्द्र **एवैको**=ऽद्वितीयः, **सूरिः**=आचार्यो वर्त्तते, **वैबुधाराधितक्रमः**=विविधविद्वद्वृन्दसेवितपादः, **यस्य**=महेन्द्रसूरेर्**वचो**=वचनमस्ति, कीदृशम् ? **अमर्त्योचितप्रौढिकविविस्मयकृद्**=अमर्त्योचितप्रौढयो देवयोग्यप्रौढता ये कवयः कवितारस्तेषां विस्मयकृद् आश्चर्यकारि, अन्यत्र **महेन्द्र एव** देवराज एवैकः **सूरिः**=विद्वान्, कीदृशो ? **वैबुधाराधितक्रमो**=देवसमूहसेवितचरणो, **यस्य**=महेन्द्रस्य **वचोऽमर्त्योचितप्रौढिकविविस्मयकृद्**=अमर्त्यो देवः, उचितप्रौढिश्च योग्यप्रौढिमा च यः कविर्बृहस्पतिस्तस्य विस्मयकृद्=आश्चर्यकारि ॥३४॥

स **रुद्रो**=रुद्राभिधानः कविः, कैर्नाभिनन्द्यते सर्वैरपि प्रशस्यते, कीदृशो ? **मदान्धकविध्वंसी**=मदान्धा दर्पान्धा ये कवयस्तान् ध्वंसते तिरस्करोति पराभवतीति स तथोक्तः । यस्य कथा वर्त्तते, किमाख्या ? त्रैलोक्यसुन्दरी, किंभूता ? **सुश्लिष्टललिता**=पुष्टश्लेषघना लालित्ययुक्ता चान्यत्र **रुद्रो**=हरः, कैर्नाभिनन्द्यते ? सर्वैरपि प्रशस्यते, कीदृशः ? **समदान्धकविध्वंसी**=समदो मदसहितोऽन्धकोऽन्धकासुरस्तस्य विध्वंसी विघाती, यस्य **सुश्लिष्टललिता**=आलिङ्गनवती गौरी, किंभूता ? **त्रैलोक्यसुन्दरी**=त्रैलोक्ये त्रिभुवनमध्ये सुन्दरी सौन्दर्ययुक्ता ॥३५॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अस्य चतुस्त्रिंशत्तमस्य श्लोकस्य श्रीमत्पद्मसागरविबुधरचिता व्याख्या नोपलभ्यते ।

अथ रुद्रकविं रुद्रोपमया स्तुवन्नाह-[ **समदान्धे**ति ] स रुद्रः कैर्नाऽभिनन्द्यते न स्तूयतेऽपि तु सर्वैरपि स्तूयते, कथमित्याह-कथमिति विशेषणद्वारा तत्स्वरूपं दर्शयति, कथंभूतो रुद्रो **मदान्धकविध्वंसी** रुद्रकविपक्षे तु मदेनाऽन्धा ये कवयस्तान् मदोत्तारेण ध्वंसत इति मदान्धकविध्वंसी । ईश्वरपक्षे तु सह मदेन वर्तते यः स समद एवंविधो योऽन्धको दैत्यविशेषस्तं ध्वंसत इति तद्ध्वंसी । प्राप्तरुद्रोपमानः कोऽसौ कविरित्याशङ्कयाऽऽह-यस्य कृतिरूपा त्रैलोक्यसुन्दरी-नाम्नी कथा, सुश्लिष्टानि मनोज्ञानि ललितानि वाक्यानि यस्यां सा तथाऽस्तीत्यध्याहारः, कोऽसावीश्वर इत्याशङ्कायामीश्वरपक्षे तु यस्येश्वरापरपर्यायस्य रुद्रस्य कथा चरित्रमवदात इति यावत्, त्रैलोक्यसुन्दरी त्रिलोक्यां बन्धुरा सती सुश्लिष्टं प्रशस्यं ललितं चेष्टितं यस्याः सा सुश्लिष्टललिताऽस्तीति वृत्तार्थः ॥३५॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

अथ स्वधर्मगुरुं स्वबन्धुशोभनमुनिदीक्षागुरुं च महेन्द्रसूरिवरं कविवरं स्तौति-**सूरिरि**त्यादिना । [स] महेन्द्र एवैकः सूरिः [अस्ति] इत्यन्वयः । उत्तरदले यच्छन्दोपादानेन तच्छब्दार्थाक्षेपात् स इत्यध्याहार्यम्, तथा च स **महेन्द्रः**=महेन्द्रनामा, **एव, एकः**=अद्वितीयः, **सूरिः**=आचार्यो विद्वांश्च, अस्तीतिशेषः । कीदृशः ? **वैबुधाराधितक्रमः**=विविधा बुधाः पण्डिता विबुधास्तेषां समूहो वैबुधं तेन. यद्वा वै निश्चयेन बुधैः पण्डितैराराधितौ सेवितौ क्रमौ पादौ यस्य स तथा, नानाविद्वत्सेवितपाद इत्यर्थः । स कः ? **यस्य**=महेन्द्रसूरेः, **वचः**=वचनम्, अस्तीति शेषः । कीदृशं वचनम् ? **अमर्त्योचितप्रौढिकविविस्मयकृद्**=अमर्त्या देवास्तेषामुचिता योग्या प्रौढिः प्रौढता निपुणता येषां तादृशा ये कवयः काव्यकारास्तेषां विस्मयकृद् आश्चर्यजनकम् । यद्वा **आमर्त्योचितप्रौढि**=आ समन्ताद्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सन्तु कर्दमराजस्य, कथं हृद्या न सूक्तयः ।**
**कविस्त्रैलोक्यसुन्दर्या, यस्य प्रज्ञानिधिः पिता ॥३६॥ [ पथ्यावृत्तम् ] ॥**

卐 अस्य षट्त्रिंशत्तमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ॥ 卐

### 卐 श्रीमत्पद्मसागरविबुधविरचिता व्याख्या 卐

अथ तदङ्गजं कविराजं कर्दमराजं स्तुवन्नाह—**सन्त्वि**ति, व्याख्या० कर्दमराजस्य कवेः **सूक्तयः** शोभनानि वाक्यानि कथं न हृदयं हरन्तीति हृद्याः **सन्तु** भवन्तु, पञ्चमी चाऽत्र क्रियादेशादतिप्रशंसां सूचयति । ननु कोऽसौ कर्दमराजो यद्वाक्यातिप्रशंसा विहितेत्याशङ्क्य तत्स्वरूपं दर्शयति, कविरिति, यस्य कर्दमराजस्य त्रैलोक्यसुन्दर्याः कविः कर्ता रुद्रनामा पिताऽभूत्, यस्येदृशः पिता स कथं न प्रशस्यवाक्यो भवतीति । ननु पितुर्गुणाधिकत्वेऽपि पुत्रस्य कस्यचिन्नीचतादर्शनादस्याऽपि तथा भविष्यतीत्याशङ्कापाकरणार्थमाह—कथंभूतस्य यस्य **प्रज्ञानिधे**र्बुद्धिनिधानस्य तथा चाऽस्याऽपि स्वपितुरिव गुणवत्तया प्रशस्यवाक्यत्वमिति वृत्तार्थः ॥३६॥

### 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

मर्त्यैर्मानवैरुचिता परिचिता प्रौढिर्निपुणता यस्य तत् तथा, **कविविस्मयकृच्च** । इत्येकोऽर्थः, अयं द्वितीयोऽर्थः—स **महेन्द्रः**=महान् इन्द्र **एव, एकः**=अद्वितीयः, **सूरिः**=विद्वान्, अस्तीति शेषः, कीदृशः ? **वैबुधाराधितक्रमः**= विबुधानां देवानां समूहो वैबुधं तेन आराधितौ सेवितौ क्रमौ चरणौ यस्य स तथा, स कः ? **यस्य**=महेन्द्रस्य देवराजस्य, **वचः**=वचनम्, अस्तीति शेषः, कीदृशम् ? **अमर्त्योचितप्रौढिकविविस्मयकृद्**=अमर्त्यो देवरूपः, उचितप्रौढिश्च यः कविर्बृहस्पतिस्तस्य विस्मयकृद् आश्चर्यजनकम् । यद्वा अमर्त्यैर्देवैरुचिता परिचिता प्रौढिः प्रौढता सामर्थ्यं वा यस्य तादृशम्, कविविस्मयकृच्च=कवेः कविगुणयुक्तत्वाद् बृहस्पतेः विस्मयकृद् आश्चर्यजनकम् । अत्राऽतिशयोक्तिरलङ्कारः श्लेषश्च, तयोः परस्परं नैरपेक्ष्यात् संसृष्टिः । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥३४॥

त्रैलोक्यसुन्दरीकथाकारं रुद्रकविं वर्णयति—**स मदान्धे**त्यादिना । स रुद्रः कैर्नाभिनन्द्यत इत्यन्वयः । **स रुद्रः**= रुद्रनामा कविः, **कैः**=सहृदयैः, **नाभिनन्द्यते** ?=न प्रशस्यते ? अर्थात् सर्वैरपि प्रशस्यत इति काकुः । कीदृशो रुद्रः ? **मदान्धकविध्वंसी**=मदेन गर्वेण अन्धा ये कवयस्तान् ध्वंसयति पराभवति मदरहितान् करोतीति तथा । स कः ? **यस्य**=रुद्रकवेः, **त्रैलोक्यसुन्दरी**=त्रैलोक्यसुन्दरीनाम्नी, **कथा,** अस्तीति शेषः, कीदृशी कथा ? **सुश्लिष्टललिता**=सुश्लिष्टा शोभनश्लेषयुक्ता चारुश्लेषाख्यालङ्कारालङ्कृतेत्यर्थः, ललिता लालित्ययुक्ता च, इत्येकोऽर्थः, अयं द्वितीयोऽर्थः=अत्र पक्षे सशब्दस्यान्यत्र योजनाद् उत्तरत्र यच्छब्दोपादानाच्च स इत्यध्याहार्यम् । **स रुद्रः**=शङ्करः, **कैः**=जनविशेषैः, **नाभिनन्द्यते** ?=न प्रशस्यते ? कीदृशः शङ्करः ? **समदान्धकविध्वंसी**=समदो मदसहितो योऽन्धकोऽन्धकासुरस्तं विध्वंसयति नाशयतीति तथा, स कः ? **यस्य**=शङ्करस्य, **सुश्लिष्टललिता**=सु सुतरां श्लिष्टा आलिङ्गिता ललिता ईप्सिता गौरीनाम्नी नारी, अस्तीति शेषः, कीदृशी गौरी ? **त्रैलोक्यसुन्दरी**=त्रैलोक्ये त्रिभुवने सुन्दरी सौन्दर्यशालिनी । अत्रोत्प्रेक्षालङ्कारः श्लेषालङ्कारोऽतिशयोक्तिरलङ्कारश्च, एतेषां मिथोऽङ्गाङ्गिभावेन संकरः । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥३५॥

रुद्रकवितनयं कर्दमराजकविं वर्णयति—**सन्तु कर्दमे**त्यादिना । [तस्य] कर्दमराजस्य सूक्तयो हृद्याः कथं न सन्तु ? इत्यन्वयः । तस्येत्यध्याहार्यमुत्तरदले यदुपादानाद्, तथा च तस्य **कर्दमराजस्य**=कर्दमराजनाम्नः कवेः, **सूक्तयः**=

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**केचिद् वचसि वाच्येऽन्ये, केऽप्यशून्ये कथारसे ।**
**केचिद् गुणे प्रसादादौ, धन्याः सर्वत्र केचन ॥३७॥ [ पथ्यावृत्तम् ] ॥**

**अस्त्याश्चर्यनिधानमर्बुद इति ख्यातो गिरिः खेचरैः,**
**कृच्छ्राल्लङ्घितदिग्विलङ्घिशिखरग्रामोऽग्रिमः क्ष्माभृताम् ।**
**मैनाकेन महार्णवे हरतनौ सत्या प्रवेशे कृते,**
**येनैकेन हिमाचलः शिखरिणां पुत्रीति लक्ष्योऽभवत् ॥३८॥ [ शार्दूलविक्रीडितवृत्तम् ] ॥**

---

卐 अस्य सप्तत्रिंशत्तमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पकं नास्ति ॥ 卐

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ कथाप्रारम्भोद्यतः कवीनां तारतम्यं दर्शयति, **केचिदि**ति, व्याख्या० **केचित्** कवयो दक्षत्वेन **वचसि** वाक्कलायां **धन्याः स्यु**र्वक्तुमेव जानन्तीत्यर्थः । **केचिद**न्ये कवयो **वाच्ये**ऽवसरोचितनिरूपणीये धन्याः स्युः, पूर्वेषामिवैतेषां सर्वदैव तथाविधवाक्कलाभावेऽप्येते सत्यवसरे तथैव वदन्ति यथा स्वार्थसिद्धिर्भवतीत्युक्तं केचिदन्ये वाच्ये धन्याः स्युरिति । **केऽपि** कवयो**ऽशून्ये** गुणैरवन्ध्ये गुणाढ्ये कथारसे धन्याः स्युस्तथाविधां कथां कथयितुं प्रथितुं चाऽपि जानन्तीत्यर्थः । **केचित्**कवयः प्रासादादौ गुणे राजादेः प्रसन्नताकरणादौ धन्याः स्युः । केचित्कवयः स्वगुणेन राजादिकं प्रसादयन्तीत्यर्थः । **केचन** सर्वाद्भुतभाग्याधिकाः कवयः **सर्वत्र** सकलकलायां दक्षाः स्युरिति कवेस्तारतम्यं दर्शितम् । एतन्निरूपणं च न केनचित्कविना स्वगुणगर्वः कार्योऽधिकाधिकदर्शनादिति सूचनार्थमिति वृत्तार्थः ॥३७॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

शोभना उक्तयो वचनानि, **हृद्याः**=हृदयानन्ददायिन्यः, **कथं न सन्तु ?**=अर्थादवश्यं मानसामोददा भवन्तु । तस्य कस्य ? **यस्य**=कर्दमराजकवेः, **पिता**=जनकः, अस्तीति शेषः । कीदृशः ? **त्रैलोक्यसुन्दर्याः कविः**=त्रैलोक्यसुन्दरीकथाकारः । पुनः कीदृशः ? **प्रज्ञानिधिः**=प्रज्ञायाः "बुद्धिस्तात्कालिकी ज्ञेया मतिरागामिगोचरा । प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः ॥" इत्युक्ताया निधिर्निधानम् । एतेन कविवंशत्वमावेदितम् । यद्वा 'प्रज्ञानिधेः' इति पाठे कर्दमराजविशेषणतया व्याख्येयम् । अत्र कवेर्विशेषवर्णनाद् विशेषालंकारः । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥३६॥

कविविशेषं वर्णयति–**केचिदि**त्यादिना । **केचित्**=कतिपये कवयः, **वचसि**=वचने, **धन्याः**=श्लाघ्याः, वक्तृत्वगुणे निपुणा इत्यर्थः । **अन्ये**=अपरे कवयः, **वाच्ये**=पदार्थे धन्याः, पदार्थज्ञाने निपुणा इत्यर्थः । **केऽपि**=कतिपये च कवयः, **अशून्ये**=सम्पूर्णे, **कथारसे**=कथाया रसे धन्याः, सम्पूर्णकथारसज्ञा इत्यर्थः । **केचित्**=कतिपये कवयः, **प्रसादादौ**=माधुर्यौजःप्रसादाख्ये, **गुणे**=काव्यगुणे धन्याः, काव्यगुणज्ञा इत्यर्थः । **केचन**=कतिचित् कवयः, **सर्वत्र**=वचनार्थपूर्णकथारसप्रसादादिगुणप्रभृतिसर्वविषये धन्याः, अतोऽतीव श्लाघनीया इत्यर्थः । एतेन केनापि कविना स्वगुणगर्वो न कर्तव्य इति सूचितम् । इदं पथ्यावृत्तम्, तल्लक्षणं तु अष्टमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥३७॥

अथाधुना यदभ्यर्थनया प्रस्तुता तिलकमञ्जरी कथा विरचिता स भोजदेवो नृपः कविना वर्णनीयः, स च भोजः प्रशस्तराजवंशजो न तु प्राकृतवंशज इति दर्शनाय वंशो निरूपणीयः, अयं वंशोऽपि अर्बुदगिरौ जात इति यथोक्तं वर्णयितुकामः कविः प्रथममर्बुदगिरिं वर्णयति–**अस्ती**त्यादिना । [स] अर्बुद इति ख्यातो गिरिरस्तीत्यन्वयः । स

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वासिष्ठैः स्म कृतस्मयो वरशतैरस्त्यग्निकुण्डोद्भवो,**
**भूपालः परमार इत्यभिधया ख्यातो महीमण्डले ।**
**अद्याप्युद्गतहर्षगद्गदगिरो गायन्ति यस्यार्बुदे,**
**विश्वामित्रजयोर्जितस्य भुजयोर्विस्फूर्जितं गुर्जराः ॥३९॥ [ शार्दूलविक्रीडितवृत्तम् ] ॥**

---

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

श्रीभोजदेवराजवंशवर्णनपूर्वकभोजदेववर्णनार्थमर्बुदगिरिवर्णनमाह–**अस्ती**त्यादि, **खेचराः**=विद्याधरादयो, **ग्रामः**=समूहः, **सत्या**=गौर्या ॥ ३८ ॥

**वासिष्ठै**रित्यादि, **कृतस्मयो**=विहितगर्वः, **विश्वामित्रजयोर्जितस्य**=विश्वामित्रर्षिपराभवविस्फुरितस्य ॥३९॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ कृतमहानुभावतत्तत्कविनामस्मरणरूपमङ्गलोपचारः कथां ग्रथ्नाति । ननु यथाऽनेनाऽविघ्नपरिसमाप्तये मङ्गलं कृतं, तथा शिष्टाचारपरिपालनाय शिष्टप्रवृत्त्यर्थं च प्रयोजनसम्बन्धावपि दर्शनीयौ, किमर्थमसावेतां कथां ग्रथ्नाति, किं चाऽत्र वाच्यमित्याशङ्क्य प्रथमं प्रयोजनदर्शनार्थमेतदारचयति, **अस्त्याश्चर्ये**ति, व्याख्या० **क्ष्माभृतां** पर्वतानां मध्येऽग्रिमोऽग्रेसरोऽर्बुदनामा **गिरिः** पर्वतोऽस्ति । ननु कुतोऽस्य क्ष्माभृतामग्रिमत्वमित्याशङ्क्य तत्सूचकानि विशेषणान्याह, कथंभूतोऽर्बुद आश्चर्यनिधानं विविधकौतुकान्वितत्वात्, पुनः कथंभूतः **खेचरै**र्विद्याधरैः कृच्छ्रात्कष्टाल्लङ्घितो, दिशो विलम्बत इति दिग्विलम्बी, नभःप्रदेशानामेव दित्त्वेन नभो यावद् व्यापीत्यर्थः, एवंविधः शिखरग्रामः कूटसमूहो यस्य स तथा, अथ पुनरस्याऽतिशयं दर्शयति **मैनाकेने**ति, **येनाऽर्बुदेनैकेन** केवलेन सता **हिमाचलः** पर्वतः **शिखरिणां** पर्वतानां मध्ये **पुत्रीति** पुत्रवानयमिति, लक्ष्म चिह्नमस्याऽस्तीति **लक्ष्म्यो**ऽभवत्, अपरे पर्वतास्तु निरपत्या एव, हिमाचलस्त्वर्बुदेन कृत्वा सापत्यो यतोऽस्य हिमाचलस्याऽपत्यत्रयं, मैनाकपर्वतः पार्वत्यर्बुदाचलश्च । नन्वस्याऽपत्यत्रयस्य सद्भावे कथमेकेनाऽर्बुदाचलेन सापत्यत्वमुक्तमित्याशङ्क्य पार्वतीमैनाकाभ्यां यत्कृतं तद्दर्शयति, मैनाकेन **महार्णवे** महासमुद्रे प्रवेशे कृते सति **सत्या** पार्वत्या **हरतनौ** शम्भुवपुषि प्रवेशे कृते सतीति । मैनाकस्तु महार्णवे प्रविश्याऽदृश्योऽभूत् पार्वती चेश्वरवपुषि प्रविश्याऽदृश्याऽभूत्तथा चाऽपत्यद्वयमस्य निरर्थकमेव जातमेकोऽर्बुदस्तु स्वपितुरभ्यर्णे स्थितत्वेन दृश्यत्वात् सार्थक इति । तेनाऽस्य सापत्यत्वमिति वृत्तार्थः ॥३८॥

अथ किमित्यत्राऽर्बुदे जातमित्येतद्दर्शयति, **वासिष्ठैः स्मे**ति । व्याख्या० अत्र चाऽर्बुदे**ऽग्निकुण्डोद्भवो**ऽग्निकुण्डनामकं कुलं तत्र समुत्पन्नः परमार इत्यभिधया ख्यातो भूपालो राजा**ऽस्ति स्मे**त्यभूत्, स्मयोगे च वर्तमानाऽप्यतीतकालं वक्तीति । कथंभूतः **कृतस्मयः** कृतो निर्मितो स्मयोऽभिमानो येन स कृतस्मयः, कैः सह **वासिष्ठै**र्वसिष्ठवंशोद्भवैः सह, वसिष्ठवंशोद्भवास्त्वस्य वैरिण इति तैः सह, कथंभूतैर्वासिष्ठै **रवशतै** रवानां शब्दानां शतानि वावदूकत्वेन येषां ते तथा तैः । वयमस्यैवं कुर्म इति वदनशीलैरित्यर्थः । अथाऽस्य परमारभूपालस्य स्फूर्जितं वर्णयन्नाह–**अद्याऽपी**ति, विश्वामित्रनाम्ना ऋषिणा दत्तो यो जयस्तेन कृत्वोर्जितस्य परमौजस्विन इत्यर्थः । अस्य हि व्यक्तभक्तितुष्टेन विश्वामित्रर्षिणा सर्वत्र त्वं जयी भूया इति वरः प्रदत्त इतीत्थमुपन्यासः । **यस्य** परमारस्य **भुजयो**र्बाह्वोर्विशेषात् स्फूर्जितं सफलस्फूर्तिमत्त्वं **गुर्जरा** इति गुर्जरदेशजना **अद्याऽपी**त्येतद्ग्रन्थकर्तृकालेऽप्युद्गतः प्रकटितो यो हर्षस्तेन गद्गदा गिरो येषां ते तथैवंविधाः सन्तो गायन्ति, क्वेत्याहा**ऽर्बुदे** पूर्वोक्तपर्वतेऽर्बुदे चाऽस्य युगपदेकबाणविद्धदृषण्मयमहिषवृन्दा दृषण्मयी मूर्तिरद्याऽपि दृश्यत इति वृत्तार्थः ॥३९॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

इत्यध्याहार्यमुत्तरदले यदुपादानात्, स, **अर्बुद इति**=अर्बुद इति नाम्ना, **ख्यातः**=ख्यातिमान्, **गिरिः**=पर्वतः, **अस्ति**=विद्यते, कीदृशोऽर्बुदगिरिः ? **आश्चर्यनिधानम्**=आश्चर्याणामाश्चर्यजनकवस्तूनां निधानं संग्रहस्थानम् । पुनः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मिन्नभूद् रिपुकलत्रकपोलपत्र-
वल्लीवितानपरशुः परमारवंशे।
श्रीवैरिसिंह इति दुर्धरसैन्यदन्ति-
दन्ताग्रभिन्नचतुर्णवकूलभित्तिः ॥४०॥ [ वसन्ततिलकावृत्तम् ] ॥

卐 अस्य चत्वारिंशत्तमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ॥ 卐

卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

ननु ततः किमभूदिति चेत्ततः परमारवंशोऽभूत्तस्मिंश्च वंशे ये भूपा आसंस्तान् निदर्शयति, **तस्मिन्नि**ति, व्याख्या० **तस्मिन्** परमारवंशे वैरसिंह इति नाम्ना भूपोऽभूदथाऽस्य नामसदृशं परिणामं वर्णयति, कथंभूतोऽसौ **रिपुकलत्रकपोलपत्रवल्लीवितानपरशुः** रिपूणां वैरिणां कलत्राणि स्त्रियस्तासां कपोलान्येव पत्रवल्ल्यस्तासां विताने परशुरिव परशुः। पुनः कथंभूतोऽसौ **दुर्धरसैन्यदन्तिदन्ताग्रभिन्नचतुर्णवकूलभित्ति**र्दुर्धरे सैन्ये ये दन्तिनो हस्तिनस्तेषां दन्ताग्राभ्यां भिन्ना चतुर्णवकूलस्य चतुःसमुद्रतटस्य भित्तयो येन स तथेति वृत्तार्थः ॥४०॥

卐 श्रीविजयलावण्यसूरिविरचितापरागाभिधा विवृतिः 卐

कैः कीदृशः ? **खेचरैः**=गगनविहारिभिर्विद्याधरादिभिः, **कृच्छ्राल्लङ्घितदिग्विलङ्घिशिखरग्रामः**=कृच्छ्रात् "स्तोकाल्प-कृच्छ्रकतिपयादसत्त्वे करणे" [२, २, ७९] इति असत्त्वकरणार्थे पञ्चमीविधानात् कृच्छ्रेण कष्टेन लङ्घित उल्लङ्घित इति कृच्छ्राल्लङ्घितः, "असत्त्वे ङसेः" [३, २, १०] इत्यलुप् समासः, दिशो विलङ्घतेऽत्युच्चतया अतिक्राम्यतीति दिग्विलङ्घी, शिखराणां ग्रामः समूहः शिखरग्रामः, खेचरैः कृच्छ्राल्लङ्घितो दिग्विलङ्घी शिखरग्रामो यस्य स तथा, अत एव कीदृशो जात इत्याह-**क्ष्माभृतां**=पर्वतानां मध्ये, **अग्रिमः**=अग्रेसरः। स कः ? **येन**=अर्बुदगिरिणा, **एकेन**=एकाकिना, **हिमाचलः**=हिमालयः पर्वतः, **शिखरिणां**=पर्वतानां मध्ये, **पुत्रीति**=पुत्रवानयमिति, **लक्ष्यः**=ज्ञेयः, **अभूत्**=जातः, हिमाचलोऽर्बुदरूपतनयेन पुत्रवान् इति ज्ञानविषयो जात इत्यर्थः, ननु हिमाचलस्य सन्तानत्रयं वर्तते-पार्वती मैनाकोऽर्बुदश्चेति, तत्र सन्तानद्वयस्य किं जातं ? तेनापि पुत्रवान् भवितुमर्हतीत्याशङ्कापनोदायाह-**मैनाकेन**=मेनकायां हिमाचलपत्न्यां भव इति मैनाकस्तेन, मैनाकनाम्ना पर्वतरूपेण स्वपुत्रेण, **महार्णवे**=महासमुद्रे, **सत्या**=पार्वतीनाम्न्या स्वसुतया च **हरतनौ**=शिवशरीरे, प्रवेशे **कृते**=विहिते सति। अयं भावः-पुरा किल पर्वताः पक्षिवत् पक्षधारिणो बभूवुरुड्डयनं च चक्रुः, एतैर्लोकव्यथा[illegible]लोक्येन्द्रेण वज्रमादाय पक्षच्छेदनकर्म समारब्धम्, अस्मिन्नवसरे मैनाकः समुद्रं प्रविश्यादृश्यो जातः, पार्वती च शिवशरीरं प्रविश्यादृश्या जाता, अवशिष्ट एकोऽर्बुदाचल इत्येकेनैवार्बुद-गिरिणा हिमाचलः पुत्रवान् बभूवेति पौराणिककथामाश्रित्य वृत्तम्। अत्र द्वितीयचरणे छेकानुप्रासालङ्कारः। इदं शार्दूलविक्रीडितवृत्तम्, तल्लक्षणं तु "अतिधृत्यां म्सौ ज्सौतौ गः शार्दूलविक्रीडितं ठैः [ मसजसततगाः, ठैरिति द्वादशभिर्यतिः ] ॥३८॥

निरुक्तार्बुदाचले परमाराभिधस्य भोजवंशस्य परमारनामाद्यपुरुषो जात इति दर्शयितुमाह-**वाशिष्ठै**रित्यादिना। [स] भूपालोऽस्ति स्मेत्यन्वयः। 'स' इत्यध्याहार्यमुत्तरदले यदुपादानात्, स **भूपालः**=राजा, **अस्ति स्म**=बभूव, कीदृशो राजा ? **ख्यातः**=प्रसिद्धः, केन नाम्ना ख्यातः ? **परमार इत्यभिधया**=परमारनाम्ना, कुत्र ख्यातः ? **महीमण्डले**=मण्डलाकारपृथिव्याम्, समस्तवसुंधरायामित्यर्थः। पुनः कीदृशो राजा ? **अग्निकुण्डोद्भवः**=अग्निकुण्डे वसिष्ठकृतहोमसत्काग्निकुण्डे उत्पत्तिर्जन्म यस्य स तथा, पुनः कैः कीदृशो राजा ? **वासिष्ठैः**=वसिष्ठऋषिप्रदत्तैः, **वरशतैः**=वरदानशतैः, **कृतस्मयः**=कृतो विहितः स्मयो गर्वो जगतां विस्मयो वा येन स तथा, स कः ? इत्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तत्राभूद्वसतिः श्रियामपरया श्रीहर्ष इत्याख्यया,**
**विख्यातश्चतुरम्बुराशिरसनादाम्नः प्रशास्ता भुवः ।**
**भूपः खर्वितवैरिगर्वगरिमा श्रीसीयकः सायकाः,**
**पञ्चेषोरिव यस्य पौरुषगुणाः केषां न लग्ना हृदि ॥४१॥ [ शार्दूलविक्रीडितवृत्तम् ]॥**

卐 अस्यैकचत्वारिंशत्तमश्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ॥ 卐

### 卐 श्रीमत्पद्मसागरविबुधविरचिता व्याख्या 卐

अथ पुनस्तद्वंश्यराजानं दर्शयति, **तत्राऽभूदिति**, व्याख्या० **तत्र** परमारवंशे, श्रीसीयकनामा भूपोऽ**परया** द्वितीययाऽभिधया श्रीहर्षोऽभूद्बभूव, कथंभूतोऽसौ **श्रियां** शोभानामिन्दिराणां वा **वसतिः** स्थानम्, पुनः कथंभूतः **प्रशास्ता** प्र प्रकर्षेण शास्ता शासकः, कस्या **भुवः** पृथिव्याः, नन्वसौ कियत्या भुवः शासक इत्याशङ्क्य दर्शयति, भुवः कथंभूताया**श्चतुरम्बुराशिरसनादाम्न**श्चत्वारोऽम्बुराशयः समुद्रा एव रसनादाम काञ्चीमाला यस्याः सा तथा तस्याः, चतुःसमुद्रपर्यन्तभुवो नायकत्वेन शासक इत्यर्थः । यतश्चैवं ततः कीदृशोऽयमित्याह–खर्वितो जग्धो ध्वस्तो वैरिवर्गस्य गरिमा गौरवं येन स तथा, अथाऽस्य राज्ञो वर्णनार्थमेवाऽऽह–**पञ्चेषोरि**रिति, **पञ्चेषोः** कन्दर्पस्य **सायका इव** बाणा इव **यस्य** श्रीहर्षभूपस्य गुणाः केषां सचेतनानां **हृदि** हृदये न लग्ना ? अपि तु सर्वेषां हृदये लग्ना इत्यर्थ इति वृत्तार्थः ॥४१॥

### 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

काङ्क्षायां ' विश्वामित्रजयोर्जितस्य यस्य भुजयोर्विस्फूर्जितमद्याप्युद्गतहर्षगद्गद्गिरो गुर्जरा अर्बुदे गायन्ति इत्यन्वयः । **विश्वामित्रजयोर्जितस्य**=विश्वामित्रो गाधिराजपुत्रस्तस्य यो जयः पराभवस्तेन ऊर्जितस्य बलातिशययुक्तस्य, **यस्य**=परमारभूपतेः, **भुजयोः**=बाह्वोः, भुजायुगलस्येत्यर्थः, **विस्फूर्जितं**=चेष्टितम्, पराक्रममित्यर्थः, **अद्यापि**= वर्तमानकालेऽपि, धनपालकविकालेऽपीत्यर्थः, **उद्गतहर्षगद्गदगिरः**=उद्गतः परमारभूपालस्य भुजबलातिशयावबोधेन उत्पन्नो यो हर्ष आनन्दस्तेन गद्गदा अस्पष्टा गिरो वाचो येषां तादृशा **गुर्जराः**=गुर्जरदेशवासिनो लोकाः, **अर्बुदे**=अर्बुदगिरौ, **गायन्ति**=स्तुवन्ति । अत्रेयं किंवदन्ती–पुरा किलार्बुदाचले वशिष्ठऋषिर्वसति स्म, तस्य नन्दिनी धेनुः गाधिराजपुत्रेण विश्वामित्रेण छलादपहृता, अतः कुपितेन वशिष्ठऋषिणा मन्त्रानुच्चार्य स्वाग्निकुण्डे आहुतिर्दत्ता, ततस्तस्माद् एको धूमराजनामा वीरः समुत्पन्नः, तेन विश्वामित्रसैन्यं संहृत्य नन्दिनी प्रत्यानीता, एतत्कार्येण प्रसन्नो वसिष्ठऋषिस्तस्य धूमराजस्य परं शत्रुं मारयतीति परमार इति गुणनिष्पन्नं नाम कृतवानिति, एतद्विशेषस्तु पद्मगुप्त[परिमल]-रचितात् नवसाहसाङ्कचरित्राद्विलोकनीयः । अत्रातिशयोक्त्यलंकारः, इदं शार्दूलविक्रीडितवृत्तम्, तल्लक्षणं तु "अतिधृत्यां म्सौ ज्सौ तौ गः शार्दूलविक्रीडितं ठैः" [ मसजसततगाः, ठैरिति द्वादशभिर्यतिः ] इति छन्दोऽनुशासने ॥३९॥

तस्मिन् परमारवंशे श्रीवैरिसिंह इति [नृपः] अभूदित्यन्वयः । **तस्मिन्**=अनन्तरश्लोकाभिहिते, **परमारवंशे**= परमारनृपवंशे, **श्रीवैरिसिंह इति**=श्रीवैरिसिंह इति नाम्ना प्रसिद्धः, श्रीवैरिसिंहनामेत्यर्थः, नृपवंशप्रस्तावान्नृपः, **अभूद्**=बभूव । कीदृशोऽयं नृपः ? **रिपुकलत्रकपोलपत्रवल्लीवितानपरशुः**=रिपूणां शत्रूणां यानि कलत्राणि नार्यस्तेषां ये कपोला गण्डस्थलानि तत्र याः पत्रवल्ल्यो द्राविडकालिङ्गादिभेदेन कस्तूरिकादिभिरालिख्यमाना तिलकाकाराः पत्ररचनास्तासां यद् वितानं समूहस्तत्र परशुस्तस्य छेदने कुठारसदृश इत्यर्थः । पुनः कीदृशः ? **दुर्धरसैन्यदन्तिदन्ताग्रभिन्नचतुर्णवकूलभित्तिः**=दुर्धरा दुर्धर्षा ये सैन्यदन्तिनः सेनाहस्तिनस्तेषां ये दन्ता दशनास्तेषामग्रैरग्रभागैः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तस्योदग्रयशाः समस्तसुभटग्रामाग्रगामी सुतः,**
**सिंहो दुर्धरशत्रुसिन्धुरततेः श्रीसिन्धुराजोऽभवत् ।**
**एकाधिज्यधनुर्जिताब्धिवलयावच्छिन्नभूर्यस्य स,**
**श्रीमद्वाक्पतिराजदेवनृपतिर्वीराग्रणीरग्रजः ॥ ४२ ॥ [शार्दूलविक्रीडितवृत्तम् ] ॥**

卐 अस्य द्वाचत्वारिंशत्तमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ॥ 卐

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ तत्पुत्रं स्तौति, **तस्योदे**ति, व्याख्या० **तस्य** श्रीहर्षस्य सुतः सिन्धुराजोऽभवत्, कथंभूतः **सिंहः** सिंहपराक्रमी, कस्याः पुरो **दुर्धरशक्रसिन्धुरततेः**दुर्धराश्च ते शक्रसिन्धुराश्चैरावणादयस्तेषां ततेः श्रेणेः पुरः । अस्य हि महामदोन्मत्तमतङ्गजवशीकरणसामर्थ्यं जगदद्भुतमासीत्तेनेत्थमुपन्यासः । पुनः कथंभूतोऽसौ **समस्तसुभटग्रामाग्रगामी** समस्तानां सुभटानां ग्रामः समूहस्तस्मिन्नग्रगामी पुरोगत इत्यर्थः, एवंविधोऽपि कश्चिद्यशस्वी न स्यादित्याह–पुनः कथंभूतोऽसा**वुदग्रयशा** उत्कटकीर्त्तिरित्यर्थः । अथ साम्राज्याधिपस्य तज्ज्येष्ठभ्रातुर्वर्णनमाह–**एकाधी**ति–व्याख्या० **यस्य** सिन्धुराजस्या**ऽग्रजो** ज्येष्ठबन्धुः श्रीमद्वाक्पतिराजदेवनृपतिरितिनामा, एकमद्वैतं ज्यामधि लक्षीकृतमधिज्यं यद्धनुस्तेन कृत्वा जिताऽब्धिवलयावच्छिन्ना समुद्रवलयपर्यन्ता भूमिर्येन स तथाऽस्तीति वृत्तार्थः ॥४२॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

**भिन्नाः** खण्डिताश्चतुर्णामर्णवानां समुद्राणां कूलभित्तयस्तटभित्तयो येन स तथा, एतेन सर्वदिग्विजयः सूचितः । अयं भावः–अनेन राज्ञा चतुस्समुद्रपर्यन्ता भूमिर्जिता, तत्र तत्र वर्तमानानां नृपाणां पराजयात् शोकग्रस्तास्तेषां राज्यो विषादग्रस्ततया कपोलस्तनमण्डलादिषु कस्तूरिकादिभिः पत्रवल्लीनामालेखनं न कुर्वन्तीति । अत्र लुप्तोपमा, रूपकमतिशयोक्तिश्च, एतेषामङ्गाङ्गिभावेन संकरः । इदं वसन्ततिलकावृत्तम्, तल्लक्षणं तु पञ्चमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥४०॥

परमारवंशीयं श्रीवैरिसिंहनृपतिं वर्णयित्वाथ तत्पुत्रं श्रीसीयकनामानं नृपतिं वर्णयति–**तत्राभूदि**त्यादिना । तत्र [स] श्रीसीयको भूपोऽभूदित्यन्वयः । **तत्र**=निरुक्तपरमारवंशे, तत्रस्थाने तस्येति पाठे **तस्य**=श्रीवैरिसिंहनृपतेरित्यर्थः । अस्मिन् पक्षे 'भूपः' स्थाने 'सूनुः' इति पाठे **सूनुः**=पुत्र इत्यर्थः 'स' इत्यध्याहार्यमुत्तरदले यदुपादानात् । स **श्रीसीयकः**=श्रीसीयकनामा, **भूपः**=राजा, **अभूत्**=बभूव, कीदृशोऽयं राजा ? श्रियां वसतिः, **श्रियां**=शोभादीनाम्, आदिना वाणीधर्मार्थकामसम्पत्तिबुद्धिविभूतिप्रभाकीर्त्तिवृद्धिसिद्धयादीनां ग्रहणम् । **वसतिः**=निवासस्थानम् । पुनः कीदृशः ? **श्रीहर्ष इत्यपरया आख्यया विख्यातः**=श्रीहर्ष इति द्वितीयनाम्ना प्रसिद्धः, अनेन प्रस्तुतस्य राज्ञो नामद्वयं ज्ञापितम्, एकं 'श्रीसीयक' इति द्वितीयं 'श्रीहर्ष' इति । पुनः कीदृशोऽयं राजा ? भुवः प्रशास्ता, **भुवः**=पृथिव्याः, **प्रशास्ता**=अनुशासनकर्ता, कथम्भूताया भुवः ? **चतुरम्बुराशिरसनादाम्नः**=चत्वारश्चतुर्दिगवस्थितत्वेन चतुःसंख्यका ये अम्बुराशयः समुद्रास्त एव रसनादाम कटीसूत्रं यस्याः सा तथा तस्याः, निखिलमहीमण्डलाधिप इत्यर्थः । पुनः कीदृशो नृपः ? **खर्वितवैरिगर्वगरिमा**=खर्वितो धातूनामनेकार्थत्वाद् नाशितो वैरिणां गर्वगरिमा अभिमानगौरवं येन स तथा, खर्वितस्थाने 'चर्वित' इति पाठे तु चर्वितो जग्धो विनाशित इति यावत् । स कः ? यस्य पौरुषगुणाः पञ्चेषोः सायकाः इव केषां हृदि न लग्नाः [सन्ति] इत्यन्वयः । **यस्य**=श्रीसीयकनृपतेः । **पौरुषगुणा**=पराक्रमगुणा उद्यमगुणा वा, **पञ्चेषोः**=कामदेवस्य **सायका इव**=बाणाः इव, कामस्येमे पञ्च बाणाः–सम्मोहनोन्मादनौ च,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**आकीर्णाङ्घ्रितलः सरोजकलशच्छत्रादिभिर्लाञ्छनै-**
**स्तस्याजायत मांसलायतभुजः श्रीभोज इत्यात्मजः ।**
**प्रीत्या योग्य इति प्रतापवसतिः ख्यातेन मुञ्जाख्यया,**
**यः स्वे वाक्पतिराजभूमिपतिना राज्येऽभिषिक्तः स्वयम् ॥४३॥ [शार्दूलविक्रीडितवृत्तम्]॥**

卐 अस्य त्रयश्चत्वारिंशत्तमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ॥ 卐

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ तत्पुत्रवर्णनमाक्षिपति, **तस्य** श्रीवाक्पतिराजस्याऽऽत्मजो भोज इत्यभिधानेनाऽभूत्, तस्याऽतिसुलक्षणावदातत्वेन लक्षणानि वर्णयति, कथंभूतोऽसावा**कीर्णाङ्घ्रितल** आकीर्णं व्याप्तमंह्रितलं यस्य स तथा, कैर्लाञ्छनैः, कथंभूतैः **सरोजकलशच्छत्रादिभिः** सरोजानि च कमलानि च कलशाश्च छत्राणि च तानि तथाऽऽदौ येषां तानि तथा तैरित्यादिकैश्चिह्नैश्चरणतलं व्याप्तमस्तीति भावः । पुनः कथंभूतो भोजो **मांसले**ति, मांसलौ प्रबलमांसयुक्तावायतौ दीर्घौ भुजौ यस्य स तथा । अथ भोजस्य परम्परायातराज्याधिपत्यं दर्शयति, पित्रेति **यो** भोजः **पित्रा** वाक्पतिराजभूमिपतिना स्वे राज्ये स्वयं मुञ्जाख्यया ख्यातेन कृत्वाऽयं प्रतापवसतिरिति हेतोर्योग्य इति कृत्वाऽभिषिक्तः । अस्य हि भोजस्य बालोऽयमिति कृत्वा धावनमातुः पुत्रो मुञ्ज एव त्वयाऽस्य वृद्धिमुपागतस्य राज्यं देयमित्युक्त्वाऽभिषिक्तस्तेनाऽप्यसौ वृद्धिमुपेतः सन् स्वे राज्येऽभिषिक्त इति वृत्तार्थः ॥४३॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

शोषणस्तापनस्तथा । स्तम्भनश्चेति कामस्य शराः पञ्च प्रकीर्तिताः ॥" इति, **केषां**=जनविशेषाणाम्, **हृदि**=हृदये, **न लग्नाः**=न प्रविष्टाः, अर्थात् सर्वेषां हृदये प्रविष्टाः, सन्तीति शेषः । अत्र सीयकः सायका इत्यत्र छेकानुप्रासोऽलङ्कारो वृत्त्यनुप्रासश्च, मिथस्तयोः संसृष्टिः । तथा अतिशयोक्तिः, रूपकम् उत्प्रेक्षा च, एतेषामङ्गाङ्गिभावेन संकरः । इदं शार्दूलविक्रीडितवृत्तम्, तल्लक्षणं तु एकोनचत्वारिंशत्तमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥ ४१ ॥

अथ भोजपितरं वर्णयति **तस्योदग्रे**त्यादिना । तस्य स श्रीसिन्धुराजः सुतोऽभवदित्यन्वयः । **तस्य**=श्रीसीयकनृपतेः । स इत्याध्याहार्यमुत्तरपदे यच्छब्दोपादानात् । **श्रीसिन्धुराजः**=श्रीसिन्धुराजनामा, **सुतः**=पुत्रः, **अभवत्**=बभूव, कीदृशः सिन्धुराजः ? **उदग्रयशाः**=उदग्रमुच्चं यशो यस्य स तथा, " एकदिग्व्यापिनी कीर्त्तिः, सर्वदिग्व्यापकं यशः । " इत्युक्तप्रशंसा विशेषो यशः । पुनः कीदृशः ? **समस्तसुभटग्रामाग्रगामी**=समस्ता ये सुभटाः शोभना योद्धारस्तेषां ग्रामे समूहे अग्रगामी अग्रेसरः । पुनः कीदृशः ? **सिंहः**=सिंहसदृशः, कस्याः पुरतः सिंहसदृशः ? **दुर्धरशत्रुसिन्धुरतते**:=दुर्धरा ये शत्रुसिन्धुराः शत्रुरूपा हस्तिनस्तेषां ततेः श्रेणेः पुरतः । पुनः कीदृशः ? **एकाधिज्यधनुर्जिताब्धिवलयावच्छिन्नभूः**=ज्यामधिरूढमधिज्यम्, एकमद्वितीयमधिज्यं च यद् धनुस्तेन जिता वशीकृता अब्धिवलयावच्छिन्ना समुद्ररूपवलयवेष्टिता भूर्भूमिर्येन स तथा, समुद्रपर्यन्तायाः सकलभूमेर्विजेतेत्यर्थः । स कः ? **यस्य**=श्रीसिन्धुराजस्य, **अग्रजः**=ज्येष्ठो भ्राता, अस्तीति शेषः । कीदृशोऽग्रजः ? **श्रीमद्वाक्पतिराजदेवनृपतिः**=श्रीवाक्पतिराजदेवनामा नृपतिश्च, अस्य मुञ्जक्षेत्रोपलब्धत्वाद् ' मुञ्ज ' इति द्वितीयं नाम, नृपतित्वं च प्रान्ते सिन्धुराजेन राज्यसमर्पणात्, सिन्धुराजाग्रजत्वं च प्रथमजातत्वात् श्रीसीयकेन पुत्रत्वेन पालितत्वाच्च, अराजबीजत्वाद्राज्यं तु श्रीसीयकेन न दत्तम्, नृपतिभावापेक्षया ' एकाधिज्यधनुर्जिताब्धिवलयावच्छिन्नभूः ' इत्यपि योज्यम्, कीदृशोऽयमग्रजः ? **वीराग्रणीः**=वीरेषु शूरेषु अग्रणीरग्रेसरः । ' ग्रामाग्रगामी ' इत्यत्र छेकानुप्रासालङ्कारः ' सिन्धुर सिन्धुरे'त्यत्र छेकानुप्रासो वृत्त्यनुप्रासश्च, एतेषां संसृष्टिः, तथा अतिशयोक्तिर्लुप्तोपमा रूपकं च, एषामङ्गाङ्गिभावेन संकरः । इदं शार्दूलविक्रीडितवृत्तम्, तल्लक्षणं तु अष्टात्रिंशत्तमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥ ४२ ॥

७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**देव्या विभ्रमसद्म पद्मवसतेः कर्णावतंसं क्षितेः,**
**सौभाग्यप्रतिपक्षमिन्दुमहसः सर्गाद्भुतं वेधसः ।**
**धत्ते योऽवधिभूतमीक्षणहृतां नेत्रामृतं योषितां**
**रूपन्यक्कृतकाममद्भुतमणिस्तम्भाभिरामं वपुः ॥४४॥ [ शार्दूलविक्रीडितवृत्तम् ]॥**

卐 अस्य चतुश्चत्वारिंशत्तमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ॥ 卐

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ वर्तमानराज्याधिपतित्वात् परमोपकारित्वात्तदायत्तवृत्तेश्च भोजं षड्भिः काव्यैः स्तौति । **देव्या** इति, व्याख्या० यो भोज एवंविधं वपुः शरीरं धत्त इति तावदन्वयः, कीदृशं वपुः **पद्मवसतेर्देव्या** लक्ष्म्या **विभ्रमसद्म** विलासमन्दिरमित्यर्थः । पुनर्वपुः कथंभूतं **क्षितेः** पृथिव्याः **कर्णावतंसं** कर्णाभरणमित्यर्थः । पुनः कथंभूतं वपु**र्वेधसो** विधातुः **सर्गे** सृष्टावद्भुतं नेदृशं विधिसृष्टौ वपुरस्तीति भावः । पुनः कथंभूतं वपु**रीक्षणहृतामवधिभूत**मीक्षणेन दर्शनेन हरन्तीतीक्षणहृतस्तेषां मध्येऽवधिभूतं प्राप्तरेखं नाऽतः परं जगति दर्शनीयमस्तीति भावः । पुनः कथंभूतं **योषितां नेत्रामृतम्** । पुनः कथंभूतं वपू रूपेण न्यक्कृतास्तिरस्कृतः कामः कन्दर्पो येन तत्तथा । पुनर्वपुः कथंभूत**मद्भुतमणिस्तम्भाभिराम**मद्भुतो यो मणिस्तम्भो रत्नस्तम्भस्तद्वदभिरामं बन्धुरमित्यर्थ इति वृत्तार्थः ॥४४॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

अथ वर्तमानराज्याधीशत्वात् प्रस्तुतकथाकरणकारणत्वाद् भोजराजं सप्तभिर्वृत्तैर्वर्णयति–**आकीर्णाङ्घ्रितल** इत्यादिना । तस्य श्रीभोज इत्यात्मजोऽजायतेत्यन्वयः । **तस्य**=श्रीसिन्धुराजनृपतेः, **श्रीभोज इति**=श्रीभोज इति नाम्ना प्रसिद्धः, **आत्मजः**=पुत्रः, **अजायत**=जातः, कैः कीदृशः ? सरोजकलशच्छत्रादिभिर्लाञ्छनैराकीर्णाङ्घ्रितलः, **सरोजकलशच्छत्रादिभिः**=सरोजं कमलं कलशः कुम्भः छत्रमातपत्रं तानि आदय आदिभूतानि येषां तानि तथा तैः, आदिपदात् श्रीवत्सादयः, **लाञ्छनैः**=तादृशरेखारूपेणावस्थितैः सत्पुरुषलक्षणैः, **आकीर्णाङ्घ्रितलः**=व्याप्तचरणतलः, अनेन सामुद्रिकशास्त्रदृष्टयोत्तमपुरुषता ज्ञापिता, यदुक्तम्–" छत्रं तामरसं धनू रथवरो दम्भोलिकूर्माङ्कुशा, वापीस्वस्तिकतोरणानि च सरः पञ्चाननः पादपः । चक्रं शंखगजौ समुद्रकलशौ प्रासादमत्स्या यवा, यूपस्तूपकमण्डलून्यवनिभृत् सच्चामरो दर्पणः ॥ १ ॥ उक्षा पताका कमलाभिषेकः सुदाम केकी घनपुण्यभाजाम् । " । पुनः कीदृशो भोजः ? **मांसलायतभुजः**=मांसलौ बलवत्यर्थे लविधानाद् बलवन्तौ आयतौ दीर्घौ च भुजौ बाहू यस्य स तथा, अनेन बाहुबलमैश्वर्यं चावेदितम्, " दीर्घबाहुं न चैश्वर्यं न मांसोपचितं सुखम् ॥ " । पुनः कीदृशः ? **प्रतापवसतिः**–प्रतापस्थानम्, प्रतापशालीत्यर्थः, पुनः कीदृशः ? यो मुञ्जाख्यया ख्यातेन वाक्पतिराजभूमिपतिना योग्य इति स्वे राज्ये स्वयं प्रीत्याऽभिषिक्तः, **यः**=भोजः, पञ्चाशत्तमश्लोकस्थ 'तस्य' इति तत्पदापेक्षयाऽयं यच्छब्दस्य निर्देशः, एवमुत्तरत्रापि । **मुञ्जाख्यया**=मुञ्जनाम्ना, **ख्यातेन**=प्रसिद्धेन, मुञ्जाख्यरज्जुसाधनतृणविशेषस्य क्षेत्रादुपलब्धत्वेन मुञ्जनाम्ना प्रसिद्धिं गतेनेत्यर्थः, **वाक्पतिराजभूमिपतिना**=वाक्पतिराजदेवनाम्ना नृपेण, **योग्य इति**=राज्यधुराधारणसमर्थोऽयमिति मत्वा, **स्वे राज्ये**=आत्मीयराज्ये, **स्वयम्**=आत्मना, न तु भोजपित्रा सिन्धुराजेन, **प्रीत्या**=प्रेम्णा, **अभिषिक्तः**=सविधि स्थापितः । अत्रायं भावः–श्रीसीयकनृपतेः पुरा पुत्रो नासीत्, एकदा केनचित्कारणेन निर्गतेन राज्ञा मुञ्जाख्यतृणक्षेत्रे केनचिन्मुक्तो बालो विलोकितः, अपुत्रस्य ममायं पुत्रो भवत्विति धिया गृहीतश्च, ततः शृङ्गारसुन्दरीराज्यै समर्पितः, तयापि परिवर्धितः, 'वाक्पतिराजदेव, इति तस्य नाम विहितम्, प्रसिद्धिस्तु मुञ्जक्षेत्रोपलब्धत्वाद् मुञ्जनाम्ना जाता, कियता कालेन पद्माभिधराज्याः पुत्रो जातः, तस्य 'सिन्धुराज' इति नाम निर्मितम्, एवं च सीयकस्य द्वौ पुत्रौ जातौ, ज्येष्ठः पालितपुत्रो मुञ्जनामा, द्वितीयोऽङ्गजः सिन्धुराजनामा, तत्र राजबीजत्वात् सिन्धुराजाय राज्यं समर्पितम् । सिन्धुराजस्य च भोजनामा पुत्रो जातः, स यदा पञ्चवार्षिको जातस्तदा निजमरणमासन्नं मत्वा सिन्धुराजेन मुञ्जोऽभिहितः, यदुत, इदं राज्यं ते समर्पयामि, तवोत्सङ्गे च-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**आयाता शरदित्युदीर्य मुदितैर्दारैः पुरो दर्शिता,**
**लीलोद्यानभवा नवाः सुमनसः सप्तच्छदक्ष्मारुहाम् ।**
**यत्सैन्यागमशङ्किनामसुहृदामाकृष्टगन्धा इव,**
**श्वासैः खेदनिरायतैर्विदधिरे सद्यः शिरोवेदनाम् ॥४५॥ [ शार्दूलविक्रीडितवृत्तम् ] ॥**

卐 अस्य पञ्चचत्वारिंशत्तमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ॥ 卐

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथाऽस्य प्रतापं वर्णयति, **आयाते**ति। व्याख्या० यत्सैन्यागमशङ्किनाम**सुहृदा**ममित्राणां **खेदनिरायतै**र्नितरां खेदयुक्तैः श्वासैरिवोत्प्रेक्ष्यते, आकृष्ट आकृष्य गृहीतो गन्धो येषां ते तथैवंविधाः **सप्तच्छदक्ष्मारुहां** सप्तपत्रतरूणां **लीलोद्यानभवाः** क्रीडोद्यानसंजाता मु**दितैर्दारैः** स्त्रीभिरायातेयं शरदित्युदीर्योक्त्वा दर्शिता एवंविधाः सुमनसः पुष्पाणि **सद्यः** शीघ्रं शिरोवेदनां **विदधिरे** चक्रुः, अयं भावः—आयन्तं शरदृतुं दृष्ट्वाऽवश्यमयं भोजोऽस्माकमुपर्यायास्यतीति शङ्काकुलानां वैरिणां भयज्वरप्रादुर्भावान्मूर्ध्नि वेदना बभूव, तत्र कवेरुत्प्रेक्षा चैत्रं, शरदागममुदितस्वस्त्रीजनदर्शितशिरोवेदनाजननस्वभावकसप्तच्छदपुष्पदर्शनानन्तरसंजातसखेदनिःश्वासच्छलेन तदाघ्राणतो ज्ञायते शिरोवेदना जातेति वृत्तार्थः ॥४५॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

बालं भोजं स्थापयामि, भोजे योग्यतां याते तस्मै राज्यं देयमिति । मुञ्जेनापि तथैव कृतमिति । मुञ्जस्यापरनाम 'वाक्पतिराजदेव' इत्यस्ति तत्र प्रमाणम्–" धनञ्जय इत्यनेनात्मानं वाक्पतिराजदेवापरनाम्नो मुञ्जभूभुजः सभायामाख्यत् ।' इति साहित्यदर्पणभूमिकालेखोऽपि ॥ 'राजभूमिपति' इति पदेन पुनरुक्तवदाभासालङ्कारः । इदं शार्दूलविक्रीडितवृत्तम्, तल्लक्षणं तु अष्टात्रिंशत्तमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥४३॥

भोजराजशरीरं वर्णयति—**देव्या** इत्यादिना । यो वपुर्धत्ते इत्यन्वयः । **यः**=भोजराजः, **वपुः**=शरीरम्, **धत्ते**=दधाति । कीदृशं वपुः ? पद्मवसतेर्देव्या विभ्रमसद्म, **पद्मवसतेः**=पद्मं कमलं तदेव वसतिर्निवासस्थानं यस्याः सा तथा तस्याः, कमलवासिन्या इत्यर्थः, **देव्याः**=देवतायाः, लक्ष्मीदेव्या इत्यर्थः, **विभ्रमस्थानं**=विलासमन्दिरम्, अनेन लक्ष्मीसन्निधानं शोभाबाहुल्यं चावेदितम् । पुनः कीदृशं ? **क्षितेः**=पृथिव्याः, महीरूपमहिलाया इत्यर्थः, **कर्णावतंसं**=कर्णाभूषणम्, अनेन वसुन्धरावल्लभत्वमावेदितम् । पुनः कीदृशम् ? इन्दुमहसः सौभाग्यप्रतिपक्षम्, **इन्दुमहसः**=चन्द्रज्योत्स्नायाः, **सौभाग्यप्रतिपक्षं**=सौभाग्यस्य प्रियतायाः प्रतिपक्षं प्रतिकूलम्, चन्द्रज्योत्स्नातोऽप्यधिककान्तिशालीत्यर्थः, एतेन प्रचुरशीतलकान्तिमत्त्वं सूचितम् । पुनः कीदृशं ? वेधसः सर्गाद्भुतम् । **वेधसः**=ब्रह्मणः, **सर्गाद्भुतं**=सर्गे सृष्टिरचनायामद्भुतमाश्चर्यजनकम् विधातृसृष्टौ एतादृशमपूर्वं वस्तु निर्मितम् ? इति जनानामाश्चर्यजनकमित्यर्थः, अनेन सर्वोत्तमता सूचिता । पुनः कीदृशम् ? ईक्षणहृतामवधिभूतम्, **ईक्षणहृतां**=नयनाकर्षिणां वस्तूनाम्, **अवधिभूतं**=सीमारूपम्, यतोऽधिकं नान्यन्नयनाकर्षीत्यर्थः, अनेन नयनान्दनप्रदानातिरेको ज्ञापितः । पुनः कीदृशं ? योषितां नेत्रामृतम्, **योषितां**=नारीणाम्, कीदृशीनाम् ? **ईक्षणहृताम्**=नयनाभ्यां मानवमनोहारिणीनाम्, **नेत्रामृतं**=नयनानन्ददाने सुधोपमम्, अनेन बालानामपि सुनिरीक्षणीयता बोधिता । पुनः कीदृशम् ? **रूपन्यक्कृतकामं**=रूपेण वर्णेन न्यक्कृतस्तिरस्कृतः कामो मदनो येन तत्तथा, अनेन शरीरवर्णातिरेको वर्णितः, पुनः कीदृशम् ? **अद्भुतमणिस्तम्भाभिरामम्**=अद्भुतो यो मणिस्तम्भस्तद्वद् अभिरामं सुन्दरम्, अनेन द्रढिमा रचनागुणः प्रभागुणश्च दर्शितः । अत्र मालारूपरूपकालङ्कारः, अतिशयोक्तिश्च, एतयोः संकरः । इदं शार्दूलविक्रीडितवृत्तम्, तल्लक्षणं तु अष्टात्रिंशत्तमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥४४॥

भोजप्रतापसूचनाय भोजरिपूणां शरदि कीदृशी दशा भवतीत्याह—**आयाता शरदि**त्यादिना । सप्तच्छदक्ष्मारुहां सुमनसः सद्यः शिरोवेदनां विदधिरे इत्यन्वयः । **सप्तच्छदक्ष्मारुहां**=सप्त सप्त छदाः पर्णानि प्रतिपर्णं येषां तादृशा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुत्वा यं सहसाऽऽगतं निजपुरात् त्रासेन निर्गच्छतां,
शत्रूणामवरोधनैर्जललवप्रस्यन्दतिम्यत्पुटाः ।
शुभ्रे सद्मनि पल्लविन्युपवने वाप्यां नवाम्भोरुहि,
क्रीडाद्रौ च मुहुर्मुहुर्विवलितग्रीवैर्विमुक्ता दृशः ॥४६॥ [ शार्दूलविक्रीडितवृत्तम् ] ॥

卐 अस्य षट्चत्वारिंशत्तमश्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ॥ 卐

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथाऽस्याऽऽगमनश्रवणाद्वैरिभिस्तद्दशाभिश्च किं कृतमिति दर्शयति, **श्रुत्वे**ति, व्याख्या० **अमुं** भोजं सहसाऽऽगतं श्रुत्वा **निजपुरा**न्निजनगरात् **त्रासेना**ऽऽकस्मिकभयेन निर्गच्छतां **शत्रूणां** वैरिणा**मवरोधनै**रन्तःपुरैर्जलस्य लवा बिन्दवो जललवास्तान् प्रस्यन्दति श्रवतीति तत्प्रस्यन्दि, एवंविधं तिम्यन्निमीलत्पुटं यासां तास्तथैवंविधा दृशो दृष्टय एतेषु स्थानकेषु विमुक्ताः स्थापिताः । कथंभूतैरन्तःपुरै**र्विवलितग्रीवै**र्वि विशेषेण वलिता ग्रीवा यैस्ते तथा तैः । कानि तानि स्थानानीत्याह–**शुभ्रे सद्मनि** धवलमन्दिरे तैर्दृशः स्थापिता इत्यर्थः । **पल्लविनि** नवपल्लवे, **उपवने** गृहासन्नकानने, **वाप्यां** दीर्घिकायाम्, नवान्यम्भोरुहाणि यत्र तत्तस्मिन्नेवंविधे क्रीडाद्रावेतेषु स्थानेषु निजभर्तृपश्चान्निर्गच्छद्भिरन्तःपुरैर्वारं वारं ग्रीवा वालयित्वा लोचनानि न्यस्तानीति वृत्तार्थः ॥४६॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

ये क्ष्मारुहो वृक्षास्तेषाम्, स्वपुष्पगन्धेन शिरोवेदनाजनकवृक्षविशेषाणामित्यर्थः । **सुमनसः**=पुष्पाणि, **सद्यः**=शीघ्रम्, **शिरोवेदनां**=मस्तकपीडाम्, **विदधिरे**=चक्रुः । कीदृशाः सुमनसः ? शरद् आयाता इत्युदीर्य मुदितैर्दारैः पुरोदर्शिताः, **शरद्**=आश्विनकार्तिकमासात्मक ऋतुविशेषः, युद्धयात्रार्हः काल इति गुप्तार्थः, **आयाता**=प्राप्ता, शरद्येव सप्तपर्णपुष्पाणां प्रादुर्भावः, इदानीं च तानि पुष्पाणि जातानि अतः शरद् आयातेति भावः । **इत्युदीर्य**=एवं कथयित्वा, **मुदितैः**=सप्तपर्णपुष्पावलोकेन हर्षितैः, **दारैः**=नारीजनैः **पुरः**=अग्रे, लीलोद्यानवर्तिनां सप्तपर्णतरूणां शाखास्तवकेष्वित्यर्थः । **दर्शिताः**=दर्शनं कारिताः, एतेन विनोदार्थं लीलोद्यानविहारो दर्शितः । कीदृशाः ? **लीलोद्यानभवाः**=लीलार्थमुद्यानमारामस्तत्र भवा जाताः । पुनः कीदृशाः ? **नवाः**=नवीना न तु प्राचीनाः । केषां शिरोवेदनां विदधिरे ? यत्सैन्यागमशङ्किनाम् असुहृदाम्, **यत्सैन्यागमशङ्किनां**=यस्य भोजस्य सैन्यागमशङ्किनां सैन्यागमने शङ्कावताम्, युद्धार्हः शरत्कालः समायातोऽतो भोजसैन्यमागमिष्यतीति शङ्कावताम्, **असुहृदां**=भोजरिपुनृपाणाम् । कैः कीदृशा इव सन्तः सुमनसः शिरोवेदनां विदधिरे ? अत्रोत्प्रेक्षते खेदनिरायतैः श्वासैराकृष्टगन्धा इव, **खेदनिरायतैः**=खेदेन भोजसैन्यागमनशङ्काजनितविषादेन निरायतैरतिदीर्घैः, **श्वासैः** नासिकावायुभिः, **आकृष्टगन्धा इव**=गृहीतगन्धा इव आघ्राता इवेत्यर्थः, एवंविधा इव सन्तः शिरोवेदनां विदधिरे । अत्रायं भावः–शरत्समयारम्भे लीलोद्याने भोजारिनृपा नारीभिः साकं विहरन्ति, तत्र प्रफुल्लानि सप्तदलकुसुमानि समवलोक्य सानन्दा नारीजना निजनिजस्वामिनः प्रति वदन्ति, यदुत–स्वामिन् आयाता शरद् विलोकयेमानि नवानि सप्तदलकुसुमानि, एतदाकर्ण्यामी अरिनृपा विचारयन्ति, यदुत, समायातः शरत्कालः, स च युद्धयात्रार्हः, अस्मिन् काले राजानो योद्धुं निर्गच्छन्ति, कदाचित् ससैन्यो भोज आगमिष्यति तदाऽस्माकं किं भावीति न ज्ञायते, इति विचारणया सखेदा दीर्घश्वासान् विदधति, भयाक्रान्तचिन्तया शिरोव्यथापि जायते, अत्र कवेरुत्प्रेक्षा–इयं शिरोवेदना निरुक्तपुष्पगन्धग्रहणेन जाता, यतस्तानि आघ्रातानि दीर्घश्वासैरिति । अत्रोत्प्रेक्षाऽतिशयोक्त्या संकीर्यते । इदं शार्दूलविक्रीडितवृत्तम्, तल्लक्षणं तु अष्टात्रिंशत्तमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥४५॥

भोजागमनवार्ताश्रवणेन तदरीणां कीदृशी दशा जातेति वर्णयति–**श्रुत्वेत्यादिना** । शत्रूणामवरोधनैर्दृशो विमुक्ता इत्यन्वयः । **शत्रूणां**=भोजरिपूणां नृपाणाम्, **अवरोधनैः**=अन्तःपुरनारीजनैः, **दृशः**=नयनानि, **विमुक्ताः**=अवलोक-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**प्रासादेषु त्रुटितशिखरश्वभ्रलब्धप्रवेशैः,**
**प्रातः प्रातस्तुहिनसलिलैः शार्वरैः स्नापितानि ।**
**धन्याः शून्ये यदरिनगरे स्थाणुलिङ्गानि शाखा-**
**हस्तस्रस्तैः कुसुमनिकरैः पादपाः पूजयन्ति ॥४७॥ [मन्दाक्रान्तावृत्तम् ] ॥**

卐 अस्य सप्तचत्वारिंशत्तमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ॥ 卐

### 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ वैरिषु निर्गतेषु तन्नगरे यदभूत्तदाह–शून्ये **यदरिनगरे** यस्य भोजस्याऽरीणां वैरिणां नगरे **धन्या** इति वक्ष्यमाणकृत्यकरणात् प्रशंसार्हाः **पादपा** वृक्षाः, शाखा एव हस्ताः शाखाहस्तास्तेभ्यः स्रस्ताश्च्युतास्तैरेवंविधैः कुसुमनिकरैः **स्थाणुलिङ्गानि** शम्भोर्लिङ्गानि पूजयन्ति । ननु स्नानपूर्वं पूजनं युक्तं तेन तत्स्नापनं वाच्यमित्याशङ्कयाऽऽह कथंभूतानि स्थाणुलिङ्गानि **स्नापितानि** स्नानं कारितानि, कैः**स्तुहिनसलिलै**स्तुषारजलैः, कथंभूतैः **शार्वरैः** शर्वरीसम्बन्धिभी रात्रौ पतितैः, पुनः कथंभूतै**स्त्रुटितशिखरश्वभ्रलब्धप्रवेशै**स्त्रुटितानि यानि शिखराणि तेषां श्वभ्राणि पातालानि तेषु लब्धः प्रवेशो यैस्तथा तैः, तदन्तःप्रविष्टैरित्यर्थः । केषु **प्रासादेषु** देवतायतनेषु, कथं **प्रातः प्रातः** प्रभाते प्रभाते त्रुटितशिखरप्रासादप्रविष्टतुहिनस्नापितानि शम्भुलिङ्गानि शाखाहस्तपतितैः पुष्पैर्धन्या इव धन्याः पादपाः पूजयन्तीति वृत्तार्थः ॥४७॥

### 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

नकर्मणि व्याप्रताः । कीदृशानां शत्रूणां ? सहसाऽऽगतं यं श्रुत्वा त्रासेन निजपुराद् निर्गच्छताम्, **सहसा**=शीघ्रम्, **आगतम्**=आयातम्, **यं**=भोजराजम्, **श्रुत्वा**=आकर्ण्य, **त्रासेन**=आकस्मिकभयेन, **निजपुरात्**=निजनगरात्, स्वराजधानीत इत्यर्थः । **निर्गच्छतां**=निस्सरताम् । कीदृशो दृशः ? **जललवप्रस्यन्दतिम्यत्पुटाः**=जललवा निजपतिना सह गमने राजधानीवियोगवनवासादिविचारणाजनितदुःखवेगेन ये अश्रुजलबिन्दवस्तेषां प्रस्यन्देन क्षरणेन तिम्यन्तौ आर्द्रीभवन्तौ पुटौ पुटाकारौ कनीनिकाच्छादकौ त्वग्विशेषौ यासां तास्तथा । कुत्र दृशो विमुक्ताः ? **शुभ्रे**=धवले, **सद्मनि**=गृहे, धवलप्रासादे इत्यर्थः । पुनः कुत्र ? **पल्लविनि**=नवीनपत्रसमूहशालिनि, **उपवने**=गृहासन्नकानने । पुनः कुत्र ? **नवाम्भोरुहि**=नवीनकमलवत्याम्, **वाप्यां**=वापिकायाम् । पुनः कुत्र ? **क्रीडाद्रौ**=क्रीडापर्वते च । कीदृशैरन्तःपुरनारीजनैः ? **मुहुर्मुहुः**=पुनः पुनः, **विवलितग्रीवैः**=विवलिता ग्रीवा येषां तानि तथा तैः, पुनः कदामीषां मनोहरवस्तूनां मीलनं भविष्यतीति विचारणया पुनः पुनर्ग्रीवां वालयित्वा पश्यद्भिरित्यर्थः । अत्रातिशयोक्तिरलङ्कारः । इदं शार्दूलविक्रीडितवृत्तम्, तल्लक्षणं तु अष्टात्रिंशत्तमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥ ४६ ॥

अथ वैरिनृपेषु निर्गतेषु तन्नगरस्य कीदृशी दशा जातेत्याह–**प्रासादेष्वि**त्यादिना । यदरिनगरे पादपाः स्थाणुलिङ्गानि पूजयन्तीत्यन्वयः । **यदरिनगरे**=यस्य भोजस्य अरिनगरे रिपुनगर्याम्, **पादपाः**=वृक्षाः,**स्थाणुलिङ्गानि**=शिवलिङ्गानि, **पूजयन्ति**=शिवलिङ्गपूजां कुर्वन्तीत्यर्थः । ननु देवपूजां तु मानवाः कुर्वन्ति कथमत्र वृक्षा इत्याशङ्क्य नगरीविशेषणमाह–कीदृशेऽरिनगरे ? **शून्ये**=भोजराजेनातीव भग्नत्वादुद्वासिते निर्जने, जनाभावाद् वृक्षाः पूजयन्तीत्यर्थः । कुत्र स्थितानि शिवलिङ्गानि ? **प्रासादेषु**=देवमन्दिरेषु । ननु पूजा स्नपनपूर्विका भवति कथमिह शिवलिङ्गानां स्नपनमित्याशङ्क्य शिवलिङ्गविशेषणमाह–कीदृशानि लिङ्गानि ? प्रातः प्रातः शार्वरैस्तुहिनसलिलैः स्नापितानि, **प्रातः प्रातः**=प्रतिदिनं प्रभाते, **शार्वरैः**=रजनीभवैः, **तुहिनसलिलैः**=हिमजलैः, **स्नापितानि**=स्नानं कारितानि । ननु हिमजलानि तु अनावृतप्रदेशे पतन्ति कथं तैर्मन्दिरान्तर्वर्तिनां लिङ्गानां स्नानं भवतीत्याशङ्क्य हिमजलविशेषणमाह–कीदृशैर्हिमजलैः ? **त्रुटितशिखरश्वभ्रलब्धप्रवेशैः**=त्रुटितानां शिखराणां श्वभ्रेषु छिद्रेषु लब्धः प्राप्तः प्रवेशो यैस्तादृशैः । कैः पादपाः पूजयन्ति ? **कुसुमनिकरैः**=पुष्पसमुदायैः । ननु पुष्पपूजा हस्ताभ्यां पुष्पमोचने सति भवति सा वृक्षाणां कथं सम्भवतीत्याशङ्क्य पुष्पसमुदायविशेषणमाह–कीदृशैः कुसुमनिकरैः ? **शाखाहस्तस्रस्तैः**=शाखारूपा ये हस्तास्तेभ्यः स्रस्तैः पतितैः, कीदृशा वृक्षाः ? **धन्याः**=निरुक्तकार्यकरणात् प्रशंसार्हाः । अत्र रूपकातिशयोक्त्यलङ्कारौ । इदं मन्दाक्रान्तावृत्तम्, तल्लक्षणंतु "मो भ्नौ तौ गौ च घैर्मन्दाक्रान्ता [ मभनततगगाः घैरिति चतुर्भिर्यतिः ] इति छन्दोऽनुशासने ॥ ४७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र यस्य दोष्णीत्यादयश्चत्वारः श्लोका मुद्रितग्रन्थे न दृश्यन्ते, किन्त्वग्रे मेघवाहननृपवर्णने सन्तीति नास्माभिरत्र व्याख्याताः, टिप्पनिकाकारेण तु भोजवर्णनपरत्वेनात्र व्याख्याताः, ते चेमे—

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**यस्य दोर्ष्णि स्फुरद्धेतौ प्रतीये विबुधैर्ध्रुवम्। बौद्धतर्के इवार्थानां राज्ञां नाशो निरन्वयः॥ १**
**[ पथ्यावृत्तम् ]॥**

**लतावनपरिक्षिप्ते निन्ये यदरिभिर्निशा । विन्ध्याद्रेस्तल्परुचिरे न वेश्मनि नवेऽश्मनि॥ २**
**[ नविपुलावृत्तम् ]॥**

**अन्तर्दग्धागुरुशुचावाप यस्य जगत्पतेः । नारीणां संहतिश्चारुवेषाकारागृहे रतिम्॥ ३**
**[ नविपुलावृत्तम् ]॥**

**दृष्ट्वा वैरस्य वैरस्यमुज्झितास्त्रो रिपुव्रजः। यस्मिन् विश्वस्य विश्वस्य कुलस्य कुशलं व्यधात्॥ ४**
**[पथ्यावृत्तम् ]॥**

**यस्ये**त्यादि । **प्रतीये**=प्रतीतः, को ? **नाशो**=विघातः, केषां ? **राज्ञाम्**=अरिनृपाणाम्, किंभूतो ? **निरन्वयो**ऽपगतवंशः, कैः प्रतीये ? **विबुधैः**=देवैः, कस्मिन् सति ? **दोर्ष्णि**=बाहौ, कीदृशे ? **स्फुरद्धेतौ**=देदीप्यमानप्रहरणे, कस्य ? **यस्य**=भोजराजस्य, कस्मिन्निव केषां ? बौद्धतर्के इवार्थानां यथा बौद्धप्रमाणशास्त्रे नाशो **विबुधैः**=विशिष्टपण्डितैः, **प्रतीये**=प्रतीतोऽ**र्थानां** घटादीनाम्, कीदृशो ? **निरन्वयो**=ऽनुगमरहितो न[ष्ट]स्यापि द्रव्यस्योत्तरक्षणाऽनुसरणमस्तीत्यर्थः, किंभूते बौद्धतर्के ? **स्फुरद्धेतौ**=देदीप्यमानस्वभावादिलिङ्गे, कथं प्रतीये ? **ध्रुवं**=निश्चितम् ॥१॥ **लते**त्यादि, **यदरिभिः**=यस्य भोजनृपस्यारिभिः शत्रुभिः, **निशा** रात्रिः, **निन्ये**=नीता, कस्मिन् ? **अश्मनि**=दृषदि, **न वेश्मनि**=न गृहे, कस्य अश्मनि ? **विन्ध्याद्रेः**, भयेन विन्ध्यगिरिमारूढा अरय इत्यर्थः, कीदृशेऽश्मनि वेश्मनि च ? **तल्पं**=शयनीयं तद्वद्**रुचिरे**=सुकुमारपृथुत्वादिगुणै रम्ये तल्पेन रुचिरे दीप्ते, तथा **नवे**=नूतने, तथा **लतावनपरिक्षिप्ते**=अशोकचम्पकलतावनपरिवेष्टिते वेश्मनि वल्लीवनगहनच्छन्नेऽश्मन्यद्रश्य इत्यर्थः ॥ २ ॥

**अन्तरि**त्यादि । **यस्य**=भोजराजस्य, किंभूतस्य ? **जगत्पतेः**=भुवनरक्षकस्य, **नारीणां संहतिः**=स्त्रीवृन्दम्, **आप**=लेभे, कां ? **रतिं**=प्रीतिमासक्तिं वा, क्व ? **गृहे**=वेश्मनि, कीदृशी ? **चारुवेषाकारा**=चारु रम्यौ वेषाकारौ नेपथ्याकृती यस्याः सा तथोक्ता, चारुवेषो वा आकारो यस्याः सा तथोक्ता, कीदृशे गृहे ? **अन्तर्दग्धागुरुशुचौ**=अन्तर्मध्ये दग्धं यदगुरु कृष्णागुरुकाष्ठं तेन **शुचि**=पवित्रं सुगन्धीत्यर्थोऽन्यत्र यस्य जगत्पतेररीणां संहतिर्नाप न प्राप्तवती, कां ? **रतिं**=सुखम्, क्व ? **कारागृहे**=गुप्तौ, कीदृशी ? **चारुवेषा**=रम्यनेपथ्या, पुनः किंभूता ? **दग्धा**=संतप्ता, क्व ? **अन्तः**=मध्ये चित्त इत्यर्थः, केन ? **गुरुशुचा**=बृहच्छोकेन ॥ ३ ॥

[ **दृष्ट्वे**त्यादि ] **रिपुव्रजः**=अरिसमूहः, **व्यधात्**=कृतवान्, किं ? **कुशलं**=कल्याणम्, कस्य ? **कुलस्य**=वंशस्य, किंभूतस्य ? **विश्वस्य**=सर्वस्य, किं कृत्वा ? **विश्वस्य**=विश्वासं कृत्वा, कस्मिन् ? **यस्मिन्**=भोजदेवे, कथंभूतो रिपुव्रजः ? **उज्झितास्त्रः**=त्यक्तायुधः, किंकृत्वा ? **दृष्ट्वा**=अवलोक्य, किं ? **वैरस्यं**=विरसतां, कस्य ? **वैरस्य**=विरोधस्य ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**येषां सैन्यभराहितोरगपतिश्रान्ति प्रयातां बहि-**
**र्जायन्ते स्थगिता हिमांशुमहसः श्वेतातपत्रैर्दिशः ।**
**आभान्ति प्रभवो नृणामितरवत् तेऽप्यागताः सेवया,**
**यस्यानेकजनाकुले निजवपुर्मात्राः सभामण्डपे ॥ ४८ ॥ ॥ [ शार्दूलविक्रीडितवृत्तम् ] ॥**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**येषामित्यादि** । **सैन्यभराहितोरगपतिश्रान्ति**=सेनासंभारकृतनागराजखेदं यथा भवति तथा, **प्रयातां**= गच्छताम्, क्व ? **बहिः**=बहिःप्रदेशम्, मात्रा–परिग्रहः परिवारो वा ॥ ४८ ॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ कृतदिग्विजयस्याऽस्य यदभूत्तदाह–**येषामि**ति व्याख्या० **यस्य** भोजस्य सेवयाऽनेकजनाकुले सभामण्डपे तेऽपि नृणां प्रभवो नरेशा इतरवत्सामान्यलोकवन्निजवपुर्मात्रास्त्यक्तसकलपरिवारा **आगता** आयाता इति । के ते राजान इत्याह–सैन्यभरेणाऽहिता स्थापिता उरगपतेः शेषनागस्य श्रान्तिः श्रमो यथा स्यात्तथा **प्रयातां** प्रगच्छतां येषां **हिमांशुमहस**श्चन्द्रतेजसः **श्वेतै**र्धवलैरातपत्रैर्दिशः स्थगिता आभान्तीति वृत्तार्थः ॥४८॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

अथ कीदृशा नृपाः कृतदिग्विजयस्य भोजस्य सेवां कुर्वन्तीति दर्शयति–**येषामि**त्यादिना । यस्य सभामण्डपे ते नृणां प्रभवोऽपीतरवदाभान्तीत्यन्वयः । **यस्य**=भोजराजस्य, **सभामण्डपे**=सभारूपमण्डपे न तु गुप्तप्रदेशे, **ते**, **नृणां**=मनुजानाम्, **प्रभवोऽपि**=स्वामिनोऽपि, राजानोऽपीत्यर्थः, आस्तामितरे जनाः, **इतरवत्**=सामान्यमनुजवत्, **आभान्ति**=दृश्यन्ते । कीदृशे सभामण्डपे ? **अनेकजनाकुले**=सचिवादिप्रचुरजनसंकुले न तु जनशून्ये । कीदृशा राजानः ? सेवया आयाताः, **सेवया**=सेवारूपहेतुना, सेवार्थमित्यर्थः, **आयाताः**=आगताः । पुनः कीदृशाः ? **निजवपुर्मात्राः**=निजं वपुः शरीरमेव मात्रा परिच्छेदो येषां ते तथा, " परिच्छदाप्रमानेषु धने कर्णविभूषणे । अक्षरावयवे मात्रा मात्रं कार्त्स्न्येऽवधारणे ॥ " इति शास्वतः । परिच्छदशब्दश्च–उपकरणे, हस्त्यश्वरथपदातौ, वस्त्रादिभूषणे, परिवारे च वर्तते । तथा च त्यक्तोपकरणास्त्यक्तहस्त्यश्वरथपदातयस्त्यक्तवस्त्रादिभूषणास्त्यक्तपरिवारा वेत्यर्थः । अनेन 'इतरवत्' इति यदुक्तं तत्समर्थितम् । ते के राजानः ? सैन्यभराहितोरगपतिश्रान्ति बहिः प्रयातां येषां श्वेतातपत्रैः स्थगिता दिशो हिमांशुमहसो जायन्ते । **सैन्यभराहितोरगपतिश्रान्ति**=इदं प्रयाणक्रियाविशेषणम्, तदर्थस्तु सैन्यस्य यो भरो भारस्तेन आहिता स्थापिता कृता उगरपतेः शेषनागस्य श्रान्तिः श्रमो यथा भवति तथा **बहिः प्रयातां**= स्वनगरादन्यत्र प्रयाणं कुर्वताम्, **येषाम्**=इदानीं भोजसेवार्थमागतानां नृपाणाम्, **श्वेतातपत्रैः**=स्फटिकमुक्तादिनिर्मिततया धवलच्छत्रैः, **स्थगिताः**=आच्छादिताः, **दिशः**=आशाः, **हिमांशुमहसः**=हिमांशोश्चन्द्रस्य महस्तेजो ज्योत्स्ना यासु तास्तथा, चन्द्रज्योत्स्नाकलिता इव, **जायन्ते**=भवन्ति । अयं भावः–येषां नृपाणां प्रयाणे सति प्रचुरसैन्यभारेण शेषनागस्य श्रमो भवति, स्फटिकादिनिर्मितधवलातपत्रनिकरैश्च दिशश्चन्द्रज्योत्स्नाकलिता इव भवन्ति, एवंविधा अपि नृपाः सामान्यजनवदेकाकिनः समागत्य भोजं सेवन्त इति । अत्रोत्प्रेक्षा रूपकम्, परस्परं संसृष्टिः, । इदं शार्दूलविक्रीडितवृत्तम्, तल्लक्षणं तु अष्टात्रिंशत्तमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥ ४८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**न स्वप्नेऽपि समाश्रिता रिपुजनं म्लानिं गता नोन्नतौ,**
**लग्ना साधुगुणद्विषां शुचितया कर्णे न दुष्टात्मनाम् ।**
**निर्दोषाऽहमनेन दिक्षु गमिते यात्मीयवार्तामिव,**
**व्याकर्तुं व्रजति स्म यस्य तरसा कीर्तिः सुरेन्द्रालयम् ॥४९॥ [ शार्दूलविक्रीडितवृत्तम् ]॥**

### 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

तरसा=शीघ्रम् ॥ ४९ ॥

### 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ यशोवर्णनार्थमाह—यस्य कीर्त्ति**रित्य**मुना प्रकारेणाऽऽत्मीयवार्तां **व्याकर्त्तुं** भाषयितुमिवोत्प्रेक्ष्यते । **सुरेन्द्रालय**मूर्ध्वलोकं **तरसा व्रजति स्म** शीघ्रं जगामेत्यर्थः । इतिशब्दोक्तां वार्तां दर्शयति, निर्दोषा सत्यह**मनेन** राज्ञा दिक्षु गमितेति, अथ निर्दोषत्वमेवाऽऽत्मनो व्यक्तीकरोति, स्वप्नेऽप्यहं रिपुजनं न समाश्रिता, नाऽप्येतद्भूपस्योन्नतावहं म्लानिं गता, साधुगुणद्विषां दुष्टात्मनां कर्णे शुचितयाऽहं न लग्ना, इत्येतावद्दोषाभावे सत्यप्यहमनेनेतस्ततो भ्रामितेति वार्ताकथनाय सुरेन्द्रालयं यत्कीर्त्तिर्यातीति वृत्तार्थः ॥४९॥

### 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

अथ भोजराजयशो वर्णयति—**न स्वप्नेऽपी**त्यादिना । यस्य कीर्तिः सुरेन्द्रालयं तरसा व्रजति स्मेत्यन्वयः । **यस्य**=श्रीभोजराजस्य, **कीर्तिः**=यशः, **सुरेन्द्रालयं**=देवराजभवनम्, देवलोकमित्यर्थः, **तरसा**=शीघ्रम्, **व्रजति स्म**=जगाम, देवलोकपर्यन्तं प्रसृतेति भावः । अत्रोत्प्रेक्षते कविः किमर्थं देवलोकं जगाम ? आत्मीयवार्तां व्याकर्त्तुमिव, **आत्मीयवार्तां**=निजसमाचारम्, **व्याकर्तुमिव**=कथयितुमिव, कीदृशीं वार्तां ? निर्दोषाऽहमनेन दिक्षु गमितेति, **निर्दोषा**=दोषरहिता, **अहं**=कीर्तिः, **अनेन**=भोजराजेन, **दिक्षु**=आशासु, **गमिता**=भ्रमिता, इतस्ततः पर्यटनं कारितेत्यर्थः, अनेन कीर्तेः सर्वत्र प्रसारः सूचितः, **इति**=एवंप्रकारां वार्ताम् । कथं निर्दोषा ? यतः स्वप्नेऽपि रिपुजनं न समाश्रिता, उन्नतौ म्लानिं न गता, साधुगुणद्विषां दुष्टात्मनां कर्णे शुचितया न लग्ना, ततो निर्दोषेत्यर्थः । हेतुहेतुमद्भावेन व्याख्यानाद् इत्यर्थलाभः, **स्वप्नेऽपि**=निद्रावस्थायामपि आस्तां जागरणावस्थायाम्, **रिपुजनं**=भोजशत्रुम्, **न समाश्रिता**=नाश्रयत्वेन स्वीकृतवती, अनेन ये भोजरिपवस्ते न कीर्तिभाजनमिति सूचितम् । **उन्नतौ**=उदये वृद्धौ वा, **म्लानिं**=तेजोहीनताम्, मन्दतामित्यर्थः, **न गता**=न प्राप्ता, अनेन प्रतिदिनं भोजकीर्त्या वर्द्धमान उदयो ज्ञापितः । **साधुगुणद्विषां**=उत्तमगुणद्वेषवतां वा, **दुष्टात्मनां**=दुर्जनानाम्, **कर्णे**=श्रोत्रे, शुचितया—पवित्रतया, **न लग्ना**=न प्रविष्टा, अर्थादेतद्विपरीतानां सज्जनानां कर्णकोटरे प्रविष्टा, अनेन सज्जनानां पुरतो भोज कीर्तिवर्णनं भवतीति सूचितम्, अत्र व्रजतीवेति क्रियोत्प्रेक्षालङ्कारः, अतिशयोक्तिः, एकस्यैव 'अहम्' इति पदस्य सकलक्रियाभूतक्तप्रत्ययेऽन्वयाद् दीपकालङ्कारः, एषां मिथो नैरपेक्ष्यात् संसृष्टिः । इदं शार्दूलविक्रीडितवृत्तम्, तल्लक्षणं तु अष्टात्रिंशत्तमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥ ४९ ॥

卐 अस्य पञ्चाशत्तमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति ॥ 卐

### 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथैतावद्रूपवर्णने किमित्येतत्कथाकरणप्रयोजनं दर्शितमित्येतद्दर्शयति, **निःशेषे**ति, व्याख्या० **निःशेषवाङ्मयविदोऽपि** समस्तशास्त्रज्ञातुरपि **जिनागमोक्ता** जिनप्रवचनोक्ताः कथाः श्रोतुं **समुपजातकुतूहलस्य** संजातकौतुकस्याऽवदातचरितस्य **राज्ञो** भोजस्य विनोदहेतोः स्फुटः प्रकटोऽद्भुतो रसः शृङ्गारादिको यस्याः सा तथेयं कथा मया रचितेति । भोजराजविनोद एवाऽत्र प्रयोजनं दर्शितं भवतीति वृत्तार्थः ॥५०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**निःशेषवाङ्मयविदोऽपि जिनागमोक्ताः,**
**श्रोतुं कथाः समुपजातकुतूहलस्य ।**
**तस्यावदातचरितस्य विनोदहेतो,**
**राज्ञः स्फुटाद्भुतरसा रचिता कथेयम् ॥५०॥ [ वसन्ततिलकावृत्तम् ] सप्तभिः कुलकम् ॥**
**आसीद् द्विजन्माखिलमध्यदेश–प्रकाशसाङ्काश्यनिवेशजन्मा ।**
**अलब्ध देवर्षिरिति प्रसिद्धिं, यो दानवर्षित्वविभूषितोऽपि ॥५१॥ [ उपजातिवृत्तम् ] ॥**

---

### 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**अलब्ध देवर्षिरिति प्रसिद्धिं** [ अलब्ध= ] यो लब्धवान् प्राप्तवान्, कां ? **प्रसिद्धिं**=प्रख्याम्, कथं ? **देवर्षिरिति**=देवमुनिरिति, स कथं ? **दानवर्षित्वविभूषितो**=दानवमुनित्वशोभितोऽपि, विरोधसूचकपरिहारः पुनर्देवर्षिरिति नाम **दानवर्षित्वं**=वितरणवर्षित्वं तेन **विभूषितो** दीनानाथादिदातेत्यर्थः ॥ ५१ ॥

### 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ कथाकारः पितामहपितृस्तवनपूर्वकं स्वनामाऽऽविष्करोति, **आसीदिति**, व्याख्या० अखिलः समस्तो यो मध्यदेशस्तस्य प्रकाशः प्रकटनं यस्मात् स एवंविधो यः शांङ्कास्यनामा निवेशस्तस्मिन् जन्म उत्पत्तिर्यस्य स तथा तादृशो **द्विजन्मा** ब्राह्मण आसीत् । मध्यदेशमध्यवर्तिशांङ्कास्यनिवेशोत्पन्नब्राह्मण इत्यर्थः । स किंनामा ब्राह्मण इत्याह **अलब्धेति**, व्याख्या० यो ब्राह्मणो नाम्ना देवर्षिरिति प्रसिद्धि**मलब्ध** प्राप्तवानिति, अत्र विशेषणव्यङ्ग्यतां दर्शयति, यः कथंभूतो दानवर्षित्वविभूषितोऽपि, यो हि दानवर्षिः स्यात् स कथं देवर्षिः, अयं च देवर्षिरपि दानवर्षित्वविभूषित इत्येतच्चित्रम् । स्पष्टार्थस्तु दानवर्षित्वं दानवृष्टिस्तया विभूषितो देवर्षिरिति च नाम्ना प्रतीत इति वृत्तार्थः ॥५१॥

### 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

मातिरिक्तसकलशास्त्रज्ञातुरपि, **जिनागमोक्ताः**=जिनप्रवचनप्रतिपादिताः **कथाः**=चरित्राणि, **श्रोतुम्**=आकर्णयितुम्, श्रवणायेत्यर्थः, **समुपजातकुतूहलस्य**=समुपजातं कुतूहलमपूर्वरसो यस्य स तथा तस्य । पुनः कीदृशस्य ? **अवदातचरितस्य**=अवदातं मनोज्ञं चरितं चरित्रं यस्य स तथा तस्य । कीदृशी कथा रचिता ? **स्फुटाद्भुतरसा**=स्फुटाः प्रकटा अद्भुता आश्चर्यजनका रसाः शृङ्गाराद्यो यस्यां सा तथा । अत्र रूपककाव्यलिङ्गालङ्कारौ । इदं वसन्ततिलकावृत्तम् तल्लक्षणं तु पञ्चमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥ ५० ॥

अथ निजपितामहं वर्णयति–**आसीदि**त्यादिना । [स] द्विजन्मा आसीदित्यन्वयः । 'स' इत्यध्याहार्यमुत्तरदले यदुपादानात्, **द्विजन्मा**=ब्राह्मणः, **आसीद्**=अभवत् । कीदृशः ? **अखिलमध्यदेशप्रकाशसाङ्काश्यनिवेशजन्मा**=अखिलः समग्रो यो मध्यदेशः " हिमवद्विन्ध्ययोर्मध्यं यत् प्राक् विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः ॥ " इत्युक्तो देशविशेषस्तत्र प्रकाशः–प्रकाशते इति प्रकाशः प्रकाशनशाली यः सांकाश्यनिवेशः साङ्काश्याभिधानं नगरं तत्र जन्म उत्पत्तिर्यस्य स तथा । सङ्काशेन निर्वृत्तम्, " सुपन्थ्यादेर्ञ्यः " [ ६, २, ८४ ] इति ञ्यप्रत्ययः । साङ्काश्यं चासौ निवेशो नगरं च साङ्काश्यनिवेशः । " निवेशः सैन्यविन्यासे न्यासे द्रङ्गविवाहयोः । " इत्यनेकार्थसंग्रहः, द्रङ्गो नगरम्, यथा–" द्विषां निवेशेषु वरप्रवेशः कार्यो नृपैः... " । एतन्नगरनाम " अपायेऽवधिरपादानम् " [ २, २, २९ ] इतिसूत्रबृहद्वृत्तौ कलिकालसर्वज्ञश्रीहेमचन्द्रसूरीश्वरैः प्रदर्शितम्, यथा–साङ्काश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति, [ अत्र साङ्काश्यकैः पाटलिपुत्रकाणां समगुणत्वाद् यः साम्यं ज्ञातवान् स प्रकर्षाश्रयेण पुनर्बुद्ध्या पृथक् कृत्वा वाक्यं प्रयुङ्क्ते इति सिद्धापादानसंज्ञा, इति तदुपरिबृहन्न्यासे ] एतन्नगरमिदानीमिदानीन्तनाः संयुक्तप्रान्ते फरुखाबाद जिल्ला इति प्रसिद्धे विभागे 'संकिस' इति ख्यातं दर्शयन्ति । अथ प्रस्तुतमनुसरामः स कः ? यो दानवर्षित्वविभूषितोऽपि देवर्षिरिति ख्यातिमलब्ध, **यः**=ब्राह्मणः, **दानवर्षित्वविभूषितोऽपि**=दानवमुनित्वेनालङ्कृतोऽपि,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**शास्त्रेष्वधीती कुशलः क्रियासु, बन्धे च बोधे च गिरां प्रकृष्टः ।**
**तस्यात्मजन्मा समभून्महात्मा, देवः स्वयम्भूरिव सर्वदेवः ॥५२॥ [ इन्द्रवज्रावृत्तम् ] ॥**

### 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**शास्त्रेष्वित्यादि** । **आत्मजन्मा**=पुत्रो ब्रह्माप्यात्मना जन्म यस्य स तथोक्त उभयोः सर्वविशेषणानि योज्यानि ॥ ५२ ॥

### 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ तत्पुत्रं स्वस्य पितरं स्तुवन्नाह–**शास्त्रेष्विति**, व्याख्या० **तस्य** देवर्षे**रात्मजन्मा** पुत्रः **स्वयम्भूर्देव इव** शम्भुरिव सर्वदेवः परिणामतो नामतश्च **समभूद्** बभूव । कथंभूतः शास्त्रेष्वधीती पण्डितः, पुनः कथंभूतः कलासु **कुशलो** दक्षः, चः पुनरर्थे पुनः कथंभूतो **गिरां** वाचां **बन्धे** रचनायां, **बोधे** सम्यग्ज्ञाने, प्रकृष्टः प्रधान इति वृत्तार्थः ॥५२॥

### 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

दानवमुनिरपि, **देवर्षिः**=देवमुनिः, **इति**=एवंप्रकाराम्, **ख्यातिं**=प्रसिद्धिम्, **अलब्ध**=लब्धवान्, अत्र यो दानवमुनिः स देवमुनिर्न भवितुमर्हति देवदानवयोर्विरोधादिति विरोधस्तत्परिहारेऽयं प्रकारः–**दानवर्षित्वविभूषितः**=दानं वर्षयति दीनानाथादिभ्यो ददातीति दानवर्षी तस्य भावेन विभूषितः **देवर्षिरिति**=' देवर्षि ' इतिनाम्ना **ख्यातिं**=प्रसिद्धिम्, **अलब्ध**=लब्धवान्, देवर्षिनामेत्यर्थः । अत्र विरोधाभासालङ्कारः, छेकानुप्रासवृत्त्यनुप्रासाभ्यां संसृष्टिः । इदमुपजातिवृत्तम्. प्रथमचतुर्थपादयोरिन्द्रवज्रा, द्वितीयतृतीयपादयोरुपेन्द्रवज्रा, एतयोः संकरेणोपजातिः, यदुक्तं छन्दोऽनुशासने–" तौ जगाविन्द्रवज्रा " " जतजा गावुपेन्द्रवज्रा " " एतयोः परयोश्च संकर उपजातिश्चतुर्दशधा " [ एतयोरिन्द्रवज्रोपेन्द्रवज्रयोः सङ्करोऽन्योऽन्यपादमीलनमुपजातिरिति ] ॥ ५१ ॥

अथ सर्वदेवाभिधं निजपितरं स्तौति–**शास्त्रेष्वधीती**त्यादिना । तस्य सर्वदेव आत्मजन्मा समभूदित्यन्वयः । **तस्य**=श्रीदेवर्षिनाम्नो विप्रस्य, **सर्वदेवः**=सर्वदेवनामा, **आत्मजन्मा**=पुत्रः, **समभूत्**=सम्बभूव, संजात इत्यर्थः । कीदृशः ! **शास्त्रेष्वधीती**=शास्त्राणि अधीतानि येन स शास्त्रेषु अधीती, अधीतशास्त्रनिकर इत्यर्थः । " व्याप्ये क्तेन " [ २, २, ९९ ] इति कर्मणि सप्तमी । पुनः कीदृशः ? **क्रियासु**=धर्मकार्येषु व्यवहारकार्येषु च, **कुशलः**=चतुरः । पुनः कीदृशः ? गिरां बन्धे बोधे प्रकृष्टः, **गिरां**=वाणीनाम्, **बन्धे**=रचनायाम्, ग्रन्थकरण इत्यर्थः, **बोधे**=ज्ञाने, शास्त्रप्रतिपादितार्थज्ञाने इत्यर्थः, **प्रकृष्टः**=प्रधानः । पुनः कीदृशः ? **महात्मा**=महान् गुणगणाढ्य आत्मा यस्य स तथा । क इव ? **स्वयम्भूर्देव इव**=ब्रह्मा इव । कीदृशो ब्रह्मा ? **आत्मजन्मा**=आत्मना स्वयं जन्म यस्य स तथा, यदुक्तं पुराणे " हिरण्यवर्णमभवदत्राण्डमुदकेशयम् । तत्र जज्ञे स्वयं ब्रह्मा स्वयम्भूर्लोकविश्रुतः ॥ " पुनः कीदृशो ब्रह्मा ? **महात्मा**=परमात्मा तन्मतानुसारिभिस्तथाङ्गीकारात् । पुनः कीदृशो ब्रह्मा ? **सर्वदेवः**=सर्वेषां प्राणिनां देवः, पुनः कीदृशो ब्रह्मा ? **शास्त्रेष्वधीती**=शास्त्राणि वेदा अधीतानि 'इंक् स्मरणे' इति वचनात् प्रथमतः स्मृतानि येन स तथा, प्रथमतः स्मृतसकलवेद इत्यर्थः । पुनः कीदृशो ब्रह्मा ? **क्रियासु**=जगद्रचनासु **कुशलः**=निपुणः । पुनः कीदृशो ब्रह्मा ? **गिरां**=वाणीनाम्, **बन्धे**=रचनायाम्, **बोधे**=ज्ञाने च, प्रकृष्टः=प्रधानः, विविधग्रन्थरचनाशक्तियुक्तः, विविधग्रन्थबोधयुक्तश्चेत्यर्थः । यद्वा **गिरां**=वेदरूपवाणीनाम्, **बन्धे**=मुखरूपस्थानस्थापने **प्रकृष्टः**=प्रधानः, चतुर्भिर्मुखैश्चतुर्णां वेदानां धारणे निपुण इत्यर्थः, यद्वा **गिरां**=निजतनयायाः सरस्वत्याः, **बन्धे**=पुत्रीस्नेहेनालिङ्गनादौ हस्तादिना बन्धने वेष्टने, **बोधे**=तन्मनोभावविज्ञाने च प्रकृष्टः=निपुणः, अत्र पूर्णोपमालङ्कारः । तृतीयपादेऽन्त्यानुप्रासः, द्वितीयपादे छेकानुप्रासः, एषां परस्परनैरपेक्ष्यात् संसृष्टिः । इदमिन्द्रवज्रावृत्तम्, तल्लक्षणं तु गतश्लोकविवृतिप्रान्ते प्रोक्तम् ॥ ५२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तज्जन्मा जनकाङ्घ्रिपङ्कजरजःसेवाप्तविद्यालवो,**
**विप्रः श्रीधनपाल इत्यविशदामेतामबध्नात् कथाम् ।**
**अक्षुण्णोऽपि विविक्तसूक्तिरचने यः सर्वविद्याब्धिना,**
**श्रीमुञ्जेन सरस्वतीति सदसि क्षोणिभृता व्याहृतः ॥५३॥ [ शार्दूलविक्रीडितवृत्तम् ] ॥**

卐 अस्य त्रिपञ्चाशत्तमस्य श्लोकस्य विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकं नास्ति 卐

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ पितामहपितृवर्णनानन्तरमात्मानं कथाबन्धकत्वेन दर्शयति, **तज्जन्मे**ति । व्याख्या० ततः सर्वदेवाज्जन्मोत्पत्तिर्यस्याऽसौ तज्जन्मा तत्पुत्रोऽथ पुत्रोऽपि कश्चिदविनीतत्वेन पितृचरणसेवको न स्यादित्याह–कथंभूतोऽसौ जनकस्य पितुरंह्री चरणौ तावेव पङ्कजे कमले तयो रजः परागस्तस्य सेवयाऽऽप्तः प्राप्तो विद्याया लवो बिन्दुर्येन स तथा । श्रीधनपालनामा विप्र एतां कथा**मबध्ना**द्बन्धेत्यन्वयः । कथंभूता**मविशदां** तथाविधबन्धरहितामिदं च वस्त्वेतत्कवेर्गर्वाभावसूचनपरम् । नन्वेतत्कृतकथायास्तदाऽऽदेयत्वं स्याद्यदाऽस्य महत्पुरुषाङ्गीकृतत्वं स्यादित्येतद्दर्शयति, अक्षुण्णोऽपीति, विविक्ताः सुबद्धा याः सूक्तयः सुष्ठु वचनानि तासां रचनेऽ**क्षुण्णो**ऽप्यसमर्थोऽपि यो धनपालः सदसि सभायां सर्वविद्याब्धिना श्रीमुञ्जेन महीभृता सरस्वतीति बिरुदेन व्याहृतो भाषितः, अक्षुण्णोऽपीति वचनमात्मनोऽनौद्धत्यदर्शनार्थमन्यथैवं सति सरस्वतीबिरुदमेव न संभवेत् । तथा च मुञ्जराजाभिमतपण्डितस्याऽस्य कृतेरादेयत्वमेवेति वृत्तार्थः ॥५३॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

अथ प्रस्तुतकथाकर्तृत्वेन स्वपरिचयमाह–**तज्जन्मे**त्यादिना । [स] तज्जन्मा श्रीधनपाल इति विप्र एतां कथामबध्नादित्यन्वयः । '**स**' इत्यध्याहार्यमुत्तरदले यदुपादानात्, **तज्जन्मा**=तस्मात् सर्वदेवनाम्नो विप्राद् जन्म उत्पत्तिर्यस्य स तथा, सर्वदेवविप्रपुत्र इत्यर्थः । **धनपाल इति**=धनपालनाम्ना प्रसिद्धः, **विप्रः**=ब्राह्मणः, **एतां**=प्रस्तुतां तिलकमञ्जरीनाम्नीम्, **कथाम्**=आख्यायिकालक्षणं प्रबन्धम्, **अबध्नात्**=अरचयत, भेदविवक्षया अन्यार्थविभक्त्या निर्देशः, ननु कथाया वक्ष्यमाणत्वेन कथं भूतकालिको निर्देश इति चेदुच्यते प्राक् कथां कृत्वा तदनु पीठिकाकरणे न भूतनिर्देशो विरोधं वहति, यद्वा धनपालेन वारद्वयं तिलकमञ्जरी रचिता, तत्र पूर्वा भोजेन नाशिता, इयमुत्तरा, अस्याः पीठिकाभागे पूर्वरचितामाश्रित्य भूतकालनिर्देशो न विरोधमावहति । कीदृशो धनपालः ? **जनकाङ्घ्रिपङ्कजरजःसेवाप्तविद्यालवः**=जनकस्य पितुरङ्घ्रिपङ्कजयोश्चरणकमलयोर्यद् रजो धूली तस्य सेवया आप्तः प्राप्तो विद्याया लवोंऽशो येन स तथा, अनेन पितृसेवाप्रसादो गर्वपरिहारश्च दर्शितः । कीदृशोऽपि धनपाल एतां कथामबध्नात् ? विविक्तसूक्तिरचने अक्षुण्णोऽपि, **विविक्तसूक्तिरचने**=विवेकयुताः पवित्रा वा याः सूक्तयः सुभाषितानि तासां रचने रचनायाम्, **अक्षुण्णोऽपि**=अभ्यासरहितोऽपि । स कः ? यः श्रीमुञ्जेन क्षोणिभृता सदसि सरस्वतीति व्याहृतः, **यः श्रीमुञ्जेन**=श्रीमुञ्जनाम्ना, **क्षोणिभृता**=भूपालेन, **सदसि**=सभायाम्, **सरस्वतीति**=हे सरस्वति ! सरस्वतीस्वरूप ! आगच्छ, यद्वा आगतोऽयं सरस्वती सरस्वतीरूप इत्यादिना, **व्याहृतः**=भाषितः कथितो वा । कीदृशेन मुञ्जेन ? **सर्वविद्याब्धिना**=सकलविद्यासागरेण । कीदृशीं कथाम् ? । **अविशदां**=न विद्यते विशदा उत्तमा कथा यस्या उपरि सा तथा ताम्, अनुपमामित्यर्थः । अत्रातिशयोक्ति-छेकवृत्त्यनुप्रासेन रूपकेण काव्यलिङ्गेन च संसृज्यते । इदं शार्दूलविक्रीडितवृत्तम्, तल्लक्षणं तु अष्टत्रिंशत्तमश्लोकविवृतिप्रान्ते प्रोक्तम् ॥ ५३ ॥

**॥ इति श्रीतिलकमञ्जरीपीठिका ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अस्ति रम्यतानिरस्तसकलसुरलोका स्वपदापहारशङ्कितशतक्रतुप्रार्थितेन शततमक्रतुवाञ्छाविच्छेदार्थमिव पार्थिवानामिक्ष्वाकूणामुत्पादिता प्रजापतिना [अ],**

### 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**अस्ती**त्यादि नगरीवर्णकः । **शतक्रतुः**=इन्द्रः ॥ अ ॥

### 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथोक्तप्रयोजनादियं कथामारचयति, अस्ति रम्यतेत्यारभ्योत्तरकोशलेष्वयोध्येति पर्यन्तमुत्तरकोशलदेशेष्वयोध्या नाम नगर्यस्तीति भावः । अथ तस्या विशेषणान्याह–कथंभूताऽयोध्या, **रम्यतानिरस्तसकलसुरलोका**=मनोज्ञत्वेन निरस्तः सकलस्वर्गलोको यया सा तथा, पुनः कथंभूता, **उत्पादिता**=निष्पादिता, केन **प्रजापतिना**=ब्रह्मणा, किमर्थं **शततमक्रतुवाञ्छाविच्छेदार्थं**=शततमो यः क्रतुर्यागो देवपूजाविशेषस्तस्य वाञ्छाविनाशाय, इवोत्प्रेक्षायां, केषां **पार्थिवानां**, कथंभूतानामि**क्ष्वाकूणामि**क्ष्वाकुवंशोद्भवानां, ननु प्रजापतिना कथमेषां तद्वाञ्छाविच्छेदो विहित इति विशेषणद्वारा दर्शयति, कथंभूतेन प्रजापतिना **स्वपदापहारशङ्कितशतक्रतुप्रार्थितेन,** स्वस्य पदं स्वपदमिन्द्रपदं तस्याऽपहार उद्दालनं तेन शङ्कितो यः शतक्रतुरिन्द्रस्तत्प्रार्थितेन, अयं भावोऽयोध्या हि सुरलोकाधिकत्वेन सामान्यनिर्मिता कथं संभवति, तेन लोके परमोत्कृष्टेन ब्रह्मणा निर्मितेत्युत्प्रेक्ष्यते । ननुतन्निर्माणे तु शततमक्रतुवाञ्छाविच्छेदः कथं प्रयोजनमिति चेच्छृणु, अत्राऽप्युत्प्रेक्षयैवाऽर्थो निगद्यते इक्ष्वाकुपार्थिवैर्हि नवनवतिपूजाविशेषाः कृता यावच्च तेषां शततमपूजाविशेषवाञ्छा समुत्पन्ना तावदिन्द्रेण ज्ञातमेभिः शततमपूजाफलकं मत्पदमवश्यं ग्राह्यं तथा च कथमहं भविष्यामीति विचिन्त्य ब्रह्मणः प्रार्थितं यत्त्वयैतेषां शततमक्रतुवाञ्छाविच्छेदः कार्य इति, तत्प्रार्थनाभङ्गभीरुणा ब्रह्मणा सुरलोकादप्यधिकाऽयोध्या निर्मिता, तां च दृष्ट्वा तैश्चिन्तितं यच्छततमक्रतुलभ्यं स्वर्गाधिपत्यं तच्चैतन्नगर्याधिपत्येन लब्धमेवेति तेषां तद्वाञ्छाविच्छेदो जात इति तात्पर्यार्थः ॥ अ ॥

### 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

कृतमङ्गलाचरणादिपीठिकाभागः कविः कथां कथयति–**अस्ति रम्यते**त्यादिना । उत्तरकोशलेषु 'अयोध्या' इति यथार्थाभिधाना नगरी अस्तीत्यन्वयः । **उत्तरकोशलेषु**=कोशलदेशोत्तरविभागे, कोशलशब्दस्य देशविशेषवाचित्वाद् बहुवचनेन निर्देशः, **अयोध्येति**='अयोध्या' इतिनाम्नी, **यथार्थाभिधाना**=अर्थमवयवार्थमनतिक्रम्य वर्तत इति यथार्थम्, यथार्थमभिधानं नाम यस्याः सा तथा, अवयवार्थश्च योद्धुं शक्या योध्या, न योध्या अयोध्या, प्रचुररक्षणसाधनकलिततया रिपुभिरनाक्रमणीयेति भावः । **नगरी**="पुण्यक्रियादिनिपुणैश्चातुर्वर्ण्यजनैर्युता । अनेकजातिसम्बद्धा नैकशिल्पिसमाकुला । सर्वदैवतसम्बद्धा नगरीत्यभिधीयते" इत्युक्ता पुरी, **अस्ति**=विद्यते । कीदृशी नगरी ? **रम्यतानिरस्तसमस्तसुरलोका**=रम्यतया रमणीतया निरस्तोऽधरीकृतः समस्तः सकलः सुरलोको देवप्रदेशो यया सा तथा । अत्रातिशयोक्तिरलङ्कारः । कीदृशीव नगरी ? **उत्पादितेव**=निर्मितेव, केन ? **प्रजापतिना**=ब्रह्मणा, कीदृशेन प्रजापतिना ? **स्वपदापहारशङ्कितशतक्रतुप्रार्थितेन**=स्वपदमिन्द्ररूपा निजपदवी तस्यापहारेऽपहरणे शङ्कितो यः शतक्रतुरिन्द्रस्तेन प्रार्थितेन, किमर्थं प्रार्थितेन ? इक्ष्वाकूणां पार्थिवानां शततमक्रतुवाञ्छाविच्छेदार्थम्, **इक्ष्वाकूणाम्**=इक्ष्वाकुवंशजातानाम्, **पार्थिवानां**=राज्ञाम्, **शततमक्रतुवाञ्छाविच्छेदार्थं**=शततमस्य क्रतोरश्वमेधाख्ययज्ञस्य या वाञ्छा इच्छा तस्या विच्छेदार्थं विनाशार्थम् । अत्रोत्प्रेक्षालङ्कारः । अयं भावः–यः क्रतूनां शतं कुर्यात् स इन्द्रो भवति 'अश्वमेधशतादिन्द्रो जायते' इति श्रुतेः, इक्ष्वाकुभूपालैर्नवनवतिः क्रतवः कृता यदि शततमं क्रतुं करिष्यन्ति तदा ममेन्द्रपदवी तदायत्ता भविष्यतीति शङ्कावता इन्द्रेण ब्रह्मा प्रार्थितः –यदुत, अमीषां भूपानां शततमक्रतुवाञ्छाविच्छेदो यथा भवेत्तथा कर्तव्यमिति, ब्रह्मणा च स्वर्गादपि सुन्दरीयं नगरी रचिता यां दृष्ट्वा निरुक्तभूपानां स्वर्गेच्छा तत्कारणीभूतशततमक्रतुवाञ्छा च विलीना । यद्वा किमर्थं निर्मिता ? इक्ष्वाकूणां पार्थिवानां शततमक्रतुवाञ्छाविच्छेदार्थमिति योजना । अत्रायं भावः–यदीमे इक्ष्वाकुभूपालाः शततमं क्रतुं करिष्यन्ति तदा ममेन्द्रपदवी तदाश्रिता भविष्यतीति शङ्कावता इन्द्रेण ब्रह्मा पार्थितः–यदुत, स्वर्गादपि सुन्दरी एतन्नगरी करणीया येन तामवलोक्येमे भूपाः स्वर्गं तत्साधनं शततमं क्रतुं च नेच्छेयुः, ततो ब्रह्मणेयं नगरी निर्मिता ॥ अ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वृत्तोज्ज्वलवर्णशालिनी कर्णिकेवाम्भोरुहस्य मध्यभागमलङ्कृत्य स्थिता भारतवर्षस्य [आ], तुषारधवलभित्तिना विशालवप्रेण परिगता प्राकारेण [इ], विपुलसोपानसुगमावतारवापीशत-समाकुला [ई],**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**वृत्तोज्ज्वलवर्णशालिनी**=शीलनिर्म्मला ये वर्णा ब्राह्मणादयस्तैः शालिनी च शोभायमाना पुरी, **कर्णिका** च बीजकोशश्च वृत्ता वर्तुला धवलवर्णशालिनी च ॥ **आ** ॥ वप्रस्तटः ॥ **इ** ॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

पुनः कथंभूताऽयोध्या, **वृत्तोज्ज्वलेति, अम्भोरुहस्येव** कमलस्येव **भारतवर्षस्य** भरतक्षेत्रस्य मध्यभागमलङ्कृत्य कर्णिकेव स्थिता, कर्णिकायोध्ययोः साम्यं दर्शयति, कथंभूताऽयोध्या कर्णिका च, **वृत्तोज्ज्वलवर्णशालिनी** वृत्तेनाऽऽचारेणोज्ज्वलो वर्णो ब्राह्मणादिकस्तेन शालिनी, कर्णिकापक्षे तु वृत्ता वृत्ताकारोज्ज्वलवर्णः श्वेतवर्णस्तेन शालिनीति ॥ **आ** ॥ पुनरयोध्या कथंभूता **परिगता** व्याप्ता, केन **प्राकारेण** बाह्यकोट्टेन, कथंभूतेन **तुषारेति,** तुषारवद्धिमवद्धवला भित्तिर्यस्य स तथा तेन, कथंभूतेन **विशालवप्रेण** विशालो विस्तीर्णो वप्रोऽन्तःकोट्टो यत्र स तथा तेन, ॥ **इ** ॥ पुनः कथंभूताऽयोध्या, **विपुलेति** विपुलैर्विस्तीर्णैः सोपानैः सुगमोऽवतार उत्तरणं यासां तास्तथैवंविधा वाप्यो दीर्घिकास्ताभिः समाकुलेति ॥ **ई** ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

पुनः कीदृशी नगरी ? **भारतवर्षस्य**=भरतक्षेत्रस्य, **मध्यभागं**=मध्यप्रदेशम्, **अलङ्कृत्य**=शोभयित्वा, **स्थिता**=स्थितिशालिनी । केव स्थिता ? **कर्णिकेव**=यथा कर्णिका बीजकोषः, **अम्भोरुहस्य**=कमलस्य, मध्यभागमलङ्कृत्य स्थिता तथा, कीदृशी नगरी कीदृशी च कर्णिका ? **वृत्तोज्ज्वलवर्णशालिनी**=नगरीपक्षे वृत्तेन सदाचारेण उज्ज्वलाः पवित्रा ये वर्णा ब्राह्मणादयस्तैः शालते श्लाघावती भवतीति तथा, कर्णिकापक्षे वृत्ता वर्तुलाकारा उज्ज्वला विकासिनी वर्णशालिनी पीतादिवर्णशालिनी च यद्वा उज्ज्वलं कनकं तद्वर्णशालिनी यद्वा उज्ज्वलो विशदो दीप्तो वा यो वर्णस्तेन शालते श्लाघावती भवतीत्येवंशीलेति तथा। "वृत्तं वृत्तौ दृढे मृते, चरित्रे वर्तुले छन्दस्यतीताधीतयोर्व्रते।" इत्यनेकार्थसंग्रहः, "गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः । प्रवर्तनं हितानां च तत्सर्वं वृत्तमुच्यते ॥" उज्ज्वलस्तु विकासिनि, शृङ्गारे विशदे दीप्ते" इत्यनेकार्थसंग्रहः । उज्ज्वल–स्वर्ण, इतिशब्दस्तोममहानिधिः । "वर्णो गुणाक्षर-यशः–शुक्लादिब्राह्मणादिषु । वर्णः स्तुतौ कथायां च वर्णः स्याद्भेदरूपयोः ॥" इति शास्वतः । अत्र श्लेषानुप्राणितोत्प्रेक्षालङ्कारः ॥ **आ** ॥

पुनः कीदृशी नगरी ? **प्राकारेण**=कोट्टेन, **परिगता**=वेष्टिता, कीदृशेन प्राकारेण ? **तुषारधवलभित्तिना**=तुषारो हिमं कर्पूरं वा तद्वद् धवला शुभ्रा भित्तिर्यस्य स तथा तेन । पुनः कीदृशेन ? **विशालवप्रेण**=विशालो विस्तृतो वप्रः परिखोधृतमृत्तिकास्तूपरूपा प्राकाराधारभूता मूलभूमिर्यस्य स तथा तेन, "चयो वप्रोऽस्य पीठभूः" [ अस्य प्राकारस्य पीठभूर्मूलभूमिः ] इत्यभिधानचिन्तामणिः । अत्र लुप्तोपमालङ्कारः ॥ **इ** ॥

पुनः कीदृशी नगरी ? **विपुलसोपानसुगमावतारवापीशतसमाकुला**=विपुलैः विस्तृतैः सोपानैः पाषाणादिरचितावतरणसाधनैः सुगमः सुखकरोऽवतारोऽवतरणं यासु तादृशीनां वापीनां जलाशयविशेषाणां शतैः समाकुला व्याप्ता, "शतेन धनुर्भिः पुष्करणी, त्रिभिर्दीर्घिका, चतुर्भिर्द्रोणः पञ्चभिस्तडागः । द्रोणाद् दशगुणा वापी ।" इति शब्दस्तोममहानिधिः ॥ **ई** ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मनोरथानामपि दुर्विलङ्घेन प्लवमानकरिमकरकुम्भीरभीषणोर्मिणा जलप्रतिबिम्बितप्राकारच्छलेन जलराशिशङ्कया मैनाकमन्वेष्टुमन्तःप्रविष्टहिमवतेव महता खातवलयेन वेष्टिता [उ], पवनपटुचलितधवलध्वजकलापैर्जामदग्न्यमार्गणाहतकौञ्चाद्रिच्छिद्रैरिवोद्भ्रान्तराजहंसैराशानिर्गममार्गायमाणैश्चतुर्भिरत्युच्चैर्गोपुरैरुपेता [ऊ],**

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

पुनः कथंभूताऽयोध्या, **महतेति,** महत्या खातिकया वेष्टिता, कथंभूतेन खातवलयेनाऽ**न्तःप्रविष्टहिमवतेवा**ऽन्तर्मध्ये प्रविष्टो हिमवान् पर्वतो यत्र स तथा तेन, इवेत्युत्प्रेक्षायां, केन **जलप्रबिम्बितप्राकारच्छलेन** खातिकाजलप्रतिबिम्बितकोट्टछद्मना, किमर्थमसौ तत्र प्रविष्ट इत्याह–किंकर्तु**मन्वेष्टुं** वीक्षितुं कं **मैनाकं** मैनाकनामकं स्वपुत्रं, कया **जलराशिशङ्कया** समुद्राशङ्कयेत्यर्थः । अथ खातवलयस्य समुद्रौपम्यं विशेषणाभ्यां द्रढयति, कथंभूतेन खातवलयेन मनोरथानामपि दुर्विलङ्घेन, तल्लङ्घने मनोरथा अपि कर्तुमशक्या इत्यर्थः । पुनः खातवलयेन कथंभूतेन **प्लवमानकरिमकरकुम्भीरभीषणोर्मिणा** प्लवमानास्तरन्तः करिणो हस्तिनो मकरा मत्स्याः कुम्भीरा जलजीवविशेषास्तैर्भीषणा भयकारिण ऊर्मयः कल्लोला यस्य स तथा तेनेति ॥ **उ** ॥ पुनः कथंभूताऽयोध्याऽत्युच्चैश्चतुर्भि**र्गोपुरैः** प्रतोलीभिरुपेता, कथंभूतैर्गोपुरैः **पवनपटुचलितधवलध्वजकलापैः** पवनेन वायुना पटु यथा स्यात्तथा चलितः कम्पितो धवलध्वजकलापो येषां ते तथा तैः, **जामदग्न्यमार्गणाहतकौञ्चाद्रिछिद्रैरिव,** इवोत्प्रेक्ष्यते, जमदग्नेरपत्यं जामदग्न्यः परशुरामस्तस्य मार्गणा बाणास्तैराहतो विद्धः कौञ्चाद्रिः कौञ्चपर्वतस्तस्य छिद्राणीव छिद्राणि तैर्गोपुरच्छलेन जातान्येवंविधानि कौञ्चाद्रिछिद्राणीत्यर्थः । कथंभूतैस्तच्छिद्रैरिति, **उद्भ्रान्तेति,** कम्पितध्वजच्छलात्तूद्भ्रान्ता उच्चलिता राजहंसा येषु तानि तथा तैर्ध्वजानां श्वेतवर्णत्वेन राजहंसोत्प्रेक्ष्यत्वम् । पुनः कथंभूतैर्गोपुरैस्तच्छिद्रैश्चा**ऽऽशानिर्गममार्गायमाणै**राशासु दिक्षु निर्गमं विहरणं मार्गायमाणा गवेषयन्तो जना येषु ते तथा तैस्तेषु गोपुरेषु स्थित्वा जनाः पूर्वेयं पश्चिमेयमित्यादिदिग्विभागं निर्णयन्तीत्यर्थः । कौञ्चाद्रिछिद्रपक्षे त्वाशानिर्गमं मार्गायमाणा हंसा येषु ते तथा तैरित्यर्थः ॥**ऊ**॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

पुनः कीदृशी नगरी ? महता खातवलयेन वेष्टिता, **महता**=विशालेन, **खातवलयेन**=खातं परिखा, तदेव वलयाकारत्वाद् वलयं तेन **वेष्टिता**=आवृता । कीदृशेन खातवलयेन ? **मनोरथानामपि**=अभिलाषाणामपि, **दुर्विलङ्घेन**=दुः खेन लङ्घ्यतेऽतिक्रम्य गम्यते इति दुर्विलङ्घस्तेन तथा, यद्विलङ्घने मनोरथा अपि दुष्करा आस्तां पारगमनवार्तेति भावः । पुनः कीदृशेन खातवलयेन ? **प्लवमानकरिमकरकुम्भीरभीषणोर्मिणा**=प्लवमानास्तरन्तो ये करिणो जलहस्तिनो मकराः स्वनामख्याता जलजन्तुविशेषाः कुम्भीरा जलसूकरास्तैर्भीषणा भयानका उर्मयः कल्लोला यस्मिन् तेन तथा । पुनः कीदृशेनेव खातवलयेन ? **अन्तःप्रविष्टहिमवतेव**=अन्तःप्रविष्टो मध्यगतो हिमवान् हिमाचलो यत्र तेन तथेव, कया रीत्या हिमवानन्तः प्रविष्टः ? **जलप्रतिबिम्बितप्राकारच्छलेन**=जले खातोदके प्रतिबिम्बित आरान्नवर्तितया प्रतिबिम्बरूपेण दृश्यमानो यः प्राकारस्तस्य छलेन व्याजेन । किं कर्तुं हिमवान् अन्तःप्रविष्टः ? **मैनाकं**=मैनाकनामानं स्वपुत्रम्, **अन्वेष्टुम्**=अदृश्यतां गतं द्रष्टुम्, अन्वेषणायेत्यर्थः, ननु मैनाकस्तु समुद्रं प्रविश्यादृश्यो जातः कथमत्रान्वेषणा ? **जलराशिशङ्कया**=प्रस्तुतखातस्य विशालागाधतया हिमवतो जलधिशङ्का जाता, अतो मैनाकान्वेषणायान्तः प्रविष्ट इत्यर्थः । अत्रोत्प्रेक्षारूपकालङ्कारौ ॥ उ ॥

पुनः कीदृशी नगरी ? **गोपुरैः**=नगरद्वारैः, उपेता=**सहिता,** कीदृशैर्गोपुरैः ? **पवनपटुचलितधवलध्वजकलापैः**=पटु यथा स्यात्तथा चलित इति पटुचलितः, पवनैः पटुचलितो धवलध्वजानां श्वेतपताकानां कलापः समूहो येषु ते तथा तैः । कीदृशैरिव गोपुरैः ? **जामदग्न्यमार्गणाहतकौञ्चाद्रिच्छिद्रैरिव**=जामदग्न्यस्य परशुरामस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मांशुशिखराग्रज्वलत्कनककलशैः सुधापङ्कधवलप्राकारवलयितैरमरमन्दिरमण्डलैर्मण्डलितभोगमध्यप्रवेशितोन्मणिफणासहस्रं शेषाहिमुपहसद्भिरुद्भासितचत्वरा [ऋ], त्वरापतज्जलविसरसारणीसिक्तसान्द्रबालद्रुमद्रुमतलनिषादिना परिश्रान्तपथिकलोकेन प्रतिदि-**

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

पुनः कथंभूताऽयोध्या, **उद्भासितचत्वरो**द्भासितं प्रकाशितं चत्वरं यस्याः सा तथा, कैः**रमरमन्दिरमण्डलै**र्देवगृहसमूहैरित्यर्थः, कथंभूतैः **प्रांशुशिखराग्रज्वलत्कनककलशैः** प्रांशून्युच्छ्रितानि यानि शिखराणि तेषामग्रेषु ज्वलन्तो दीप्तिमन्तः कनककलशा येषु ते तथा तैः। पुनःकथंभूतैः **सुधापङ्कधवलप्राकारवलयितैः** सुधापङ्केनाऽमृतकर्दमेन लिप्तत्वाद्धवला ये प्राकारास्तैर्वलयितैर्वलयाकारीकृतैरत एव तैः किं कुर्वद्भिरुपहसद्भिः, कं **शेषाहिं** शेषनागं, कथंभूतं **मण्डलितेति**, मण्डलितस्य मण्डलीभूतस्य भोगस्य देहस्य मध्ये प्रवेशितमेवंविधं सत्, उदूर्ध्वं मणयो यत्र तदेवंविधं फणासहस्रं येन स तथा तमित्यर्थः ॥ ऋ ॥ पुनः कथंभूताऽयोध्या **श्यामायमानपरिसरा** श्याम इवाऽऽचरन् श्यामायमानः परिसरो बहिर्भागो यस्याः सा तथा, कै**रारामैः** काननैः, कथंभूतै**रमरकाननानुकारिभि**र्नन्दनवनानुकारिभिरित्यर्थः। पुनः कथंभूतैः **प्रतिदिवसमि**ति प्रतिदिनमुन्मीलन्ती विकसन्ती नीला श्यामा कान्तिर्येषु ते तथा तैः। अत्रोत्प्रेक्षामाह—इवोत्प्रेक्ष्यते **दिनकरेण** सूर्येणाऽऽकृष्य **संचार्यमाणानि** क्षेप्यमानानि सकलानि **शर्वरीतिमिराणि** रात्रिसम्बन्धिध्वान्तानि येषु ते तथा तैर्ननु सूर्येणैतावानाक्षेपः किमर्थं क्रियत इत्याह—**स्वसन्ततिप्रभवपार्थिवप्रीतये,** इक्ष्वाकुवंशस्य सूर्यप्रभवत्वेन स्वसन्ततौ प्रभवा ये पार्थिवा इक्ष्वाकुराजास्तेषां प्रीतये। तर्हि तथाविधेषु वनेषु समायाताः सन्तः प्रीतिं प्राप्नुवन्तीति सूर्येणेव तानि तथा कृतानीति। पुनरारामैः कथंभूतैः **क्षणमप्यमुच्यमानमनोभवभवानीभवनैः**, क्षणमपि समयमप्यमुच्यमानो मनोभवः कन्दर्पो येषु तान्येवंविधानि भवानीभवनानि पार्वतीमन्दिराणि प्रासादा येषु ते तथा तैः। ननु मनोभवस्य केनाऽमुच्यमानत्वमित्याह **भुज-**

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

मार्गणैर्बाणैराहतस्य ताडितस्य क्रौञ्चाद्रेः क्रौञ्चपर्वतस्य छिद्रैरिव विवरैरिव, "क्रुञ्चतीति क्रुञ्चः प्रज्ञादिपणि क्रौञ्चः, क्रौञ्चोऽपि" इत्यभिधानचिन्तामणिवृत्तिः। पुनः कीदृशैर्गोपुरैः ? **उद्भ्रान्तराजहंसैः**=उद् ऊर्ध्वं भ्रान्ताः पवनकम्पितहंससदृशधवलपताकाभिर्भ्रान्तिविषया राजहंसा रक्तवर्णचरणचञ्चुयुक्ताः श्वेतवर्णा हंसविशेषा येषु ते तथा तैः, क्रौञ्चाद्रिच्छिद्रपक्षे उद्भ्रान्ता उपरि भ्रमणं कृतवन्त इति। पुनः कीदृशैर्गोपुरैः ? **आशानिर्गममार्गायमाणैः**=आशानां दिशां निर्गमेषु निष्क्रमणेषु मार्गायमाणैर्विशालतया चतुर्दिगवस्थिततया च मार्गसदृशाचरणकारिभिः, मार्गतुल्यैरिति भावः। पुनः कीदृशैर्गोपुरैः ? **अत्युच्चैः**=अतिशयेनोर्ध्वं गतैः, कतिसंख्यकैर्गोपुरैः ? **चतुर्भिः**=चतुस्संख्यकैः। अत्रोत्प्रेक्षातिशयोक्त्योः संसृष्टिः ॥ ऊ ॥ पुनः कीदृशी नगरी ? **अमरमन्दिरमण्डलैः**=देवमन्दिरसमुदायैः, **उद्भासितचत्वरा**=उद्भासितानि प्रकाशितानि चत्वराणि अङ्गणानि यस्याः सा तथा। कीदृशैरमरमन्दिरमण्डलैः ? **प्रांशुशिखराग्रज्वलत्कनककलशैः**=प्रांशूनामुच्चानां शिखराणामग्रेषु ज्वलन्तो दीप्यमानाः कनककलशाः सुवर्णकुम्भा यत्र तानि तथा तैः। पुनः कीदृशैः ? **सुधापङ्कधवलप्राकारवलयितैः**=सुधापङ्केन ताम्बूलचर्वणोपयोगिचूर्णाख्यद्रव्यलेपेन धवला ये प्राकारास्तैर्वलयितैः वेष्टितैः। अत एव किं कुर्वद्भिः ? **शेषाहिं**=शेषनागम्, **उपहसद्भिः**=उपहासं कुर्वद्भिः, कीदृशं शेषाहिं ? **मण्डलितभोगमध्यप्रवेशितोन्मणिफणासहस्रं**=मण्डलितस्य वर्तुलाकारं प्रापितस्य भोगस्य देहस्य मध्ये प्रवेशितम् उन्मणि उपरिभागस्था मणयो यत्र एवंविधं च फणासहस्रं यस्य स तथा तम्। वर्तुलदेहस्थानापन्ना धवलप्राकारवलयवेष्टिता मन्दिरभागाः, फणास्थानापन्नानि शिखराणि, मणिस्थानापन्नाः कनककलशाः, तत्र तत्र शोभातिरेकेण शेषनागस्योपहासः। अत्र काव्यलिङ्गमलङ्कारोऽतिशयोक्त्या संसृज्यते ॥ ऋ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वसमाकर्ण्यमानमधुरतारघटीयन्त्रचीत्कारैः परित्यक्तसकलव्यापारेण पौरवनितामुखार्पितदृशा सविक्रियं प्रजल्पता पठता गायता च भुजङ्गजनसमाजेन क्षणमप्यमुच्यमानमनोभवभवभवानीभवनैः प्रतिदिवसमधिकाधिकोन्मीलन्नीलकान्तिभिः स्वसन्ततिप्रभवपार्थिवप्रीतये दिनकरेणेवाकृष्यसञ्चार्यमाणसकलशर्वरीतिमिरैरमरकाननानुकारिभिरारामैः श्यामायमानपरिसरा [ऋ६.]**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

परिसरः=पर्यन्तः॥ ऋ६ ॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

**ङ्गजनसमाजेन** भुजङ्गजना गणिकापतयस्तेषां समाजेनैकीभूतत्वात् परिषदा वृन्देनेत्यर्थः, किं कुर्वता भुजङ्गजनसमाजेन **सविक्रियं** विक्रियासहितं यथा स्यात्तथा **प्रजल्पता** लपता **पठता** भणता **गायता** गानं कुर्वता, पुनः कथंभूतेन भुजङ्गजनसमाजेन **पौरवनितामुखार्पितदृष्टिना** नगरस्त्रीवदनदत्तचक्षुषाऽत एव कथंभूतेन पुनस्तेन **परित्यक्तसकलव्यापारेणे**ति । अथ पुनः कथंभूतैरारामैस्त्**वरे**ति त्वरया वेगेन पतन्ति यानि जलानि तेषां विसरः समूहो यस्यां सा तथैवंविधा सारिणी कुल्या तया सिक्ताः सेकं प्रापिताः सान्द्राः सरसा बालद्रुमा बालवृक्षा येषु ते तथा तैः । पुनः कथंभूतैरारामैः, **आकर्ण्ये**त्याकर्ण्यमानाः सन्तो मधुरतरा घटीयन्त्रस्याऽरघट्टस्य चीत्कारा येषु ते तथा तैराकर्ण्यमानाः केनेत्याह–**परी**ति, श्रमवता पथिकजनेनेत्यर्थः । अत एव तेन कथंभूतेन **द्रुमतलनिषादिना** द्रुमतलोपविष्टेनेत्यर्थः ॥ ऋ६ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

पुनः कीदृशी नगरी ? **आरामैः**=केलिवनैः, **श्यामायमानपरिसरा**=श्यामायमानः श्याम इव दृश्यमानः परिसरः स्वसमीपस्थो बहिर्भागो यस्याः सा तथा । कीदृशैरारामैः ? **त्वरापतज्जलविसरसारणीसिक्तसान्द्रबालद्रुमैः**=त्वरया वेगेन पततां जलानां विसरः समुदायो यत्र तादृशी या सरणी कुल्या कृत्रिमक्षुद्रनदी तया सिक्ता सेचनं प्रापिता सान्द्रा निबिडा बालद्रुमा लघुवृक्षा येषु ते तथा तैः । पुनः कीदृशैरारामैः ? द्रुमतलनिषादिना परिश्रान्तपथिकलोकेन प्रतिदिवसमाकर्ण्यमानमधुरतारघटीयन्त्रचीत्कारैः, **द्रुमतलनिषादिना**=वृक्षाधोभागनिषण्णेन, **परिश्रान्तपथिकलोकेन**=परिश्रमयुक्तप्रवासिजनसमुदायेन, जातावेकवचनम्, **प्रतिदिवसं**=दिने दिने, **आकर्ण्यमानमधुरतारघटीयन्त्रचीत्कारैः**=आकर्ण्यमानाः श्रूयमाणा मधुराः कर्णप्रियास्तारा दीर्घा घटीयन्त्रस्य अरघट्टनाम्नो जलोद्धारणयन्त्रस्य चीत्कारा येषु ते तथा तैः । पुनः कीदृशैरारामैः ? परित्यक्तसकलव्यापारेण पौरवनितामुखार्पितदृशा सविक्रियं प्रजल्पता पठता गायता च भुजंगसमाजेन क्षणमप्यमुच्यमानमनोभवभवभवानीभवनैः । **परित्यक्तसकलव्यापारेण**=परित्यक्तो मुक्तो सकलव्यापारो विलासातिरिक्तं सकलं कार्यं येन स तथा तेन, **पौरवनितामुखार्पितदृशा**=पौरवनितानां गणिकानां मुखेषु अर्पिता स्थापिता दृग् दृष्टिर्येन स तथा तेन, **सविक्रियं**=भ्रूविक्षेपादिविविधक्रियायुक्तं यथा स्यात् तथा, **प्रजल्पता**=सामान्यतो वदता, **पठता**=पाठं कुर्वता, **गायता**=गायनं कुर्वता, च=समुच्चये, **भुजंगसमाजेन**=जारसमुदायेन, **क्षणमपि**=कञ्चितत्कालमपि, **अमुच्यमानमनोभवभवभवानीभवनैः**=अमुच्यमानानि मनोभवस्य कामदेवस्य भवस्य शंकरस्य भवान्या पार्वत्या भवनानि येषु ते तथा तैः, यद्वा मनोभवः कामदेवः स एव भवः शङ्करस्तस्या भवान्या रतेर्भवनानि गृहाणि, तथा च अमुच्यमानानि मनोभवभवभवानीभवनानि रतिगृहाणि यत्र ते तथा तैः । अत्र 'भवभवभवानीभवन' इतिव्यञ्जनवर्णस्यासकृत्साम्याद् वृत्यनुप्रासालङ्कारः, रूपकम्, अतिशयोक्तिश्च तेषां संसृष्टिः । पुनः कीदृशैरारामैः ? **प्रतिदिवसं**=दिने दिने, **अधिकाधिकोन्मीलन्नीलकान्तिभिः**=अधिकाधिकमत्यन्तमुन्मीलन्ती विकसन्ती नीला श्यामा कान्तिर्येषु ते तथा तैः । अत एव कीदृशैरिवारामैः ? स्वसन्ततिप्रभवपार्थिवप्रीतये दिनकरेणाकृष्य संचार्यमाणसकलशर्वरीतिमिरैरिव, **स्वसन्ततिप्रभवपार्थिवप्रीतये**=स्वसन्ततिः स्वापत्यप्रवाहस्तत्र प्रभवा उत्पन्ना

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**गिरिशिखरततिनिभशातकुम्भप्रासादमालाध्यासितोभयविभागैः स्फुटविभाव्यमानमरकतेन्द्रनीलवज्रवैडूर्यराशिभिश्चामीकराचलतटीव चण्डांशुरथचक्रमार्गैः पृथुलायतैर्विपणिपथैः प्रसाधिता [लृ],**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**प्रसाधिता**=मण्डिता ॥ लृ ॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

अथ पुनःकथंभूताऽयोध्या, **प्रसाधिता** प्र प्रकर्षेण आ समन्तात् राधं साधंट् संसिद्धाविति धातोः साधि प्रतिष्ठां प्रापिता, **कैर्विपणिपथैर्**हट्टमार्गैः, कथंभूतैर्विपणिपथैश्**चण्डांशुरथेति**, चण्डा अंशवः किरणा येषां तथैवंविधा रथास्तेषां चक्रमार्गो येषु ते तथा तैः। पुनः कथंभूतैर्विपणिपथैः **स्फुटेति**, स्फुटं प्रकटं विभाव्यमानानां विलोक्यमानानां मरकतरत्नानामिन्द्रनीलरत्नानां वज्ररत्नानां वैडूर्यरत्नानां राशिः पुञ्जो येषु ते तथा तैः। पुनः कथंभूतैर्विपणिमार्गैर्**गिरिशिखरेति**, पर्वतशिखरसंनिभसुवर्णप्रासादश्रेण्याऽध्यासितावधिष्ठितावुभयविभागौ पार्श्वद्वयं येषां ते तथा तैरेवंविधचतुष्पथप्रसाधिताऽयोध्येति। केव **चामीकराचलतटीव** मेरुपर्वततटभूमिरिव, तदर्थे तु विपणिपथविशेषणानि विशेषाण्यत्र वाच्यानि, तथाहि–यथा **चण्डांशुरथेति**, चण्डांशोः सूर्यस्य रथचक्रयोर्मार्गैर्मेरुतटी प्रसाधिता भवति तथैवंविधैर्विपणिपथैरियमपि। स्फुटविभाव्यमानेत्येवंविधा, एतावता रत्नानां राशिभिर्यथा मेरुतटी प्रसाधिता तथैवंविधैर्विपणिपथैरियमपि। **गिरिशिखरेति**, एवंविधप्रासादमालाधिष्ठितोभयविभागैर्यथा मेरुतटी प्रसाधिता तथैवंविधैर्विपणिपथैरियमपीति तात्पर्यार्थः ॥ लृ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

ये पार्थिवा राजानस्तेषां प्रीतये, **दिनकरेण**=सूर्येण, **आकृष्य**=सूर्यवंशजराजभूमावितस्तत आकर्षणं कृत्वा, **संचार्यमाणसकलशर्वरीतिमिरैरिव**=संचार्यमाणं प्रवेश्यमानं सकलं शर्वरीतिमिरं रात्रेरन्धकारं यत्र ते तथा तैः। अयं भावः–अयोध्यानगरीनृपा इक्ष्वाकुवंशजाः, इक्ष्वाकुवंशश्च सूर्यतो जात इति स्वसन्ततिप्रभवा राजानोऽयोध्यानृपाः, अथायोध्यानृपभूमौ निशान्धकारं प्रसृतम्, सूर्येण चेतस्तत आकृष्यैष्वारामेषु संचारितम्, तेनान्यत्र भूमावन्धकाराभावो जातः, एतेनामी राजानः प्रीतिं गता इति। अत्रोत्प्रेक्षालङ्कारः ॥ ऋ ॥

पुनः कीदृशी नगरी ? **विपणिपथैः**=हट्टमार्गैः, **प्रसाधिता**=अलङ्कृता, कीदृशैर्विपणिपथैः ? **गिरिशिखर०**ः गिरिशिखराणां ततिनिभाः पङ्क्तिसदृशा ये शातकुम्भस्य सुवर्णस्य प्रासादाः सुवर्णखचितप्रासादा इत्यर्थः, तेषां मालाभिः श्रेणिभिरध्यासितौ सहितावुभयभागौ पार्श्वद्वयं येषां ते तथा तैः। पुनः कीदृशैर्विपणिपथैः ? **स्फुटविभाव्यमान०**ः स्फुटं प्रकटं यथा स्यात्तथा विभाव्यमाना ज्ञायमानाः, प्रत्यक्षं दृश्यमाना इत्यर्थः, एवंविधा मरकतानां हरिद्वर्णमणिविशेषाणाम् इन्द्रनीलानां "क्षीरमध्ये क्षिपेन्नीलं क्षीरं चेन्नीलतां व्रजेत्। इन्द्रनीलमिति ख्यातम्" इत्युक्तानां मणिविशेषाणां वज्राणां हीरकाणां वैडूर्याणां मणिविशेषाणां च राशयः पुञ्जा यत्र ते तथा तैः। पुनः कीदृशैर्विपणिपथैः ? **पृथुलायतैः**=पृथुलैर्विस्तृतैरायतैर्दीर्घैः। कैः केव ? **चण्डांशुरथचक्रमार्गैः**=चण्डांशुः सूर्यस्तस्य यो रथस्तस्य ये चक्रे तन्मार्गैः **चामीकराचलतटीव**=चामीकराचलः सुवर्णमयो मेरुस्तस्य तटीव तटप्रदेश इव। अत्रापि निरुक्तविशेषणानि योज्यानि पूर्णोपमालङ्कारः ॥ लृ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**धृतोद्धुरप्राकारपरिवेषरभ्रंकषप्रतोलिभिरुत्तुङ्गमकरतोरणावनद्धहरितवन्दनमालैर्दोलाविभूषिताङ्गणवेदिभिरश्रान्तकालागुरुधूपधूमाश्लेषभयपलायमानदन्तवलभिकाभित्तिचित्रानिव विचित्रमयूखजालकमुचो माणिक्यजालकान् कलयद्भिरद्भुताकारैरनेकभूमिकाभ्राजिष्णुभिः सौधैः प्रवर्तिताविरतचन्द्रोदया [लृ],**

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

पुनरयोध्या कथंभूता **प्रवर्तिताविरतचन्द्रोदया** प्रवर्तितोऽविरतं निरन्तरं चन्द्रस्योदयो यस्यां सा तथा, कैः **सौधैर्**मन्दिरैः कथंभूतै**रनेकभूमिकाभ्राजिष्णुभिः** सप्तादिभूमिकायुक्तैः, सौधैः किं कुर्वद्भिर्माणिक्यजालकान् कलयद्भिः, कथंभूतान् **विचित्रेति**, विचित्रा विविधा ये मयूखाः किरणास्तेषां जालकं समूहं मुञ्चतीति तन्मुचो विचित्रकिरणान् विस्तारयत इत्यर्थः। पुनर्माणिक्यजालकान् कथंभूतान्, **अश्रान्तेति**, अश्रान्तोत्क्षेपणादविरतो यः कालागुरुधूपस्तस्य यो धूमस्तदाश्लेषभयात् पलायमानानि, दन्तवलभिकया दन्तमयछदिराधारेणोपलक्षितभित्तौ चित्राणीव भवन्ति ये ते तान्। इवोत्प्रेक्षायां, तत्किरणानि हि दन्तवलभिकाधोभित्तौ चित्राकारेण निपतन्ति तेनैवमुत्प्रेक्ष्यते, यत्तथाविधधूमाश्लेषभयेन जाने गृहमध्यस्थितभित्तितः पलाय्याऽत्राऽऽयातानि चित्राणीतितात्पर्यम्। शेषं सौधविशेषणत्रयं तु स्पष्टमेव। एवंविधैश्च सौधैः सर्वदा प्रकाशादविरतचन्द्रोदयत्वमस्याः सिद्धमिति॥ लृ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

पुनः कीदृशी नगरी ? **सौधैः**=राजमन्दिरैः, **प्रवर्तिताविरतचन्द्रोदया**=प्रवर्तितः प्रकर्षेण विहितोऽविरतो विरामरहितश्चन्द्रस्योदयः प्रकाशो यस्यां सा तथा। कीदृशैः सौधैः ? **धृतोद्धुरप्राकारपरिवेषैः**=धृत उद्धुरैर्दृढैः प्राकारैः कोट्टैः परिवेषो वेष्टनं यैस्ते तथा तैः। पुनः कीदृशैः सौधैः ? **अभ्रंकषप्रतोलिभिः**=अभ्रंकषा अत्युच्चाः प्रतोलयः 'पोळ' इति प्रसिद्धानि प्रवेशद्वारस्थानानि येषु ते तथा तैः, पुनः कीदृशैः सौधैः ? **उत्तुङ्गमकर०**=उत्तुङ्गा उच्चा मकरतोरणा उत्कीर्णमकराख्यजलजन्तुसम्बद्धास्तोरणा बहिर्द्वाराणि तेष्ववनद्धा बद्धा हरितवन्दनमाला हरितवर्णा आम्रदलादिनिर्मिता 'तोरण' इति लोकप्रसिद्धा मङ्गलार्थं मालाविशेषा येषु ते तथा तैः। "तोरणोर्ध्वे तु मङ्गल्यं दाम वन्दनमालिका" [ तोरणस्योपरि मङ्गलार्थं सहकारादिपल्लवनिर्मितं दाम माला वन्दनाय माला वन्दनमाला ] इत्यभिधानचिन्तामणिः। पुनः कीदृशैः सौधैः ? **दोलविभूषिता०**=दोलाभिर्हिण्डोलकाख्यदोलनयन्त्रैर्विभूषिता अङ्गणस्य वेदयः परिष्कृताश्चतुरस्रा भूमयो येषु ते तथा तैः। पुनः कीदृशैः सौधैः ? **माणिक्यजालकान्**=मणिखचितगवाक्षान्, **कलयद्भिः**=दधानैः, कीदृशान् माणिक्यजालकान् ? **विचित्रमयूखजालकमुचः**=विचित्रा विविधा ये मयूखाः किरणास्तेषां जालकं समूहं मुञ्चन्तीति तथा तान्, "गवाक्षवृन्ददम्भेषु जालं मत्स्यादिबन्धने।" इति शाश्वतः, जालशब्दात्के जालकान्। कीदृशानिव माणिक्यजालकान् ? **अश्रान्तकालागुरु०**=अश्रान्तः पुनः पुनः प्रक्षेपणाद् विरामरहितः कालागुरुधूपस्य यो धूमस्तस्याश्लेषभयेन संबन्धभयेन पलायमाना या दन्तवलभयश्छदिराधारभूता हस्तिदन्तमया वक्रदारवस्तासां भित्तिचित्रानिव भित्तिषु प्रतिबिम्बतया दृश्यमानविचित्रवर्णानिव। " वलभी छदिराधारः " इत्यभिधान चिन्तामणिः। पुनः कीदृशैः सौधैः ? **अद्भुताकारैः**=अद्भुत आकारो येषां ते तथा तैः। पुनः कीदृशैः ? **अनेकभूमिकाभ्राजिष्णुभिः**=अनेका या भूमिका गर्भगृहास्ताभिर्भ्राजिष्णुभिर्दीप्तिशीलैः। अतिशयोक्तिः, रूपकम्, उत्प्रेक्षा च। एषां संकरः॥ लृ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**प्रतिगृहं स्वच्छधवलायताभिर्दृष्टिभिरिवदिदृक्षारसेन वसुधया व्यापारिताभिः क्रीडासरसीभिः संवलिता[ए],मृदुपवनचलितमृद्वीकालतावलयेषु वियति विलसतामगुरुधूपधूमयोनीनामासार-वारिणेवोपसिच्यमानेष्वतिनीलसुरभिषु गृहोपवनेषु वनितासखैः विला सिभिरनुभूयमान-मधुपानोत्सवा[ ऐ ],**

卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**मृद्वीका**=द्राक्षा । **धूमयोनिः**=मेघः; ॥ ऐ ॥

卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

पुनरयोध्या कथंभूता **संवलिता** सं सम्यग् 'वलि वल्लि धारण' इति धातोर्वलिता व्याप्ता, काभिः **क्रीडासर-सीभिः** केलिसरोवरैरित्यर्थः । इवोत्प्रेक्ष्यते, **दृष्टिभिर्लो**चनैः, कथंभूताभिर्व**सुधया** पृथ्व्या व्यापारिताभिः, केन **दिदृक्षारसेन** द्रष्टुमिच्छा दिदृक्षा तद्रसेन, कथं **प्रतिगृहं** प्रतिमन्दिरमित्यर्थोऽयं भावः प्रतिमन्दिरस्थितसरसीछलेन जाने पृथ्व्या नगरदर्शनवाञ्छया दृष्टयः संचारिता इति । अथ सरसीदृष्ट्योः साम्यं दर्शयति, कथंभूताभिः सरसीभिर्दृष्टि-भिश्च **स्वच्छधवलायताभिः** स्वच्छो निर्मलो धवलः श्वेत आयतो विस्तारो यासां तास्तथा ताभिरति **॥ ए ॥**

पुनः कथंभूताऽयोध्या, **अनुभूयमानमधुपानोत्सवा**ऽनुभूयमानो मधुपानस्योत्सवो यस्यां सा तथा, कै**र्विलासिभि-र्भोगिभिः**, कथंभूतै**र्वनितासखैः**, स्त्रीसहितैः, केष्व**तिनीलसुरभिगृहोपवनेषु** गृहासन्नानि वनानि गृहोपवनानि नीलानि च सुरभीणि च तानि गृहोपवनानि च तानि तथा तेषु, नीलत्वमेवैतेषां द्रढयति, कथंभूतेषु गृहोपवनेषूपसिच्य-मानेषु, केना**ऽऽसारवारिणा** वेगवर्षिणा जलेन, कथमिवोत्प्रेक्ष्यते, **वियत्या**काशे स्थितत्वेन विलसन्तो येऽसिता-गुरुधूपाः कृष्णागुरुधूपास्त एव धूमयोनयो मेघास्तेषामिति । "धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघ" इति वचनाद्धूमयोनिरिति मेघनाम संभाव्यते । अथा[न्या]ऽर्थासंगतेरिति, अयं भावो नगरे किल दह्यमानकृष्णागुरुधूपधूमा गगनगताः सन्तो वेगवृष्टिमन्तो मेघा इव भान्ति तेनेत्थमुत्प्रेक्ष्यते, एतेषां वारिणोपसिच्यमानत्वेनैतानि वनानि नीलानि सन्तीति तात्पर्यम् । पुनरुपवनेषु कथंभूतेषु **मृदुपवने**ति, मृदुना पवनेन वायुना चलितानि कम्पितानि मृद्वीकालतानां द्राक्षावल्लीनां वलयानि येषु ते तथा तेष्विति ॥ ऐ ॥

卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

पुनः कीदृशी नगरी ? **क्रीडासरसीभिः**=क्रीडार्थं निर्मितैस्तडागैः, **संवलिता**=सहिता, कुत्र ? **प्रतिगृहं**= गृहे गृहे । कीदृशीभिरिव क्रीडासरसीभिः ? **वसुधया**=पृथिव्या, **दिदृक्षारसेन**=अपूर्वदर्शनाभिलाषकुतूहलेन, **व्यापारिताभिः**=दर्शनकार्यनियोजिताभिः **दृष्टिभिरिव**=लोचनैरिव, कीदृशीभिः क्रीडासरसीभिः ? कीदृशीभिश्च दृष्टिभिः ? **स्वच्छधवलायताभिः**=स्वच्छाभिर्निर्मलाभिः, धवलाभिः शुभ्राभिः, आयताभिः=दीर्घाभिः कर्मधारयसमासः । स्वच्छधवलेति पर्यायशब्दत्वात् पुनरुक्तवदाभासालङ्कारोऽतिशयोक्तिश्च **॥ ए ॥**

पुनः कीदृशी नगरी ? **विलासिभिः**=विलासप्रवृत्तजनैः, **अनुभूयमानमधुपानोत्सवा**=अनुभूयमानः साक्षा-त्क्रियमाणो मधुपानस्योत्सवो महो यस्यां सा तथा । "मधुश्चैत्रतुदैत्येषु जीवाशाकमधुकयोः । मधु क्षीरे जले मद्ये क्षौद्रे पुष्परसेऽपि च ।" इत्यनेकार्थसंग्रहः । कीदृशैर्विलासिभिः ? **वनितासखैः**=वनितानां नारीणां सखायो मित्राणि वनितासखाः "राजन्सखेः" [ ७.३.१०६ ] इति समासान्तोऽट् प्रत्ययः तैस्तथा, नारीकलितैरिति भावः । कुत्रानु-भूयमानमधुपानोत्सवा नगरी ? **गृहोपवनेषु**=गृहाणामुपवनेषु कृत्रिमवनेषु । कीदृशेषु गृहोपवनेषु ? **मृदुपवन०**= मृदुना कोमलेन पवनेन चलितानि कम्पितानि मृद्वीकानां द्राक्षाणां लतावलयानि लतामण्डलानि यत्र ते तथा तेषु । पुनः कीदृशेष्विव गृहोपवनेषु ? **वियति**=आकाशे, **विलसतां**=विलासं कुर्वताम्, शोभमानानामिति भावः, **अगुरु-धूपधूमयोनिनाम्**=अगुरुधूपस्य ये धूमास्त एव योनिरुत्पत्तिस्थानं येषां ते तथा तेषाम्, मेघानामित्यर्थः, तेषां धूमत उत्पत्तेरङ्गीकारात्, **आसारवारिणा**=धारासम्पातजलेन, सिच्यमानेष्विव=क्रियमाणसेचनेष्विव, उत्प्रेक्षा । अत एव कीदृशेषु गृहोपवनेषु ? **अतिनीलसुरभिषु**=अतिशयेन नीलवर्णयुतेषु सुगन्धयुतेषु च । उपवनानां नीलत्वं सुरभित्वं च स्वाभाविकं भवति तत्रेयमुत्प्रेक्षा–अस्यां नगर्यामगुरुधूपो दह्यते, तस्य धूमो नीलः सुरभिश्च भवति, एतादृशधूमाद्यो मेघो जातः सोऽपि नीलः सुरभिश्च, एतादृशमेघधारासम्पातेनेमान्युपवनानि सिच्यमानानि सन्ति, अतस्तान्यपि अतिनीलसुरभीणि जातानि अत्रोत्प्रेक्षालङ्कारोऽतिशयोक्त्या संकीर्यते **॥ ऐ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मज्जत्कोशलविलासिनीनितम्बास्फालनस्फारिततरङ्गया गृहीतसरलमृणालयष्टिभिः पूर्वार्णववितीर्णैः वृद्धकञ्चुकिभिरिवराजहंसैः क्षणमप्यमुक्तपार्श्वया कपिलकोपानलेन्धनीकृतसगरतनयस्वर्गवार्त्तामिव प्रष्टुं भागीरथीमुपस्थितया सरिता सरय्वाख्यया कृतपर्यन्तसख्या[ओ],**

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

पुनः कथंभूताऽयोध्या **कृतपर्यन्तसख्या** कृतं परि समन्तादन्तेन सह सख्यं मैत्री यस्याः सा कृतपर्यन्तसख्या, कया मैत्री कृतेत्याह–**सरिता**नद्या, कथंभूतया **सरय्वाख्यया** सरयूनाम्न्या, कथंभूतया सरय्वा नद्योपस्थितया, कां **भागीरथीं** गङ्गाम्, किं कर्तुं **प्रष्टुं** प्रश्नयितुम्, कां **कपिले**ति, कपिलेन कपिलनाम्ना। देवेन कोपानले कोपाग्नाविन्धनीकृता ये सगरतनयाः सगरपुत्रास्तेषां स्वर्गवार्तां स्वर्गप्राप्तिवार्तां कथमिवेत्युत्प्रेक्षायाम्, अयोध्यापरिसरे किलैवंविधा सरयूनदी वहत इत्यर्थः। पुनः कथंभूतया सरय्वा **क्षणमपीति**, क्षणमप्यमुक्तं पार्श्वं समीपं यस्याः सा तया, कै राजहंसैः कथमिवोत्प्रेक्षते, इमे राजहंसा वृद्धाः कञ्चुकिपुरुषा एव सन्ति, कथमित्याह–कथंभूतै राजहंसैः, **गृहीतसरले**ति, गृहीता सरला मृणालरूपा यष्टियैंस्ते तथा तैः, पुनः कथंभूतया सरय्वा मज्जदिति, सुगममिति ॥**ओ**॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

पुनः कीदृशी नगरी ? **सरय्वाख्यया**=सरयूनाम्न्या, **सरिता**=नद्या सह, **कृतपर्यन्तसख्यं**=कृतं पर्यन्ते परिसरे सख्यं मिलनरूपा मैत्री यया सा तथा तया, अयोध्यापरिसरे सरयूनाम्नी नदी वहतीत्यर्थः। कीदृश्या सरिता ? **मज्जत्कोशल०**=मज्जन्तीनां मज्जनं कुर्वन्तीनां कोशलविलासिनीनां कोशलदेशनारीणां ये नितम्बास्तेषामास्फालनेन संघट्टनेनास्फालितास्ताडितास्तरङ्गाः कल्लोला यस्याः, सा तथा तया, नितम्बोऽप्यपरस्तस्याः श्रोणिभागः यडिस्तथा।" इति शास्वतः। पुनः कीदृश्या सरिता ? **राजहंसैः**=हंसविशेषैः, **क्षणमपि**=कञ्चित्कालमपि, **अमुक्तपार्श्वया**=न मुक्तं पार्श्वं यस्याः सा तथा तया। कीदृशैरिव राजहंसैः ? **वृद्धकञ्चुकिभिरिव**=वृद्धा गतयौवना ये कञ्चुकिनो राज्ञा स्थापिता अन्तःपुररक्षकास्तैरिव, नद्या नारीलिङ्गत्वात् तद्रक्षाकरणाय रक्षकस्थानापन्ना राजहंसा इति भावः। कीदृशै राजहंसैः कीदृशैश्च कञ्चुकिभिः ? **गृहीतसरलमृणालयष्टिभिः**=गृहीता सरला मृणालरूपा पक्षे कमलनालसदृशी यष्टियैंस्ते तथा तैः। पुनः कीदृशैः ? **पूर्वार्णववितीर्णैः**=पूर्वार्णवः पूर्वसमुद्रस्तेन।वितीर्णैः प्रदत्तैः, पूर्वसमुद्रेण सह सम्बन्धात्पूर्वसमुद्रादायातैरिति भावः। कञ्चुकिपक्षे पूर्वः पूर्वदेशः स एवार्णवो विशालत्वात्समुद्रस्तेन प्रदत्तैः पूर्वदेशात्समायातैरित्यर्थः। पुनः कीदृश्या सरिता ? **भागीरथीं**=गङ्गाम्, **उपस्थितया**=मिलितया, किमर्थम् ? **प्रष्टुं**=प्रश्नाय, कां प्रष्टुं ? **कपिलकोपानलेन्धनी०**=कपिलस्य कपिलनाम्न ऋषेः क्रोधाग्निना इन्धनीकृता भस्मीकृता ये सगरतनयाः सगरनृपपुत्रास्तेषां स्वर्गवार्त्तां देवलोकगमनादिसमाचारम्। अत्रायं जैनेतररामायणलेशः–आसीदयोध्यायां सूर्यवंशीयः सगरनामा भूपः। तस्य द्वे भार्ये केशिनी सुमतिश्च। केशिन्यामेक एव पुत्रो जातोऽसमञ्जसनामा, सुमतौतु षष्टिः सहस्राणि पुत्रा अभूवन्। अथ कृतनवनवतियज्ञ आरब्धशततमाश्वमेधाख्ययज्ञः सगरोऽश्वरक्षणाय निजतनयान् निरयुङ्क्त। ततः स्वपदापहारशङ्कितेनेन्द्रेण सोऽश्वोऽपहृत्य कपिलाश्रमे मुक्तः। अन्यत्राश्वमनवलोकमानाः सगरतनयाः नखाग्रैः पृथिवीं विदार्य पातालस्थं कपिलाश्रमं गताः तत्राश्वं मुद्रिताननं कपिलं च विलोक्य कटु क्वणन्तः कपिलकोपानले शलभायन्ते स्म। इमे च मृताः सगरतनया असमञ्जपुत्रांशुमत्पुत्रदिलीपपुत्रभगीरथानीतगंगया पावित्र्यमापाद्य दिवं गमिताः। अत्र पूर्णोपमोत्प्रेक्षारूपकातिशयोक्तीनां संकरः। ॥ **ओ** ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सततगृहव्यापारनिषण्णमानसाभिर्निसर्गतो गुरुवचनानुरागिणीभिरनुल्वणोज्ज्वलवेषाभिः स्वकुलाचारकौशलशालिनीभिः शालीनतया सुकुमारतया च कुचकुम्भयोरपि कदर्थ्यमानाभिरुद्धत्या मणिभूषणानामपि खिद्यमानाभिर्मुखरतया रतेष्वपि ताम्यन्तीभिः वैयात्यपरिग्रहेण स्वप्नेऽप्यलङ्घयन्तीभिर्द्वारतोरण-**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**अनुल्वणः**=अनुद्भटः। **शालीनता**=कुलीनता सलज्जता च । **उद्धत्या**=उद्धतत्वेन । **वैयात्यं**=धृष्टता । **असतीव्रताभिः**=सह तीव्रतया वर्त्तन्ते यास्ताः सतीव्रता न तथा असतीव्रतास्ताभिः, तीक्ष्णत्वरहिताभिरितिविरोधपरिहारो विरोधस्तु स्वयमेवोद्भाव्यः। **कृतकुसंगाभिः**=विहितपृथ्वीसंबन्धाभिः, चरणोन **स्वभावे**=प्रकृतौ कृतकुत्सितसंबन्धाभिः॥**औ**॥

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

पुनः कथंभूताऽयोध्याऽ**लङ्कृता** भूषिता, काभिर्वधूभिः, कथंभूताभिः **सतते**ति, सततं निरन्तरं गृहव्यापारे निषण्णं स्थितं मानसं यासां तास्तथा ताभिः, पुनः कथंभूताभिस्ताभिर्**निसर्गत** इति, निसर्गतः स्वभावेन गुरुवचनेष्वाराध्यवचनेष्वनुरागोऽस्त्यासामिति तास्तथा ताभिः, पुनः कथंभूताभि**रनुल्वणे**ति, अनुल्वणोऽनुत्कटः स्वजात्युचित उज्ज्वलः श्वेतो वेषो यासां तास्तथा ताभिः, श्वेतवेषस्तु नवपरिणीतत्वात्तासामिति । पुनः कथंभूताभिर्वधूभिः **स्वकुलाचारे**ति, स्वकुलस्य य आचारः स्वकुलाचारस्तत्र यत्कौशलं नैपुण्यं तेन कृत्वा शालिनीभिर्मनोज्ञाभिः । पुनः कथंभूताभिर्वधूभिः **शालीने**ति, शालीनतयाऽधृष्टतया, चः पुनरर्थे, सुकुमारतया कुचकुम्भयोरपि **कदर्थ्यमानाभिरिति** भोगीभिस्तत्रापाद्यमानकदर्थनाभिरित्यर्थः । पुनः कथंभूताभिर्वधूभि**रुद्धत्ये**ति, मणिभूषणानामुद्धत्या, उद्‌र्ध्वं ग्रीवादौ धरणेन भूयोभारात् खिद्यमानाभिः । पुनः कथंभूताभिस्ताभि**स्ताम्यन्तीभिरि**ति, **रतेष्वपि** मैथुनेष्वपि नवत्वेन **मुखरतया** वाचालतया ताम्यन्तीभिः क्लेश्यमानाभिः, पुनः कथंभूताभिर्वधूभि**र्वैयात्ये**ति, वि विशेषेण याति सन्मार्गमिति वैयात्यं ब्रह्म तत्परिग्रहेण तत्स्वीकारेण **स्वप्नेऽ**पि निद्रायामपि द्वारतोरण**मलङ्घयन्तीभि**स्तदनुल्लङ्घनेन बहिरगच्छन्तीभिः ।

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

पुनः कीदृशी नगरी ? **कुलप्रसूताभिः**=उत्तमकुलोत्पन्नाभिः, **वधूभिः**=नवपरिणीतनारीभिः, **अलङ्कृता**=सुशोभिता । कीदृशीभिर्वधूभिः ? **सततगृहव्यापारनिषण्णमानसाभिः**=सततं निरन्तरं गृहस्य व्यापारेषु कार्येषु निषण्णं लीनं मानसं मनो यासां तास्तथा ताभिः । पुनः कीदृशीभिर्वधूभिः ? **निसर्गतः**=स्वभावतः, **गुरुवचनानुरागिणीभिः**=गुरूणां महतां वचनेषु अनुरागोऽत्यन्तं प्रीतिरस्त्यासामिति तास्तथा ताभिः । पुनः कीदृशीभिर्वधूभिः ? **अनुल्वणोज्ज्वलवेषाभिः**=अनुल्वणोऽनुद्भटः स्वकुलाचारोचित उज्ज्वलो विशदश्च वेषो यासां तास्तथा ताभिः । पुनः कीदृशीभिः ? **स्वकुलाचारकौशलशालिनीभिः**=स्वकुलस्याचारे यत् कौशलं निपुणता तेन शालन्ते श्लाघावन्त्यो भवन्तीत्येवंशीलास्तास्तथा ताभिः । पुनः कीदृशीभिः ? **शालीनतया**=कुलीनतया लज्जालुतया च, **सुकुमारतया**=सुकुमालतया, **चः**=समुच्चये, **कुचकुम्भयोरपि**=कलशाकारस्तनयुगलस्यापि, **उद्धत्या**=उच्चत्वेन महत्त्वेन वा, **कदर्थ्यमानाभिः**= पीड्यमानाभिः, पीनोच्चस्तनवहने सुकुमालतया पीनत्वप्रयुक्तं लज्जालुतया लोकदृश्यमानोच्चत्वप्रयुक्तं च दुःखं दधानाभिरित्यर्थः, अपिशब्देनात्यन्त सुकुमारत्वं सूच्यते । स्वभावे लज्जालुता स्तनयोः स्थूलता शेषावयवेषु च सुकुमारतेति भावः । पुनः कीदृशीभिर्वधूभिः ? **मणिभूषणानामपि**=मणिखचितालङ्काराणामपि आस्तामन्येषाम्, **मुखरतया**=परस्परास्फालनेन वाचालतया, **खिद्यमानाभिः**=खेदं वहमानाभिः, एतेन मणिभूषणधारणमवाचालत्वं च सूच्यते । पुनः कीदृशीभिर्वधूभिः ? **रतेष्वपि**=मैथुनक्रियास्वपि, आस्तामन्यत्र, **वैयात्यपरिग्रहेण**=निर्लज्जताङ्गीकारेण, निर्लज्जतामन्तरेण मैथुनक्रियानुपपत्तेः, **ताम्यन्तीभिः**=खिद्यमानाभिः । एतेनात्यन्तं लज्जालुता सूचिता । पुनः कीदृशीभिः ? **स्वप्नेऽपि**=निद्रावस्थायामपि, आस्तां जागरणे, **द्वारतोरणं**=स्वगृहद्वारबहिर्भागम्, **अलङ्घयन्तीभिः**=लङ्घनमकुर्वन्तीभिः । परपुरुषं मनसापि नेच्छन्तीभिरिति भावः। अत्र रूपकोत्प्रेक्षातिशयोक्तिकाव्यलिङ्गानां संसृष्टिः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मङ्गीकृतसतीव्रताभिरप्यसतीव्रताभिरलसाभिर्नितम्बभारवहने तुच्छाभिरुदरे तरलाभिश्चक्षुषि कुटिलाभिर्भ्रुवोरतृप्ताभिरङ्गशोभायामुद्धताभिस्तारुण्ये कृतकुसङ्गाभिश्चरणयोर्न स्वभावे कोपेऽप्यदृष्टमुखविकाराभिर्व्यलीकेऽप्यनुज्झितविनयाभिः खेदेऽप्यखण्डितोचितप्रतिपत्तिभिः कलहेऽप्यनिष्ठुरभाषिणीभिः सकलपुरुषार्थसिद्धिभिरिव शरीरबद्धाभिः कुलप्रसूताभिरलंकृता वधूभिः। [ औ ],**

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

पुनः कथंभूताभि**रङ्गीकृते**ति, अत्र विरोधालङ्कारमाहाऽङ्गीकृतं सत्याः शीलवत्या व्रतं याभिस्तास्तथा ताभिरेवंविधाभिरप्यसतीव्रताभिरिति विरोधस्तत्परिहारस्तु सह तीव्रया कार्कश्येन वर्तन्ते यास्ताः सतीव्रता न सतीव्रता असतीव्रतास्ताभिरसतीव्रताभिरित्यर्थः। पुनः कथंभूताभिर्वधूभि**रलसे**ति, नितम्बरवहनेन नितम्बप्रौढया आलस्यवतीभिरित्यर्थः। पुनः कथंभूताभिवधूभि**स्तुच्छे**ति, मुष्टिग्राह्यमध्यत्वात् तुच्छोदराभिरित्यर्थः। पुनः कथंभूताभि**रतृप्ते**ति, शरीरशोभायां तृप्तिरहिताभिः। पुनः कथंभूताभिस्ताभि**रुद्धते**ति, यौवनोद्धताभिरित्यर्थः। पुनः कथंभूताभिस्ताभिः **कृते**ति, चरणयोः पादयोः कृतः कु कुत्सितेनाऽलक्तकादिना सङ्गो याभिस्तास्तथा ताभिर्न तु स्वभावे, उत्तमस्वभावत्वात्तासामिति। पुनः कथंभूताभिस्ताभिः **कोपेऽपी**ति, कोपेऽप्यविकृतमुखाभिस्तासां कोपस्य बहिरदर्शनात्। पुनः कथंभूताभि**र्व्यलीकेऽपी**ति, व्यसनेऽप्यमुक्तविनयाभिरित्यर्थः। पुनः कथंभूताभिः **खेदेऽपी**ति, खेदेऽपि-विषादेऽप्यखण्डितोचितप्रतिपत्तिर्याभिस्तास्तथा ताभिः। पुनः कथंभूताभिस्ताभिः **कलहेऽपी**ति, राटयवसरेऽप्यकर्कश-वचनवादिनीभिरित्यर्थः। पुनः कथंभूताभिस्ताभिः **सकले**ति, इवोत्प्रेक्ष्यते शरीरबद्धाभिर्मूर्त्तिमतीभिः समस्तपुरुषार्थसिद्धिभिरित्यर्थः पुनः कथंभूताभिः **कुलप्रसूताभि**रुत्तमकुलोत्पन्नाभिरेवंविधाभिर्वधूभिरलङ्कृताऽयोध्येति ॥ औ ॥

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

पुनः कीदृशीभिर्वधूभिः ? **अङ्गीकृतसतीव्रताभिरपि**=अङ्गीकृतं सतीव्रतं शीलवतो धर्मो याभिस्तास्तथा ताभिरपि, **असतीव्रताभिः**=न विद्यते सतीव्रतं यासां तास्तथा ताभिरिति विरोधः, तत्परिहारश्च न सह तीव्रतया अत्युग्रतया वर्तन्त इति तथा ताभिरिति। अत्र विरोधाभासालङ्कारः। **नितम्बभरवहने**=नितम्बस्य " नितम्बोऽप्यपरस्तस्याः श्रोणिभागस्तथा कटिः " इत्युक्तस्य यो भरो भारस्तद्वहने, नान्यत्र गृहकार्यादौ, **अलसाभिः**=मन्दाभिः। एतेन नितम्बविपूलता दर्शिता, सा च नारीणां भूषणम्। पुनः कीदृशीभिः ? **उदरे**=कुक्षौ, न तु स्वभावादौ, **तुच्छाभिः**=मुष्टिग्राह्यत्वादुदरस्य कृशाभिः, एतेन कृशोदरीता सूचिता, सा च भूषणम्। पुनः कीदृशीभिर्वधूभिः ? **चक्षुषि**=नेत्रे, न तु स्वभावादौ, **तरलाभिः**=चञ्चलाभिः, एतेन नयनचञ्चलता ज्ञापिता, सा च नारीणां भूषणम्। पुनः कीदृशीभिर्वधूभिः ? **भ्रुवोः**=नेत्रोर्ध्वस्थरोमराज्योः, न पु स्वभावादौ, **कुटिलाभिः**=वक्राभिः, एतेन भ्रुवोः कुटिलता ज्ञापिता, सा च भूषणम्। पुनः कीदृशीभिर्वधूभिः ? **अङ्गशोभायां**=शरीरशोभाकरणे, न तु भोजनादौ, **अतृप्ताभिः**=तृप्तिरहिताभिः। एतेन वधूत्वात् शरीरशोभाकरणतत्परता सूचिता। पुनः कीदृशीभिर्वधूभिः ? **तारुण्ये**=यौवने, न तु गुरुजनानामग्रे वर्तनविधौ, **उद्धताभिः**=अविनीताभिः, एतेन यौवनं दर्शितम्, तच्चोद्धतं भवति, यदुक्तं– " यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता। प्रत्येकमप्यनर्थाय किमुत यत्र चतुष्टयम् ॥ इति। अत्र नितम्बवर्णनादारभ्य यौवनवर्णनपर्यन्तमार्थी परिसंख्याऽलङ्कारः। पुनः कीदृशीभिर्वधूभिः ? **चरणयोः**=पादयोः, **कृतकुसंगाभिः**=कृतः कोः पृथिव्याः संगो याभिस्तास्तथा ताभिः, **न स्वभावे**=प्रकृतौ कृतः कुसंगो दुष्टजनसम्बधो याभिस्तास्तथा ताभिः। अत्रशाब्दी अप्रश्नपूर्विका परिसंख्याऽलङ्कारः। पुनः कीदृशीभिः ? **कोपेऽपि**= क्रोधदशायामपि, **अदृष्टमुखविकाराभिः**=न दृष्टो मुखविकारो यासां तास्तथा ताभिः, **व्यलीकेऽपि**=केनापि महता अप्रिये असत्ये वा प्रोक्तेऽपि, **अनुज्झितविनयाभिः**=न उज्झितस्त्यक्तो विनयो याभिस्तास्तथा ताभिः, **खेदेऽपि**=परिश्रमेऽपि शोकेऽपि वा, **अखण्डितोचितप्रतिपत्तिभिः**=न खण्डिता उचितानां योग्यानां महतां प्रतिपत्तिः सत्कारादिगौरवं याभिस्तास्तथा ताभिः **कलहेऽपि**=वचनयुद्धेऽपि, **अनिष्ठुरभाषिणीभिः**=न निष्ठुरं कठोरं भाषन्त इत्येवंशीलाभिः, **शरीरबद्धाभिः**= शरीरयुक्ताभिः, **सकलपुरुषार्थसिद्धिभिरिव**= धर्मार्थकाममोक्षरूपपुरुषार्थसम्पत्तिभिरिव। अत्रोत्प्रेक्षालङ्कारः ॥ औ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**इतराभिरपि त्रिभुवनपताकायमानाभिः कुबेरपुरपण्याङ्गनाभिरिव कृतपुण्यजनोचिताभिः पादशोभयाऽपि न्यक्कृतपद्माभिरूरुश्रियाऽपि लघूकृतरम्भास्तम्भाभिर्गौर्यापि च्छायया सौभाग्य-**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

इतराभिरपि त्रिभुवनपताकायमानाभिः, यदीतराः सामान्याः कथं त्रिभुवनपताकायमाना इति विरोधः, विरोधपरिहारे तु **इतराभिः**=अन्याभिः । **कृतपुण्यजनोचिताभिः**=एकत्र कृतं पुण्यं शुभकर्म यैस्ते तथोक्तास्ते च ते जनाश्च कृतपुण्यजनास्तेषामुचिता योग्या, अन्यत्र पुण्यजना यक्षाः कृतं पुण्यजनानामुचितमनुरूपं यकाभिस्तास्तथोक्तास्ताभिः, **न्यक्कृतपद्माभिः,** पद्मं=कमलं पद्मा=लक्ष्मीः । **लघूकृतरम्भास्तम्भाभिः**=तिरस्कृतकदलीस्तम्भाभिरपनीतरम्भाप्सरोदर्पाभिश्च । **गौर्यापि**=सुवर्णवर्णया भवान्यापि ।

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

पुनः कथंभूताऽयोध्या **वितीर्णत्रिभुवनजिगीषुकुसुमसायकसाहायका,** वितीर्णो विस्तारितस्त्रिभुवनं जिगीषुर्जेतुमिच्छुः कुसुमसायकः कन्दर्पः साहायकः सखा यस्यां सा तथा । ननु काभिः कन्दर्पो विस्तारित इत्याह— **विलासिनीभिः** साधारणस्त्रीभिः, कथंभूताभिर्विलासिनीभि**स्त्रिभुवने**ति, त्रिजगत्युत्तमाभिः । पुनः कथंभूताभिर्विलासिनीभिः **कृतपुण्यजनोचिते**ति, कृतं पुण्यं यैस्ते तथैवंविधा जना लोकास्तेषां योग्याभिः । अत्र दृष्टान्तमाह **कुबेरे**ति, यथा कुबेरपुरस्य धनदपुरस्य पण्याङ्गनाः साधारणस्त्रियः । **कृते**ति, कृतं निर्मितं पुण्यजनानां यक्षाणामुचितं याभिस्तास्तथैता अपि सन्तीति तद्दृष्टान्तेन विलासिनीविशेषणमिदम् , पुनः कथंभूताभिर्विलासिनीभिः **पादे**ति, पादशोभया रक्तत्वसौकुमार्यादिरूपया न्यक्कृतं पद्मं कमलं याभिस्तास्तथा ताभिः । व्यङ्ग्यार्थत्वे तु पादशोभयाऽपि चरणशोभयापि न्यक्कृता तिरस्कृता पद्मा याभिस्तास्तथा ताभिर्लक्ष्मीतोऽप्येतासां चरणशोभाऽधिकेति भावः । पुनः कथंभूताभिस्ताभिरूरु**श्रिये**ति, ऊर्वोः शोभया लघूकृतो रम्भास्तम्भः कदलीस्तम्भो याभिस्तास्तथा ताभिः । पुनः कथंभूताभिस्ताभि**र्गौर्याऽपी**ति, गौर्या पार्वत्या, **छायये**ति, छायामिषेण, **सौभाग्यहेतोः** सौभाग्यार्थ**मुपासिताभिः** सेविताभिः ।

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

पुनः कीदृशी नगरी ? **विलासिनीभिः**=विलासप्रधाननारीभिः, वेश्याभिरित्यर्थः । **वितीर्णत्रिभुवनविजिगीषुकुसुमसायकसाहायका**=वितीर्णं दत्तं त्रिभुवनविजिगीषोर्भुवनत्रयजयाभिलाषुकस्य कुसुमसायकस्य कामस्य साहायकं सहायता यया सा तथा । कीदृशीभिर्विलासिनीभिः ? इतराभिरपि त्रिभुवनपताकायमानाभिः, **इतराभिरपि**=पामराभिरपि, **त्रिभुवनपताकायमानाभिः**=त्रिभुवने भुवनत्रये पताकायमानाभिर्ध्वजायमानाभिः, याः पामरास्ताः कथं त्रिभुवने पताकायमानाः स्युरिति विरोधः, तत्परिहारे, **इतराभिः**=अन्याभिः कुलवधूभिन्नाभिरित्यर्थः । " इतरः पामरेऽन्यस्मिन् " इति शास्वतः । अत्र विरोधाभासालङ्कारः । पुनः कीदृशीभिः ? **कुबेरपुरपण्याङ्गनाभिरिव**=कुबेरपुरस्य यक्षराजनगरस्य अलकापुर्या इत्यर्थः, पण्याङ्गनाभिरिव वेश्याभिरिव, **कृतपुण्यजनोचिताभिः**=कृतं पुण्यं शुभकर्म यैस्तेषामुचिताभिर्योग्याभिः, पक्षे कृतं पुण्यजनानां यक्षाणामुचितं योग्यं याभिस्तास्तथा ताभिः "यक्षः पुण्यजनः" इत्यभिधानचिन्तामणिः । अत्र पूर्णोपमालङ्कारः । पुनः कीदृशीभिः ? **पादशोभयापि**=पादयोश्चरणयोः शोभयापि आस्तामन्येषामवयवानां नयनकरादीनाम् , **न्यक्कृतपद्माभिः**=न्यक्कृतं तिरस्कृतं पद्मं कमलं याभिस्तास्तथा ताभिः, यद्वा **पादशोभयापि**=पादश्चतुर्थांशस्तन्मितयापि शोभया, आस्तां सम्पूर्णया, **न्यक्कृतपद्माभिः**=न्यक्कृता तिरस्कृता पद्मा लक्ष्मीर्याभिस्तास्तथा ताभिः । कमलतोऽप्यधिका या पादशोभा लक्ष्मीतोऽप्यधिका वा या शोभा तां दधानाभिरित्यर्थः । अत्र काव्यलिङ्गातिशयोक्त्यलंकारौ । पुनः कीदृशीभिः ? **ऊरुश्रियाऽपि**=ऊर्वोः जानूपरिभागयोः श्रियापि शोभयापि, **लघुकृतरम्भास्तम्भाभिः**=लघुकृतोऽधरीकृतो रम्भास्तम्भः कदलीकाष्ठमप्सरोगर्वो वा याभिस्तास्तथा ताभिः । पुनः कीदृशीभिः ? **गौर्यापि**=गौरवर्णयापि पार्वत्यापि वा, **छायया**=कान्त्या, **सौभाग्यहेतोः**=सौभाग्यार्थम् , **उपासिताभिः**=सेविताभिः, आश्रिताभिरित्यर्थः । अतिगौरवर्णाभिरिति भावः । अत्र काव्यलिङ्गातिशयोक्त्यलंकारौ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**हेतोरुपासिताभिरिन्दुनापि प्रतिदिनं प्रतिपन्नकलान्तरेण प्रार्थ्यमानमुखकमलकान्तिभिर्मकरध्वजेनापि दर्शिताधिना लब्धहृदयप्रवेशमहोत्सवाभिरप्रयुक्तयोगाभिरेकावयवप्रकटाननमरुतामपि गतिं स्तम्भयन्तीभिरव्यापारितमन्त्राभिः सकृदाह्वानेन नरेन्द्राणामपि सर्वस्वमाकर्षयन्तीभिर-**

## 卐 विबुधशिरोमणिश्रीशान्त्याचार्यविरचितं टिप्पनकम् 卐

**प्रतिपन्नकलान्तरेण**=अभ्युपगतव्याजेन, अन्यत्र अवाप्तान्यान्यषोडशभागेन । **दर्शिताधिना**, आधिर्मानसी पीडा ।

## 卐 श्रीमत्पद्मसागरविबुधरचिता व्याख्या 卐

पुनः कथंभूताभिस्ताभि**रिन्दुनाऽपीति**, इन्दुना चन्द्रेण **प्रतिदिनं** प्रतिदिवसं प्रतिपन्नमेकस्याः कलाया अन्या कला कलान्तरं येन स तथा तेन, भिन्नां भिन्नां कलां कृत्वेत्यर्थः, प्रार्थ्यमानमुखकमलकान्तिर्यासां तास्तथा ताभिः । पुनः कथंभूताभिस्ताभि**र्मकरध्वजे**ति, दर्शित आधिर्मनःपीडा येन स तथा तेन, **मकरध्वजेनाऽपि** कन्दर्पेणाऽपि लब्धः प्राप्तो हृदये प्रवेशरूपो महोत्सवो यासां तास्तथा ताभिः । पुनः कथंभूताभिर्विलासिनीभिः, **अप्रयुक्तो**ऽनिर्मितो **योगः** पाणिग्रहणस्य सम्बन्धो याभिस्तास्तथा ताभिस्तासां केनाऽप्यपरिणीतत्वात् । पुनः कथंभूताभिरे**कावयवे**ति–एकस्य स्तनादेरवयवस्य प्रकटनेन प्रकाशनेन मरुतामपि देवानामपि गतिं स्तम्भयन्तीभिः स्खलयन्तीभिरित्यर्थस्तासां ह्येकावयवदर्शनाक्षिप्ता देवाः कार्यविशेषेण यान्तोऽपि तासां पुरस्तिष्ठन्तीति भावः । पुनः कथंभूताभिस्ताभि**रव्यापारिते**ति–अप्रकाशनेनाऽव्यापारितो मन्त्रो गुह्यं याभिस्तास्तथा ताभिः । पुनः कथंभूताभिस्ताभिः, **सकृदाह्वाने**ति–सकृदेकवारमाह्वानेनाऽऽकारणेन नरेन्द्राणामपि सर्वस्वं सर्वधनमाकर्षयन्तीभिरेकवारामन्त्रिता हि नरेन्द्रास्तासां मन्दिरे गत्वा व्यामोहिताः सन्तः सर्वस्वमर्पयन्तीति भावः । नन्वेतासां वशीकरणे किंचिदौषध्यादि भविष्यतीत्याशङ्कामपाकर्तुमाह, कथंभूताभिस्ता-

## 卐 श्रीविजयलावण्यसूरिविरचिता परागाभिधा विवृतिः 卐

पुनः कीदृशीभिः ? **प्रतिदिनं**=दिने दिने **प्रतिपन्नकलान्तरेण**=मूलधनस्यापरा कला कलान्तरं यल्लोके 'व्याज' इति कथ्यते, वृद्धिः कलान्तरमिति हैमः, यद्वा कला चन्द्रमण्डलस्य षोडशांशः, पूर्वकलापेक्षया अन्या कला कलान्तरम्, प्रतिपन्नं स्वीकृतं कलान्तरं मूलधनवृधिरूपं स्वमण्डलषोडशांशरूपं च येन स तथा तेन **इन्दुना**=चन्द्रेण, **प्रार्थ्यमानमुखकमलकान्तिभिः**=प्रार्थ्यमाना मुखकमलस्य कान्तिर्यासां तास्तथा ताभिः । अयं भावः, यथा कश्चिद्धनेच्छुर्धनिकस्य पार्श्वे कलान्तर[ व्याज ] स्वीकारेण धनं प्रार्थयते तथा कान्तिरूपधनेच्छुश्चन्द्रो धनिकस्थानापन्नविलासिनीनामग्रे कलान्तरस्वीकारेण धनस्थानापन्नमुखकान्तिं प्रार्थयते । प्रचुरमुखकमलकान्तियुक्ताभिरिति भावः, अत्र रूपकातिशयोक्त्यलंकारौ । पुनः कीदृशीभिः ? **दर्शिताधिना**=दर्शित आधिर्मानसी पीडा येन स तथा तेन, **मकरध्वजेनापि**=कामेनापि, **लब्धहृदयप्रवेशमहोत्सवाभिः**=लब्धः प्राप्तो हृदयप्रवेशस्य महोत्सवो यासां तास्तथा ताभिः । अयं भावः–आसां विलासिनीनां हृदये प्रवेशो जनानामतीव दुर्लभः, यतः कामेनापि प्रथमं वासनादिरूपा मनोव्यथा दर्शिता ततो हृदयप्रवेशो लब्ध इति, हार्दिकानुरागमकुर्वन्तीभिर्गुढहृदयाभिर्वेति फलितोऽर्थः । अत्र पर्यायोक्तमलंकारः । पुनः कीदृशीभिः ? **अप्रयुक्तयोगाभिरपि**=न प्रयुक्तो योगो योगिजनस्य योगक्रिया याभिस्तास्तथा ताभिरपि, **एकावयवप्रकटनेन**=एकावयवानां समानशरीरविभागानां प्रकटनेन प्रकाशनेन, निश्चलताकरणेनेत्यर्थः, **मरुतां**=वायुनाम्, **गतिं**=गमनम्, **स्तम्भयन्तीभिः**=निरोधयन्तीभिः, योगाभ्यासमन्तरेण वायुनिरोधो न सम्भवतीति विरोधः, तत्परिहारे **अप्रयुक्तयोगाभिः**=न प्रयुक्तो योगः पाणिग्रहणस्य सम्बन्धो याभिस्तास्तथा ताभिः, **एकावयवप्रकटनेन**=एकावयवस्य स्तनादेः प्रकाशनेन, **मरुतामपि**=देवानामपि, आस्तामितरेषाम्, **गतिं**=गमनम्, **स्तम्भयन्तीभिः**=निवारयन्तीभिः, देवा अपि यत्स्तनादिसौंदर्यं विलोक्य स्थिरा भवन्तीति भावः, अतिसुन्दरीभिरिति फलितोऽर्थः । अत्र विरोधाभासालंकारोऽतिशयोक्त्या संकीर्यते । पुनः कीदृशीभिः ? **अव्यापारितमन्त्राभिरपि**=न व्यापारितः प्रयुक्तो मन्त्रो याभिस्तास्तथा ताभिरपि, **सकृद्**=एकवारम्, **आह्वानेन**=आकारणेन, **नरेन्द्राणां**=मन्त्रेण सर्पादिविषवारणपटूनां वैद्यानाम्, **सर्वस्वं**=विषवारणलभ्यं सकलधनम्, **आकर्षयन्तीभिः**=गृह्णन्तीभिः, मन्त्रप्रयोगमन्तरेण मान्त्रिकलभ्यं धनं न लभ्यते, इति विरोधस्तत्परिहारे–**अव्यापारितमन्त्राभिः**=न व्यापारितः कृतो मन्त्रो गुप्तभाषणं याभिस्तास्तथा ताभिः, वेश्याजनत्वेन प्रकटभाषित्वादित्यर्थः । **नरेन्द्राणामपि**=राज्ञामपि, आस्तामितरेषाम्, **सर्वस्वं**=सकलधनम् । सकृदाहूता राजानो मोहिताः सन्तः सर्वस्वं समर्पयन्तीति भावः । अत्यन्तं मोहोत्पादिकाभिरित्यर्थः । अत्र विरोधाभासालङ्कारः । पुनः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## श्रीविजयनेमिसूरि-ग्रन्थमालाया लभ्या ग्रन्थाः-

| | | |
|---|---|---|
| धातुरत्नाकर भाग | १ ... ... ... | ५—०—० |
| ,, ,, | २ ... ... ... | ४—०—० |
| ,, ,, | ३ ... ... ... | २—०—० |
| ,, ,, | ४ ... ... ... | २—०—० |
| ,, ,, | ५ ... ... ... | ४—०—० |
| ,, ,, | ६ ... ... ... | २—८—० |
| ,, ,, | ७ ... ... ... | ५—५—० |
| सिद्धहेमदीपिका [ अष्टाध्यायमयी ] | ... ... ... | २—०—० |
| सिद्धहेमदीपिकाप्रकाश-प्रथमभागः | ... ... ... | ०-१४—० |
| तत्त्वार्थत्रिसूत्री-प्रकाशिका | ... ... ... | ४—८—० |
| प्रथम कर्मग्रन्थ, पद्यानुवाद-विवेचन-कोष्टकादि-विभूषित. | ... | ०—६—० |
| चैत्यवन्दनभाष्य छन्दोबद्धभाषानुवाद | ... ... ... | ०—८—० |
| स्याद्यन्तरत्नाकर ( साधनिकादिसहित शब्दरूपसागर ) | ... ... | १—४—० |
| तिलकमञ्जरी टीकात्रयोपेता प्रथमांशः | ... ... ... | ०-१२—० |
| जिनसंगीतसरिता ( नोटेशनयुक्त तथा स्नात्रयुक्त ) | ... ... | ०-१२—० |

### मुद्र्यमाणग्रन्थाः-

१ सिद्धहेमशब्दानुशासनं बृहद्वृत्तिबृहन्न्यासलघुन्यासादिसंवलितम् ।
२ तिलकमञ्जरी टीकात्रयोपेता ।
३ नयरहस्य-प्रकरणं प्रमोदाविवृतिविभूषितम् ।
४ सप्तभङ्गीनयप्रदीपप्रकरणं बालबोधिनीविवृतिसंकलितम् ।
५ अनेकान्तव्यवस्थाप्रकरणं तत्त्वबोधिनीविवृतिसहितम् ।

### प्राप्तिस्थानम्

सरस्वती पुस्तक भंडार
रतनपोळ, हाथीखाना
अमदावाद.

गुर्जरग्रन्थरत्नकार्यालय.
गांधी रस्तो, अमदावाद.

श्री क्रीश्ना प्रिन्टरी : रतनपोळ : अमदावाद.

For Private And Personal Use Only